शास्त्रसंदेश-३६

# स्तोत्रसंदेशमाला

## श्रीपार्श्वनाथजिनस्तोत्राणि-२

१०



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३६

# स्तोत्र संदेशमाला-१०

## श्रीपार्श्वनाथजिनस्तोत्राणि-२

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

**સ્તોત્ર સંદેશમાલા-૧૦**

**શ્રીપાર્શ્વનાથજિનસ્તોત્રાણિ-૨**

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૬ + ૨૭૫ + ૪

સ્તોત્ર : ૧૫૩ શ્લોક : ૧૬૫૭

**: પ્રમાર્જના :**

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

**: છંદ-સંયોજના :**

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!    અનુમોદનીય...!    અનુકરણીય...!


## સ્તોત્ર સંદેશમાલાના
## ભાગ ૯-૧૦ ના
## દ્રવ્ય લાભાર્થી




## શ્રી મહારાષ્ટ્ર ભુવન જૈન ધર્મશાળા
## પાલીતાણા

આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલી શ્રુતભક્તિની
શાસ્ત્રસંદેશ હાર્દિક અનુમોદના કરે છે.
ટ્રસ્ટીગણ ના અમો
આભારી છીએ.

*શાસ્ત્રસંદેશ, સુરત*







**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका

## ( श्री पार्श्वनाथ )-२


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | असुरसुरनरेन्द्रश्रेणिकोटीर- | पू.मु. श्री मेरुनन्दनोपाध्याय | १ |
| २ | आनन्दम(भि?)न्दकुमुदाकर- | पू.उपा. श्री मेरुनन्दनगणि | २ |
| ३ | जीयाज्जगच्चक्षुरपास्तदोषः | पू.उपा.श्री जिनपालवि. | ३ |
| ४ | श्रीसारणाचलमहेश्वरसन्निधाने, | पू. वाचकश्री मेघविजय | ५ |
| ५ | श्रीपार्श्वः प्रकटः प्रभाकर इव | पू.उपा.श्री मेघविजयजी | ९ |
| ६ | धर्ममहारथसारथसारं, सरस- | पू.मु. श्री जयसागरोपाध्याय | ११ |
| ७ | श्रीनिवासं सुरश्रेणिसेव्यक्रमं, | उपाध्यायश्री सहजकीर्तिगणि | १२ |
| ८ | श्रीश्रीपुराभिधपुरप्रथितावतारं | पू.उपा.श्री कल्याणविजयगणि | १७ |
| ९ | कल्याणकारं कमनीयसम्पदं | पू.उपा.श्री कल्याणविजयगणि | २० |
| १० | ऐन्द्रश्रेणिनतावतंसनिकर- | पू. पं. श्री नयविमलगणि | २३ |
| ११ | श्रीमत्पार्श्वजिनं सारङ्गं, प्रणत | पू.उपा.श्री नयविमल | २७ |
| १२ | श्रीमत्पार्श्वः सुखं कुर्य्यात्पर- | पू. मु. श्री रत्नसुन्दरगणि | २८ |
| १३ | जय श्रियो निधे ! स्वामिन्न- | पू.मु.श्री उदयवीरगणि | ३० |
| १४ | एकः पुरुषसिंहस्त्वं मोह- | पू.मु.श्री उदयवीरगणि | ३२ |
| १५ | केवललोकितलोकालोक- | पू.मु.श्री शिवचन्द्रगणि | ३३ |
| १६ | यकः संसाराम्भौ-निधि- | पू.मु.श्री शिवचन्द्रगणि | ३५ |
| १७ | सुधाशनक्ष्माधरधीर ! | पू.मु. श्री उदयधर्मगणि | ४३ |
| १८ | स्वस्ति श्रीपदमद्भुतं सुकृति- | पू.मु.श्री रत्नचन्द्रगणि | ४६ |
| १९ | परम मङ्गल राजित संचरं, | पू.मु.श्री रत्नहर्षवाचक | ४८ |
| २० | श्री पार्श्व जिनेश्वर प्रणमउ धरि | पू.मु.श्री रत्नहर्षवाचक | ५० |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २१ | श्रीपार्श्वनाथजिनपं तमहं | वाचनाचार्यश्री वल्लभगणि | ५२ |
| २२ | जिनवरेन्द्रवरेन्द्रकृतस्तुते, कुरु | वाचकश्रीवल्लभगणि | ५४ |
| २३ | छत्रं भेर्यंशुबिम्बं प्रवरमणि– | पू.मु. श्री पूर्णभद्रगणि | ५६ |
| २४ | ॐ ह्रीं श्रीँ धरणोरुगेन्द्र– | पू.मु. श्री कुशललाभवि. | ५७ |
| २५ | विमलगुणनिधानं केवलश्री– | पू.मु.श्री ज्ञानप्रमोदगणि | ५८ |
| २६ | समानो ! समानोऽसमानोऽ | पू.मु.श्री पद्मराजगणि | ६० |
| २७ | ॐ नत्वा जिनमण्डलीसुर– | पू.मु. श्री सङ्घविजयगणि | ६१ |
| २८ | संसारवारिनिधितारकतारकाभ, | पू.मु.श्री धर्मवर्द्धनगणि | ६४ |
| २९ | विश्वेश्वराय भवभीति निवार– | पू.मु.श्री धर्मवर्द्धनगणि | ६५ |
| ३० | वाञ्छितदानसुरद्रुम तुभ्यं, | पू.मु.श्री धर्मवर्द्धनगणि | ६६ |
| ३१ | प्रवरपार्श्वजिनेश्वर पत्कजे, | पू.मु.श्री धर्मवर्द्धनगणि | ६८ |
| ३२ | भजेऽश्वसेन–नन्दनं मुहुर्विधाय | पू.मु.श्री धर्मवर्द्धनगणि | ७० |
| ३३ | सर्वश्रिया ते जिनराज राजतः, | पू.मू.श्री. धर्मवर्द्धनगणि | ७० |
| ३४ | प्रसर्सर्त्ति पार्श्वेश विश्वे यशस्ते, | पू.मु.श्री.धर्मवर्द्धनगणि | ७२ |
| ३५ | भोभो भव्याः, कीर्त्तितव्याः | पू.मु.श्री धर्मवर्द्धनगणि | ७३ |
| ३६ | लसच्चारुकल्याणसौख्याभि– | पू.मु. श्री वत्सराजगणि | ७५ |
| ३७ | चित्रैः स्तवीमि श्रीपार्श्वं | पू.मु.श्री हंसराजगणि | ७६ |
| ३८ | श्रेयः श्रियः श्रितवतां | पू. आ. श्री सोमसुन्दरसूरिशिष्य | ७८ |
| ३९ | विभाति यद्–भास्तरुणा– | पू.आ.श्री सोमसुन्दरसूरि शिष्य | ८२ |
| ४० | यो भ्राजसेऽतान्तिरभीरभीरभी– | पू.आ.श्री सोमसुन्दरसूरि शिष्य | ८४ |
| ४१ | सिद्धं हृदयनिरुद्धं बुद्धं | पू. मु. श्री सकलचन्द्र वि. | ८६ |
| ४२ | पूरितकामितभरमतिसुन्दर– | पू.मु. श्री गुणविनय वि. | ९२ |
| ४३ | वन्दे सुभाव वसुसङ्ककरं | पू.मु.श्री जयसोमविजय | ९४ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४४ | लसत्पङ्कजाऽऽमोदनिश्वाससारं, | पू.मु.श्री जयसोमविजय | ९५ |
| ४५ | सन्तोषशर्मसदनं स(द)नन्द्य | पू.मु.श्री जयसोमविजय | ९६ |
| ४६ | भविकभावुकसङ्गमकारकं, | पू.मु.श्री जयसोमविजय | ९७ |
| ४७ | विश्वत्रयी जनमनोमतकामकुम्भं | पू.मु.श्री जयसोमविजय | ९८ |
| ४८ | आनन्दनम्रविबुधाधिपमौलि- | पू.मु.श्री ज्ञानप्रमोदगणि | ९९ |
| ४९ | कल्याणकेलिसदनाय नमो | पू.मु.श्री रत्नसिंह वि. | १०१ |
| ५० | शाश्वतलक्ष्मीवल्लीदेवं, देवा | पू.मु.श्री ज्ञानतिलक वि. | १०२ |
| ५१ | चरणकमलं श्रीवाग्देव्याः | पू. गुणवि. शिष्य मानवि. | १०३ |
| ५२ | सुरदानवमर्त्यमुनीन्द्रनतं | पू. श्री उत्तमसागर शिष्य | १०५ |
| ५३ | नमतामितकामितकामघटं | पू.मु. श्री गुणरत्न वि. | १०६ |
| ५४ | श्रीपार्श्व विश्वव्यसनापहारी | पू.मु. श्री सुरप्रभ वि. | १०७ |
| ५५ | शश्वच्छासनवैरिदानववधू- | मु. श्री सिद्धान्तरुचि वि. | १११ |
| ५६ | शर्म प्रयच्छ सुदशर्म तदेव | पू.मु. श्री सिद्धान्तरुचि वि. | ११४ |
| ५७ | वामासुत(तं) त्रिभुवनसारङ्गं, | पू.मु.श्री रामविजय | ११६ |
| ५८ | जीरापल्लिपुरोत्तमाङ्गतिलकः | पू.मु. श्री सोभाग्यमूर्ति वि. | ११७ |
| ५९ | त्रिभुवनपूरुषतारक! तारक- | पू.मु.श्री ज्ञानचन्द्र वि. | ११८ |
| ६० | श्रेयोरमाकीर्तिविभूतिवल्ली- | पू.मु. श्री नयसागर वि. | ११९ |
| ६१ | तमालनीलच्छविपिच्छलाङ्गः, | पू.मु. श्री जिनपद्म वि. | १२१ |
| ६२ | महानन्दलक्ष्मीघनाश्लेषसक्त! | पू.मु.श्री हंसरत्न वि. | १२२ |
| ६३ | सकलसुरासुरवन्द्यं हृद्यगुणं | पू.मु.श्री हंसरत्न वि. | १२४ |
| ६४ | महानन्दकल्याणगेहं सुदेहं, | पू.मु.श्री सुखसागर वि. | १२६ |
| ६५ | जय त्रिभुवनोत्तंस! पार्श्व- | पू.मु.श्री भावदेवविजय | १२७ |
| ६६ | श्रीमगसीपुरमण्डनशम्भो दय | पू. मु. श्री रविसागर वि. | १२९ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ६७ | अजारपार्श्वस्तुतिमार्गमानये | पू. मु. श्री पद्मसागर वि. | १३० |
| ६८ | अश्वसेननरेन्द्रस्य, वामादेव्याश्च | पू.मु.श्री आनन्दवल्लभ वि. | १३१ |
| ६९ | श्रेयोमयं ही बलमालमालमा- | पू.मु.श्री सूरचन्द्रर्षि | १३२ |
| ७० | श्रीमान् पार्श्वः प्रभुरभिमतं | पू.आ.श्री रत्नशेखरसूरिशिष्य | १३४ |
| ७१ | विपुलमङ्गलमण्डलदायकं | पू.मु.श्री आनन्दमाणिक्य वि. | १३९ |
| ७२ | उद्यत्फणामुकुटभूषितमस्त- | पू.मु.श्री लक्ष्मीलाभ वि. | १४३ |
| ७३ | श्रीअश्वसेनस्तनयो नयो नयोत् | पू.मु. श्री रविसागर वि. | १४४ |
| ७४ | निजगुरोरभिनम्य पदाम्बुजं | पू.मु. श्री विद्याविमलशिष्य | १४६ |
| ७५ | भुजगलक्षणलक्षणलक्षितं, | पू.मु.श्री जिनचन्द्रराज वि. | १४७ |
| ७६ | प्रणम्य परमात्मानं, श्रीपार्श्व | पू.मु. श्री पार्श्वचन्द्र वि. | १४८ |
| ७७ | सदा नीलगात्रं, लसद्ज्ञानपात्रं | पू.मु. श्री लक्ष्मीवल्लभ वि. | १४९ |
| ७८ | कुशलकमलनिर्मल सारंगं, | पू.मु. श्री सिद्धान्तराज वि. | १५० |
| ७९ | श्रीशारदाऽऽधारमुखारविन्दं | पू.मु.श्री सोमसेन वि. | १५२ |
| ८० | विमलकुलकमलरविकिरण- | पू.मु.श्री समयराज वि. | १५३ |
| ८१ | अहिपतिधृतपार्श्वं छिन्नसम्मोह- | पू.मु.श्री कीर्तिमेरुविजय | १५४ |
| ८२ | श्रीमान्निर्ग्रन्थराट् स्वामी, | पू.मु.श्री सकलकीर्ति वि. | १५६ |
| ८३ | स्वस्तिश्रीसुरपत्तनं प्रभु- | पू.मु.श्री लब्धिविजय | १५८ |
| ८४ | लक्ष्मीर्महस्तुत्यसती सती सती | पू.मु. पद्मप्रभदेव | १६१ |
| ८५ | पार्श्वनाथप्रभो ! नित्यं, | पू.मु.श्री मणिविजय | १६३ |
| ८६ | प्रभुलोडणपार्श्वजिनं सुकरं, | पू.मुनिश्री ऋद्धिचन्द्र शिष्य | १६३ |
| ८७ | यो मुक्तिलक्ष्मीं सकलां ववार, | पू.मु.श्री मलूकचन्द्र वि. | १६४ |
| ८८ | श्रियः सन्ततेः कारकं श्रीजिनेशं | पू.मु.श्री मूलकचन्द्र वि. | १६५ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ८९ | श्रीइक्ष्वाकुकुलप्रदीपमखिल | पू.मु.श्री प्रतिष्ठासोमगणि | १६७ |
| ९० | श्रीपार्श्वनाथ ! भवतो भवतो- | श्री आल्हादमन्त्रि | १७२ |
| ९१ | धरणोरगेन्द्रसुरपतिविद्याधर- | कविश्री शिवनाग | १७४ |
| ९२ | जयति भुजगराजप्राज्य- | श्री बिल्हणकवि | १७८ |
| ९३ | श्रीवामेयं विधु-सम-वदनं, | श्री ब्रह्मर्षि | १८० |
| ९४ | श्री पार्श्वनाथं तमहं स्तवीमि, | | १८२ |
| ९५ | अभिमतफललाभकरं चिन्ता- | | १८४ |
| ९६ | जीरावल्लि प्रभुपार्श्वं, पार्श्व- | | १८५ |
| ९७ | सुरासुराधीश्वरसेव्यपादं, | | १८६ |
| ९८ | अमेय-वामेय-चरित्रचित्रं नो | | १८७ |
| ९९ | श्रीजीरापल्लिपुरी मेरुदरी धरणि | | १८८ |
| १०० | तरुवरभूषितभूमिमहेलः, स | | १९० |
| १०१ | पुरी जीरिकापल्लिका पारिजातं | | १९४ |
| १०२ | ऐंकारस्मृतिसावधानमनसा | | १९८ |
| १०३ | सौभाग्यभाग्यातिशयाभिरामं, | | २०० |
| १०४ | यस्य ज्ञानदयासिन्धो-र्दर्शनं | | २०१ |
| १०५ | यदीयपादाम्बुरुहि प्रसक्ता | | २०२ |
| १०६ | गौडीग्रामे स्तम्भने चारुतीर्थे | | २०३ |
| १०७ | शिवसुखदातारं विश्वाधारं | | २०४ |
| १०८ | श्रीमद्देवेन्द्रवृन्दामलमुकुट- | | २०४ |
| १०९ | ह्रीँकारं ब्रह्मरुद्धं स्वरपरिकलितं | | २०६ |
| ११० | श्रीश्रीपुरे निर्मितसन्निवासं | | २०८ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १११ | श्री वामेयविभुं जगज्जनमनः | | २०९ |
| ११२ | गीवार्णचक्र-नरनायकवृन्द- | | २१४ |
| ११३ | जनानन्दमाकन्दसच्चैत्रमासं, | | २१७ |
| ११४ | स्तवीमि तं पार्श्वजिनं सदैव तं | | २१९ |
| ११५ | श्रीचारूपपुरप्रधानवसुधा- | | २२० |
| ११६ | कुङ्कुमरोलाभिधं पार्श्वं | | २२२ |
| ११७ | वरिष्ट इष्ट देवता सुगोडी- | | २२३ |
| ११८ | श्रीमत्पार्श्वजिनेश्वरस्य | | २२४ |
| ११९ | प्रोच्चैःप्रभावः प्रसरीसरीति | | २२५ |
| १२० | किं कर्पूरमयं सुधारसमयं किं | | २२६ |
| १२१ | पार्श्वप्रभुं ज्ञानरमासनाथं नाथं | | २२८ |
| १२२ | मज्जा उदीपुर वरोदय | | २२९ |
| १२३ | सकलवाञ्छितदायकमुत्तमं | | २३२ |
| १२४ | श्रीपार्श्वं नवखण्डाख्यं तं | | २३३ |
| १२५ | रमाकरो यो जगतो रमाकरो | | २३६ |
| १२६ | लक्ष्मीनिदानं गुरुकर्मदानं, | | २३७ |
| १२७ | जय जय जनतारक हे ! जगदा- | | २३८ |
| १२८ | जगतीशस्ते वैराग्य-रङ्ग त्वां | | २३९ |
| १२९ | नमद्देवनागेन्द्रमन्दारमालामरन्द | | २४२ |
| १३० | शङ्खेश्वर स्तम्भन-लोड(ठ)न- | | २४३ |
| १३१ | श्रीमत्श्री(च्छ्री)पार्श्वनाथस्य, | | २४४ |
| १३२ | प्रणमामि सदा जिनपार्श्वजिनं, | | २४६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १३३ | श्रीपार्श्वः पातु वो नित्यं, जिनः | | २४७ |
| १३४ | ॐ जितुं ॐ जितुं ॐ जि | | २५० |
| १३५ | अर्हं श्रीपार्श्वनाथो भुजगपति- | | २५१ |
| १३६ | नादाग्रबिन्दु तलु चन्द्रकला | | २५२ |
| १३७ | ॐ ह्रीँ अर्हमथो नमो भगवते | | २५३ |
| १३८ | सरभसनतविद्याधरः(र)सुर- | | २५४ |
| १३९ | स्वर्णसिंहासनं स्वामिनोऽधः | | २५५ |
| १४० | महिम्नः पारं ते परमविदुषस्ते | पू.रघुनाथमुनि. | २५६ |
| १४१ | रागादिध्वान्तसंघातविघात- | | २६३ |
| १४२ | अविचललक्ष्मीविमलनिवासं- | | २६४ |
| १४३ | श्यामवर्णविराजितोपि विमलो | | २६५ |
| १४४ | सर्वदेव सेवित पद पद्मं, पद्मं | | २६६ |
| १४५ | श्रीमत्पार्श्वं जिनेन्द्रं सकल- | | २६७ |
| १४६ | वन्देहं जिनदेव पार्श्वं, षड्- | | २६९ |
| १४७ | प्रभु पार्श्वनाथं विभुविश्वनाथं, | | २६९ |
| १४८ | भजे भजे नाथ तवांघ्रिपद्मं | | २७० |
| १४९ | तीर्थेश्वरं जगन्नाथमर्हन्तं | | २७१ |
| १५० | आसीत् प्रभोर्यस्य पिताऽ- | | २७२ |
| १५१ | विमल केवल ज्ञान समुज्ज्वलं, | | २७३ |
| १५२ | पार्श्वनाथ ! नमस्तुभ्यं विघ्न- | | २७४ |
| १५३ | विशदगुण विचित्रं सच्चरित्रं | | २७५ |

पू.उपा.श्री मेरुनन्दनगणिकृतम्

# १. ॥ श्रीजीरापल्ल्यष्टकम् ॥

(मालिनी)

असुरसुरनरेन्द्रश्रेणिकोटीरकोटी-
तटसुघटितमाणिक्यायमाणप्रतापः ।
य इह जपनमात्राज्जायते भीतिनाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः ॥ १

कनकतुहिनविन्ध्यास्तोदयक्ष्माधरेषु,
प्रकटितलयलक्षाः सिद्धगन्धर्वयक्षाः ।
यदतिशयविशेषं जाग्रति स्निग्धगाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः ॥ २

चपलकुसमचापोत्तापसन्तापिताङ्गा,
अमृतरसभुजोऽपि स्वर्गिणः कामयन्ति ।
गुरु-महिम यदीयं सेवितुं स्नानपाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः ॥ ३

टलति खलु कुवेला याति दुष्टावहेला,
मिलति सुखदमेला सिद्धिलक्ष्मी महेला ।
हृदि यमिह दधीयं(नां) सन्नमन्नाकिनाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः ॥ ४

तरणिरिव यदीयं दर्शनं प्राणिभाजां,
विघटयति तमांसि श्रेयसां राति राशिम् ।
अभिमतशतदाता मे महाबुद्धिनाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः ॥ ५

परमहिमनिधीनां मन्त्रयन्त्रौषधीनां,
समधिकमपि कार्यं यस्य नामैव चक्रे ।
दुरितविततवल्लीभञ्जने हस्तिनाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः ॥ ६

यशसि भवति लाभः सिद्धिमुक्ताफलाभः,
प्रसरति गुणवारः सेवते श्रीप्रकारः ।
यदभिनमनभाजो योगिनामेकनाथः
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः ॥ ७

शरणमयमितीव प्राणिनो यन्निदद्ध्यु-
र्मनसि निशि-दिवाऽपि स्तोमितस्तन्मयाऽपि ।
सकलसुमुनिमेरूर्नन्दनश्रीसनाथः,
स जयति भुवि जीरापल्लिराट्पार्श्वनाथः ॥ ८

पू.उपा. श्री मेरुनन्दनगणिविरचितम्

## २. ॥ श्रीकरहेटकपार्श्वजिनस्तवनम् ॥

(वसन्ततिलका)

आनन्दम(भि?)न्दकुमुदाकरपूर्णचन्द्रं
विश्वत्रयी(ये) नयनशीतलभावचन्द्रम् ।
उद्दण्डचण्डमहिमा रमया सनाथं
नित्यं नमामि करहेटकपार्श्वनाथम् ॥ १

नाथ ! त्वदीयमुखमण्डलमीक्षमाणो
नाऽयं जनो लवणिमापरपारमेति ।

पोतप्रयत्नचलितोऽपि कदापि किं वा
जङ्गम्यते चरमसागरपुष्करान्तम् ? ॥ २

कान्तं तवेश ! नयनद्वितयं विलोक्य
कारुण्यपुण्यपयसा भरितं सरोवत् ।
मल्लोचने हरिणवच्चपले चिराय
सन्तोषपोषमयतां भवदाहतस्तैः ॥ ३

कल्पद्रुमो मम गृहाङ्गणमागतोऽद्य
चिन्तामणिः करतले चटितोऽद्य सद्यः ।
अद्याश्रिता मम पदौ सुरधेनुरेव
यद्भेटितोऽसि करहेटकपार्श्वदेव ! ॥ ४

सिद्धानि मेऽद्य सकलानि मनोगतानि
पापानि पार्श्वजिन ! मे विलयं गतानि ।
याचे न किञ्चिदपरं भवतो गभीरं
ध्यानं तवास्ति यदि मे हृदि मेरुधीरम् ॥ ५

पू.उपा.श्री जिनपालगणिविरचितः
श्लेषालङ्कारसहितः

## ३. ॥ नवग्रह–स्तम्भनकपार्श्वदेवस्तवः ॥

जीयाज्जगच्चक्षुरपास्तदोषः छायान्वितो धामनिधिः सभद्रः ।
नालीकबन्धुर्जडिमापहारी श्रीस्तम्भनस्थः प्रभुपार्श्वनाथः ॥ १
(इन्द्रवज्रा)

गोभिर्जनानां विसृतप्रमोदं
सम्पादयन् भाऽऽश्रयतया(?ता) प्रतीतः।
आनन्दकृत् कौशिकमानसानां
पार्श्वस्तमस्तस्यतु वः कलावान् ॥ (इन्द्रवज्रा) २

यो रागभृत् सिद्धितया प्रसिद्धोऽष्टम्यां वितेने जननोत्सवेन ।
भुवः प्रमोदं परमं स पार्श्वः, सन्मङ्गलो मङ्गलमातनोतु ॥ ३
(उपजाति)

असद्ग्रहाऽऽसङ्गविमुक्तमूर्ति-दृष्ट्या प्रयच्छत्यतुलं फलं यः ।
कलानिधिः प्रीतिकरश्च सौम्यो
ददातु पार्श्वः सबुधः सुबुद्धिम् ॥ (उपजाति) ४

यस्य प्रभावात् शुभराशिभाजः,
पुण्यात्मनां द्राग् भवतीष्टसिद्धिः ।
पार्श्वः सुपर्वानतपादपद्मः
स गीःपतिर्यच्छतु गीःप्रसादम् ॥ (उपजाति) ५

पार्श्वः प्रसर्पन्नयनाभिराम-द्युतिर्दितेः सूनुभिरर्चितांह्रिः ।
काव्यः सदानीरजसुप्रबुद्धः
पदे विदध्यात् व्यसनव्ययं नः ॥ (उपजाति) ६

यो मन्द उद्दामखगोपहार-सत्कः सदा विष्टपसौख्यकारी ।
नामी न संस्थानरतः सुतेजाः,
वामाङ्गजः शर्म करोत्यसौ वः ॥ ७

दृश्याऽमृतश्लिष्टगलप्रफुल्ल-नीलोत्पलाभाननमात्रदेहम् ।
सच्चक्रसङ्गं समयाम्बुराशिं पार्श्वं समस्तापदमानमामि ॥ ८
(इन्द्रवज्रा)

गु(ग)रुत्मतः श्रीपरिभाविकान्ति-च्छटासृतव्योमदिगन्तरालः ।
महाप्रभावो नवमो ग्रहाणां स केतुरव्याद् भवतो जिनो माम् ॥९
(उपेन्द्रवज्रा)

इति ग्रहाभास्यपि चित्रमग्रहः पद्मावतीमुख्यमहासुरार्चितः ।
नागेन्द्रसान्निध्यभृदापदां भरं समुच्छिनत्त्वाशु फणीश्वरध्वजः ॥१०
(उपजाति)

स्तवं समाहात्म्यममुं महामणिं दधाति यः कण्ठतटे सदादरात् ।
दुष्टा ग्रहास्तं परिपीडयन्ति न,
क्षतौजसः पार्श्वसुनामतेजसा ॥ (उपजाति) ११

इति स्तुतः स्तम्भनसत्पुरस्थितः
सद्दृष्टि-दृष्ट्युत्सवतां परामितः ।
पार्श्वोऽद्य शीतद्युतिवन्निजौजसा,
मनश्चकोरप्रमदं तनोतु नः ॥ (उपजाति) १२

पू. वाचकश्री मेघविजयविरचितम्

## ४. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तवनम् ॥

(वसन्ततिलका)

श्रीसारणाचलमहेश्वरसन्निधाने,
सम्पत्करी शिवपुरीनगरी सुरीभिः ।
तद्राज्यभाजि ननु राजनि वैरिशल्ये,
शङ्खेश्वरो विजयतां जिनपार्श्वनाथः ॥ १

स्पष्टीबभूव भविनां भुवि भागधेयाद्,
ध्येयातिशायि-सुखदायि-सुनामधेयः ।

शङ्खेश्वरस्तनुमयूखदिनेश्वरोऽर्हन्,
नेत्राऽमृताञ्जनजगत्प्रियरूपधेयः ॥ २

ॐकार एष सविशेषविधेर्विधाने,
श्वेतातपत्ररुचिसम्भृतचारुमूर्तिः ।
देवाऽसुरोरगनरेश्वरसेवितांह्री,
राज्यश्रियं त्रिभुवनस्य दधाति पार्श्वः ॥ ३

नैतादृशस्त्रिभुवने जनताभिनेता,
योगीश्वरोऽपि विबुधाधिपतेः श्रियाढ्यः ।
शैवस्थितं (तिं) वपुषि दर्शयते जिनोऽपि,
ब्रह्मक्रियापरिणतः स्वत एव भास्वान् ॥ ४

राजा द्विभागमदधाद् विविधार्थबोधात्,
क्रोधानुरोधनधियो विरराम कामम् ।
माङ्गल्यमाल्यपरिपूजनया प्रसादी,
शङ्खेश्वरः प्रभुरसौ सुरसौख्यकारी ॥ ५

त्वन्नाम्नि धाम्नि भगवन् ! हरिशङ्कराद्याः,
स्वांशं दधुर्मधुरपूजनहेतवेऽमी ।
तल्लेभिरे फलमलं विमलं त्वदीयं,
ते विश्वपूज्यपदसम्पदमङ्गनाढ्याः ॥ ६

ये चक्रीशक्रकमलापरिभोगमग्नाः,
भूता भवन्त्यभिनवैर्विभवैर्मनुष्याः ।
त्वत्पादपद्मरजसामनुशीलनस्य,
माहात्म्यमद्भुतमिदं जगति प्रतीमः ॥ ७

नामानि यानि जगदुद्धरणाय लोके,
गेयानि तानि किल निश्चिनुमस्तवैव ।
पर्यायवृत्तिविधया सुधया विलिप्ता,
भावा भवन्ति सरसाः स्वरसाद्यथैव ॥ ८

भाग्योदयेन भविनां भगवंस्त्वदीयं,
सन्दर्शनं भवति दुस्तमसां भिदायै ।
भानोर्मरीचिनिचये स्फुरिते समन्तात्,
किं वा न नश्यति तमिस्रविमिश्रितो वा ?॥ ९

त्वन्नायकस्त्वमसि सार्वजनीनबन्धु-
स्त्वं तारकः सकलदुर्जनवारकस्त्वम् ।
नीतस्त्वयाहमियतीमिह वन्द्यभूमिं,
तद्देहि सम्प्रति पदं परमं स्वकीयम् ॥ १०

सिद्धेर्विधास्त्वदभिधा विविधानुभावा-
ल्लक्ष्मीस्त्वदीयपदसेवनयाऽवशेव ।
सम्प्राप्यते तनुभृता निभृता नितान्तं,
कीर्तिस्तदेकसुररत्नमयस्त्वमत्र ॥ ११

नीताः क्षयं रिपुजना जनपूजनाऽपि,
सम्प्रापिता मयि कलाः सकलाः फलाढ्याः ।
सद्योऽनवद्य ! सुरवन्द्य ! विभिद्य माद्यत्-
कर्माणि देहि परमं पदमीश ! मह्यम् ॥ १२

लुप्ताः क्रियास्त्वदुदिताश्चरणस्य दुष्टै-
र्व्यालस्वरूपकलिकालकरालयोगात् ।

एषां पुनर्विमलमार्गमहोदयार्थं,
दुष्कर्मणां कुरु पराकरणं गुरुस्त्वम् ॥ १३

मोहावमोहवशतः शतशोऽन्यदेवाः,
सेवारसादनुगुणा विहिता मया ते ।
तैः काऽपि सिद्धिरभवन्न मनोरथस्य,
तच्चेतसः स्थिरदशा त्वयि मे बभूव ॥ १४

सिद्धप्रसिद्धमहिमा भगवँस्त्वमेव,
देवः सदैव धरणोरगराजसेव्यः ।
विश्वम्भरः शिवकरः करुणैकवृत्ति-
र्विश्वेशिता जनपितामह एव साक्षात् ॥ १५

तेजस्तवाव्ययतरं तरसान्तरारि-
विस्तारिवर्गहनने तरवारिधारिः ।
तस्मात् त्रयीतनुलसत्तनुरेव भासि,
शोभातिरेकवशतः शतमन्युमान्य ! ॥ १६

के के त्वया न भगवन्ननुयायिनः स्वां,
विश्वाधिपत्यकमलां विमलां न नीताः ।
इच्छन्ननन्तसुखभोगमहो मनीषी,
कस्त्वां विमुञ्चति सुरद्रुमरूपमारात् ॥ १७

जेता सहस्रमहसां समहसां प्रतापः,
कीर्त्तिश्च कार्तिकनिशाकरकान्तिकान्ता ।
कान्ता विलासकलना किल वर्द्धमानात्,
त्वद्ध्यानतस्तनुभृतामचिरादुदेति ॥ १८

त्वद्दर्शनान्ननु जनुर्विहितं पवित्रं,
निष्कम्पसम्पदुदियाय जयाय भोग्या ।
आनन्दमञ्जुलदशाऽजनि मामकीना,
लभ्यं मया परिचयात् परमं पदं तत् ॥ १९

चित्ताम्बुजन्मनि मम भ्रमरायसे चेद्,
भक्तिः परं भगवती मयि सानुरागा ।
नित्याष्टधीविभवसिद्धिरसप्रसिद्धिः,
प्राप्ता मया ननु तदा भगवत्प्रसादात् ॥ २०

श्रीशङ्खेश्वरपार्श्वभास्वदुदितज्योतिर्मयश्रीजिनः,
सर्वारिष्टविनाशनः शिवपुरीप्राप्तप्रतिष्ठोदयः ।
देशाधीश्वरवैरिशल्यमहितः सद्भाग्यलक्ष्म्यै सतां,
नूतो वाचकमेघपूर्वविजयाऽभिख्येह्वोऽनेन मेरुध्रुवः ॥(शा.वि.)२१

पू.उपा.श्री मेघविजयविरचितः

## ५. ॥ श्रीरावणपार्श्वनाथस्तवः ॥

(शार्दूलविक्रीडित)

श्रीपार्श्वः प्रकटः प्रभाकर इव प्राज्यप्रभावैभवा-
त्तेजोनन्ततया जगत्त्रयमपि प्रोद्भासयनञ्जसा ।
श्रीमद्रावणनामतीर्थविषये ख्यातस्तमोनाशकः,
स्तुत्यादर्शन निर्मलश्रियमयं पुष्णातु मे नित्यशः ॥ १

श्रीमद्श्रावणमासवत् त्रिजगतीसन्तापविच्छित्तये,
प्रोन्नीताम्बुदगर्भ (वत्स्व) देहविमलज्योतिर्जलैर्विस्तृतैः ।

योो वै रावण मेघवत्सितरुचिश्चिन्तामणी वाग्रणी,
लोकालोक नमो ददान विधिना जागर्तिमूर्त्याविधुः ॥ २

यस्य श्रावणगोचरेपि विचरन्नामापि निर्मापितः,
त्रैलोक्याद्भुतवैभवान् भवभृतां प्रोद्भावयेद्भावतः ।
स श्रीरावणनामधेय भगवान् पार्श्वः सदा सम्पदे,
भूयाद् मङ्गलमालिकाकमलिनी प्रोल्लासभानूदयः ॥ ३

स्पष्टश्चाष्टम एव यः प्रतिहरि र्नाम्नातिधाम्नाहरिः,
पूर्वं रावण एष ते चलनयोः भक्तिप्रसक्तो भवत् ।
ते न त्वत् प्रतिमासमान महिमा कैलाशशैलाशयात्,
निन्येऽर्चारचनैः स्तवादि वचनैः स्वीयं पुरं पावितुम् ॥ ४

जाने तज्जनकात्मजाव्यतिकर प्रोद्धुयमानानया-,
न्मत्वा त्वं ननु भङ्गमेव भगवन्नैतत्स्थले तस्थिवान् ।
सेवार्थं भुवि रावणाख्यनगरं तत्तेन संवासितम्,
पार्श्वे चेन्द्रपथं सुतेन विहितं तेनेन्द्रजिच्छर्मणा ॥ ५

तत्तीर्थं प्रथितं पुराणकथितं त्वत्सञ्ज्ञयैव प्रभो !,
लोकाभ्यर्थनयार्थसार्थयुगपद्दानेन देवार्चितम् ।
श्रीवामेयममेयमेव भवताद् बुद्धिर्भवेत्सेवने,
यस्याश्चक्रिरमा रसेन परमा वश्या भवेदाभवम् ॥ ६

त्वज्जन्मन्यमृतं जगत्समभवद्दुःखोपशान्तेर्जने,
सा कल्याणमयी तदामृतरसैः वृष्टिः सुरैर्निर्मिता ।
विस्तीर्णं जिनशासनं तव गिरा यत्रामृतस्थापना,
लोकेनामृतमस्ति तेन सुलभं देवप्रमादोदयात् ॥ ७

इन्द्रास्त्वज्जनने जिनेन्दु सहसा सर्वे समीयुर्भुवि,
वैरस्यापि विहाय सर्वमसुरा वैरस्यमभ्यैयरुः ।
इन्द्रैरग्निकुमारकासुरगणैः सत्राभवत्सौहृदम्,
नक्षत्रस्य ततो जनेऽजनि कथा देवर्द्धिदैवाख्यया ॥ ८

द्राग्विद्रावणमेति मोहचरटस्ते वीक्षणात्तत्क्षणात्,
नामश्रावणभावसौख्यकरणं विश्वेशितस्तावकम् ।
श्रीमद्रावणपार्श्वमेघविजयाज्ज्योतिर्भवन्मूर्तिजा,
नित्यानन्दपदं ददातु विशदं शैवं च दैवं शुभम् ॥ ९

पू.उपा. श्री जयसागरविजयकृतम्

नवग्रहनामगर्भितम्

## ६. ॥ श्रीनागद्रह-पार्श्वजिन-स्तोत्रम् ॥

धर्ममहारथसारथिसारं, सरससुकोमलवचनविचारं,
सुविरतिसलिलासारम् ।
सिद्धिवधूवक्षःस्थलहारं, केवलकमलालीलागारं,
नागद्रहशृङ्गारम् ॥ १

मारविकारनिवारय(यि)तारं, तारस्वरे(रसु)श्वरगीताचारं
क्षत्रियराजकुमारम् ।
स्फारफणावलिमण्डलधारं, कारं कारं विनयमपारं,
वन्दे देवमुदारम् ॥ (युग्मम्) २

दिवसपतिः प्रतिभयनिस्तारी, चन्द्रश्चारुकलाविस्तारी,
मङ्गल उदयाकारी ।

किञ्च बुधः सुधियामुपकारी, सुरगुरुरामयदोषनिवारी,
शुक्रो विक्रमकारी ॥ ३

कामितमशनैः शनिराधत्ते, राहुर्बाहुर्बलं बहु दत्ते,
केतुः कीर्तिसुखाय ।
तेषां ये जगदीश ! भवन्तं, वामानन्दनमतिशयवन्तं,
मनसि नयन्ति चिराय ॥ (युग्मम्) ४

चारुमहोदयरत्नकरण्डं, भवभयसागरतरणतरण्डं,
खण्डितपरपाखण्डम् ।
श्रीजयसागरकजमार्त्तण्डं, नत्वा वामासूनुमचण्डं,
नन्दत यूयमखण्डम् ॥ ५

पू. उपाध्यायश्री सहजकीर्तिगणिसन्दृब्धः

## ७. ॥ श्रीपार्श्वनाथजिनस्तवः ॥

(शतदलकमलमयः)

श्रीनिवासं सुरश्रेणिसेव्यक्रमं, वामकामाग्निसंतापनीरोपमम् ।
माधवेशादिदेवाधिकोपक्रमं, तत्त्वसंज्ञानविज्ञानभव्याश्रमम् ॥१
(स्रग्विणी)

नव्यनीरागताकेलिकर्मक्षमं,
यं[य] स्य भव्यैर्भजे नाम सम्पद्रमम् ।
नीरसं पापहं स्मर्यते सत्तमं,
तिग्ममोहार्त्ति विध्वंसतापाभ्रमम् ॥ (स्रग्विणी) २

लब्धप्रमोदजनकादरसौख्यधामं,
तापाधिकं प्रमदसागरमस्तकामम् ।

घण्टारवप्रकटिताद्भुतकीर्त्तिरामं,
नक्षत्रराशिरजना[?नी]शनताभिरामम् ॥ (वसन्ततिलका) ३

घण्टापथप्रथितकीर्त्तिरमोपयामं,
नागाधिपः परमभक्तिवशात् सवामम् ।
गंभीरधीरसमतामयमातङ्गमं (?)
मं[?म]र्त्यानतं नमत तं जिनपं निकामम् ॥ (व.ति.) ४

संसारकान्तारमपास्य नाम कल्याणमालास्पदमस्तशामम् ।
लाभाय बभ्राम तवाविरामं, लोभाभिभूतः श्रितरागधूमः ॥ ५
(इन्द्रवज्रा)

कर्मणां राशिरस्तोकलोकोद्गम-
संसृतेः कारणं मे जिनेशावमम् ।
पूर्णपुण्याढ्य दुःखं विधत्तेऽन्तिमं,
र्ण[?न]क्षमस्त्वां विना कोऽपि तं दुर्गमम् ॥ (स्रग्विणी) ६

कार्मणं निर्वृतेर्हन्तुमन्योऽसमः
वं[?य]क्षराट्पूज्य तेनोच्यते निर्मम ।
श्रीपते ! तं जहि द्राग् विधायोद्यमं,
दानशौण्डाद्य मे देहि ऋद्धिप्रमम् ॥ (स्रग्विणी) ७

यस्य कृपाजलधेः विश्रामं कण्ठगताशुसुभटसङ्ग्रामम् ।
भयजनकव्याया...मं, जेतारं जगतः श्रितधामम् ॥ ८

कक्षीकृतवसुभृतपूग्रामं, लापोच्चारमहा....... मम् ।
केशोच्चयमिह नयने क्षामं, लिङ्गति कमला कुरु ते क्षेमम् ॥९

कलयति जगता प्रे.......मं, लम्भयति सौख्यपटलमुद्दामम् ।
कालं हन्ति च गतपरिणामं, मह तं महिमस्तो.......मम् ॥१०

रसंन[?न] येप्सितदानसुरद्रुमं, हितमहीरुहवृद्धिजलोत्तमम् ।
तं[?त]रुणपुण्यरमोदयसङ्गमं, समरसामृतसुन्दरसंयमम् ॥११

हिनस्ति सद्ध्यानवशात् स्म मध्यमं,
तं तीर्थनाथं स्वमतप्लवङ्गमम् ।
सुरासुराधीशममोघनैयमं, रैः नाथ सम्पूजितपद्युगं स्तुमम् ॥१२

संसारमालाकुलचितमादिमं, सा[?शा]स्त्रार्थसंवेदनशून्यमश्रमम्।
रम्याप्तभावस्थितपूर्णचिद्घन,
सर्पाङ्कितः शोषितपापकद्र्दमः ॥ (इन्द्रवंशा) १३

रत्नत्रयालङ्कृतनित्यहेम ! सीमाद्रिसारोपमसत्त्वसोम ! ।
शोभामयो ज्ञाननयं विसामं, षड्वर्ग मां देव विद्येह्यकामम् ॥१४
(इन्द्रवज्रा)

भावविभासकनष्टविलोमं, स्कन्दितकन्दलतं प्रणमामः ।
रङ्गपतङ्गनिवारणसुभीमं,
कम्बुदानं (गलं) जिनप हत ते भौमम् ॥ (दोधक) १५

मन्त्रेश्वरः पार्श्वपतिः परिश्रमं,
लाभाश्रितस्यापनया मनोरमम् ।
कर्मोत्थितं मे जिन साधु नैगमं,
रम्भाविलासालसनेत्रनिर्गमम् ॥ (इन्द्रवंशा) १६

समितिसारशरीरमविभ्रमं, हरिनतोत्तमभूरिगमागमम् ।
श्रयत तं नितमातभुजङ्गमं, फलसमृद्धिविधानपराक्रमम् ॥१७
(द्रुतविलम्बित)

णम्रैर्यशःसृजति शं जिनसार्वभौमः,
तारस्वरेण विबुधैः श्रित... ह्रोंम ।
शोकारिमारिविरहयतवात्तदामं, (?)
भव्यैः स्तुत निहदुर्मतदण्डख... मम् ॥ (वसन्ततिलका) १८

माद्याम्बुजध्वंसविधौ महद्धिमं, न वाजयत्याशुमनस्तुरङ्गमम् ।
मन्त्रोपमं ते जिन राम(?ग) पञ्चमं,
स्तवेन युक्तं गुणरत्नकुट्टिमम् ॥ (उपजाति) १९

कलिशैलोरुव्याधाम-माहात्म्यं हृदयङ्गमम् ।
लब्धश्रितवसुत्रां, यन्तिवर्गस्तुतं नुमम् ॥ (अनुष्टुप्) २०

लोकोत्पत्तिविनाशसंस्थितिविदां मुख्यं जिनं वै स्तुमं,
द्रव्यारक्तसमाधरं नमत भो ! पूजां वरां पाश्चिमम् ।
परपक्षस्य तव स्तवं त्वन्निमित्त करीन्द्रगे
तत्तद्भावमयं वस वदतस्त्रैकाभ्यस्तर्वंदमम् [?] ॥ २१
(शा.वि.)

नयनाननसद्रोमं, सन्तर्ति तव जङ्गम ।
स्थावराशु[?सु] मतां स्याम, [?] नयते शककृत्रिमम् ॥ २२
(अनुष्टुप्)

दासानुदासस्य मम, नवानन्दविहङ्गमम् ।
माद्यति प्राप्य सुप्रमं [?] नंपा [?नया] क्षत्तां महाद्रुमम् ॥२३
(अनुष्टुप्)

क्षमाबोहित्थनिर्यामं, मानवार्च्यं महाक्षमम् ।
गुणिपूज्यं प्रीणयामः, रुंचि [? रुचिं] स्तौमि नमं नमम् ॥२४
(अनुष्टुप्)

स्मरन्ति यं सुन्दरयक्षकर्दमं,
रागात् समादाय महन्ति कौङ्कुमम् ।
मिथो मिलित्वा मबु(?) जाड्यकुङ्कुमं,
चन्द्राननं तं प्रविलौकताद्रमम् ॥ (उपजाति) २५

इत्थं पार्श्वजिनेश्वरो भुवनदिक्कुम्भ्यङ्गचन्द्रात्मके,
वर्षे वाचकरत्नसारकृपया राकादिने कार्त्तिके ।
मासे लोद्रपुरस्थितः शतदलोपेतेन पद्मेनस-
न्नूतोऽयं सहजादिकीर्तिगणिना कल्याणमालाप्रदः ॥ २६
(शा.वि.)

श्रीवामातनयं नीतिलताघन-घनागमम् ।
सकलालोकसंपूर्णकायं श्रीदायकं भजे ॥ (अनुष्टुप्) १

कलाकेलिं कलं कामरहितं सहितं सुरैः ।
संसारसरसीशोषभास्करं कमलाकरम् ॥ (अनुष्टुप्) २

सहस्रफणताशोभमानमस्तकमालयम् ।
लोद्रपत्तनसंस्थानदानमानं क्षमागुरुम् ॥ (अनुष्टुप्) ३

स्मरामि च ।
[शतदलकमलबहिःस्थो लेखः]
ऐं नमः ।

(शार्दूलविक्रीडित)

श्रीसाहिर्गुणयोगतो युगवरेत्यन्थं(न्त्यं) पदं दत्तवान्,
येभ्यः श्रीजिनचन्द्रसूरय इलाविख्यातसत्कीर्त्तयः ।
तत्पट्टेऽमिततेजसो युगवराः श्रीजैनसिंहाभिधा-
स्तत्पट्टाम्बुजभास्कराः गणधराः श्रीजैनराजाः श्रुताः ॥ १

तैर्भाग्योदयसुन्दरैरिषुसरस्वत्षोऽशाब्दे (१६७५) सित-
द्वादश्यां सहसः प्रतिष्ठितमिदं चैत्यं स्वहस्तश्रिया ।
यस्य प्रौढतरप्रतापतरणेः श्रीपार्श्वनाथेशितुः,
सोऽयं पुण्यभरां तनोतु विपुलां लक्ष्मीं जिनः सर्वदा ॥ २

पूर्वं श्रीसगरो नृपोऽभवदलङ्कारोन्वये यादवे,
पुत्रौ श्रीधरराजपूर्वकधरौ तस्याऽथ ताभ्यां क्षितौ ।
श्रीमल्लोद्रपुरे जिनेशभवनं सत्कारितं खीमसी,
तत्पुत्रस्तदनुक्रमेण सुकृती जातः सुतः पूनसी ॥ ३

तत्पुत्रो वरधर्मकर्मणि रतः ख्यातोऽखिलैस्सद्गुणैः,
श्रीमल्लस्तनयोऽथ तस्य सुकृती श्रीथाहरूनामकः ।
श्रीशत्रुञ्जयतीर्थसङ्घरचनादीन्मुत्तमानि ध्रुवं,
यः कार्याण्यकरोत्तथा त्वसरफीं पूर्णां प्रतिष्ठाक्षणे ॥ ४

प्रादात् सर्वजनस्य जैनसमयं चालेखयत् पुस्तकं,
सर्वं पुण्यभरेण पावनमलं जन्म स्वकीयं व्यधात् ।
तेनायं भवनस्य यस्य जिनपस्योद्धारकः कारितः,
सार्द्धं सद्धरराजमेघतनयाभ्यां पार्श्वनाथो मुदे ॥ ५

पू.उपा.श्री कल्याणविजयगणिविरचितम्

## ८. ॥ श्रीअन्तरीक्षपार्श्वनाथस्तवनम् ॥

श्रीश्रीपुराभिधपुरप्रथितावतारं
प्रोल्लासिमुक्तिकमलाहृदि तारहारम् ।
श्रीपार्श्वनाथ ! जिनराज ! मुदा भवन्तं
स्तोष्ये प्रभावभवनं जगतीमवन्तम् ॥ (वसन्ततिलका) १

स्वामिन् ! निर्मलवालुकाकणगणैर्निर्माप्य सम्पूजिता
राज्ञा श्रीखरदूषणेन भवतः श्रीपार्श्व ! मूर्त्तिः पुरा ।
श्रीपुञ्जेन नराधिपेन तदनु श्रीश्रीपुरेऽस्थापि या
सा देव ! प्रतिमा तवेयमनघा दिष्ट्याऽद्य दृष्टा मया ॥ २

(शार्दूलविक्रीडित)

स्वामिन् ! नम्रामरनरपते ! स्नात्रमात्राम्भसा ते-
ऽद्यापि प्रोच्चैः पुर इह दृशो दीप्यते दीप्रदीपः ।
तस्य स्पर्शादपि च सकलप्राणभाजां समग्रा
रोगा यान्ति क्षतिमथ भवेद् भाग्यसौभाग्यलक्ष्मीः ॥(मन्दाक्रान्ता) ३

नश्यत्सर्वातिशयविभवे म्लेच्छमालावकीर्णे
पूर्णे पापैः प्रवहति कलावत्र काले कराले ।
आकाशस्थां तव जिनपते ! मूर्तिमालोक्य के के
नोच्चैर्भूयुर्भविकनिकरा विस्मयस्मेरनेत्राः ॥ (मन्दाक्रान्ता) ४

श्रीमद्वामेय ! देव ! त्रिभुवनजनताचिन्तितार्थप्रदाने
चिन्तारत्नोपमान ! प्रविलसदमलज्ञानसम्पन्निधान ! ।
रागाद्यान् वैरिवर्गान् हृदि कृतवसतीन् दुःखदौर्गत्यदातॄन्
स्वामिन्नन्तं नय त्वं मम चरणधनं लुम्पमानानमानम् ॥ ५

(स्त्रग्धरा)

आधिव्याधिज्वरभरमहादुष्टकुष्टप्रमुख्यान्
रागान् बाह्यानरतिमदनाज्ञानमिथ्यात्वमोहान् ।
अन्तःशत्रूनपि च निखिलांस्त्वां हरन्तं हि दृष्ट्वा
मन्ये धन्वन्तरिरयमगात् क्वापि लज्जां दधानः ॥ ६

(मन्दाक्रान्ता)

भ्रामं भ्रामं समयममितं पूर्वदुष्कर्मयोगा-
ल्लाभं लाभं कुमतिवशतो दुःखलक्षाणि साक्षात् ।
आप्तः प्राप्तस्त्वमिह मयकाऽचिन्तितार्थप्रदाता
शश्वद्विश्वत्रितयजनतात्राणकर्तर्जिनेन्द्र ! ॥ (मन्दाक्रान्ता) ७

रागद्वेषकषायभीषणमहानक्रौघचक्रग्रह-
ग्राहग्रस्तसमग्रविग्रहमृतां दीनारवैर्व्याकुलं ।
संसाराम्बुनिधौ पतन्तमतुलैर्दुष्कर्मभिर्माऽधुना
रक्ष त्वं जगतीजनव्रजपरित्राणप्रभूष्णुः प्रभो ! ॥ (शा.वि.) ८

प्रस्फूर्जत्फणमण्डलीचलमणिश्रेणीसमाविर्भव-
च्चञ्चच्चन्द्रमरीचिसञ्चयपरित्रस्यत्तमोमण्डलः ।
उन्मीलन्नवनीलनीरजदलश्यामाभिरामद्युतिः
श्रेयःश्रेणिमनुत्तरां प्रथय नः श्रीपार्श्व ! विश्वप्रभो ! ॥(शा.वि.)९

लब्धः कामघटः स्फुटं सुरगवी गेहाङ्गणेऽद्यागता
चिन्तारत्नमथोऽचिरात् करतले प्राप्तं चिरत्नैः शुभैः ।
प्राज्यं राज्यमुपार्जितं त्रिजगतां निःशेषसौख्यावहं
यत्तेऽजायत दर्शनं जिनपते ! काले करालेऽप्यहो ॥(शा.वि.)१०

मनोवचः कायविजम्मणैर्भृशं शुभेतरैः पापमुपार्जि यन्मया ।
तन्मे त्वदीयाननपद्मवीक्षणात्
क्षयं क्षणाद् गच्छतु न थ ! सम्प्रति ॥ (उपजाति) ११

अपारसंसारमहाम्बुराशौ दुरुत्तरे बंभ्रमता मयाऽद्य ।
श्रीपार्श्व ! विश्वत्रयबान्धवस्त्वं
लेभे लसत्पोतसमः स्वपुण्यैः ॥ (उपजाति) १२

पचेलिमैः प्राचिकपुण्यपूरैः समुज्जजृम्भे सकलैर्ममाद्य ।
यज्जन्मजातैरपि नैव दृष्टो जिनाधुना दृग्विषयीबभूव ॥ १३
(उपजाति)

नेत्रे पवित्रे विशदा च वाणी करौ कृतार्थौ शुचि मानसं च ।
यैर्वीक्षितो नाथ ! गुणैः स्तुतश्च
सम्पूजितश्चाऽऽरुचि चिन्तितश्च ॥ (उपजाति) १४

कर्माणि दारुणभवार्णवदुःखदानि
क्षीणानि मेऽद्य सुकृतानि तथाऽऽविरासन् ।
अद्यापि मे जिनपते ! शुभभाग्ययोगो
जागर्त्ति यत्तव बभूव पदप्रणामः ॥ (वसन्ततिलका) १५

इत्थं श्रीपुरभूमिशालिललनाभाले ललामोपमः
श्रीमत्पार्श्व ! जिनास्तसर्ववृजिनश्चनद्रोपमाननः ।
भूयो भक्तिभरावनम्रशिरसा नूतो मया भावतो
देहि त्वं निजपादपद्मयुगलोपास्तिं प्रशस्तां मम ॥(शा.वि.)१६
कल्याणावलिमुज्ज्वलां प्रथयतां भास्वत्प्रभावाद्भुतः ॥
इति पाठान्तरे ।

पू.उपा.श्री कल्याणविजयगणिविरचितम्

## ९. ॥ श्रीमगसीपार्श्वनाथस्तोत्रम् ॥

(वंशस्थ)

कल्याणकारं कमनीयसम्पदं जिनेश्वरं सद्गुरुपादपङ्कजम् ।
प्रणम्य सिद्ध्यै महिमोदयं स्तुवे पार्श्वप्रभुं श्रीमगसीविभूषणम्॥१

भवद्गुणानां गणनापि दुःशका जिनेश ! वाचस्पतिनापि धीमता॥
कुतो हि तेषां तदशक्यवर्णना प्रयत्नसाध्या महतां मम प्रभो ! ॥२

तथापि भक्तिस्त्वरयत्यनन्तरा गुणामृतास्वादसमुद्भवा स्तुतौ ।
जिनेन्द्र ! मां कोकिलमाम्रमञ्जरी
स्वादो यथा पञ्चमरागजल्पने ॥ ३

असावपूर्वाचरितो विराजते प्रतापभानुस्तव सन्ततोदयः ।
यशःसुधाधामविभूषितः सदा जगत्रयीसद्व्यवहारकारकः ॥४

समग्रविश्वोद्धरणक्षमो भवाननन्तशक्तिर्ध्रुवमध्यवन्तिषु ।
अधित्वयि श्रीमगसीकृतस्थिता-
ववन्तयोऽपीप्सितसिद्धिसाधके ॥ ५

जगत्त्रयव्यापनतत्परस्य ते प्रतापभानोरतिशायितेजसः ।
सहस्रभानुप्रमुखा इमे सदा
प्रकाशिनोऽशा इव बिभ्रति श्रियम् ॥ ६

तव प्रतापद्युमणिप्रभाभरापहस्तिता हस्तगृहीतविष्टप ! ।
परप्रभावाः स्वपदैकचारिणः कृशाङ्गखद्योतगणन्ति सर्वतः ॥७

त्वदीयपादाम्बुजषट्पदायितैकतानचेतस्कनराः सुवैभवाः ।
तृणावमन्यन्त इहाद्भुतं सुर-
द्रुमादिकं चिन्तितसाध्यसिद्धितः ॥ ८

त्रैलोक्यभत्तुस्तव मङ्गलात्मनोऽप्यनन्तशक्तेः पुरतः स्वभक्तितः।
पूर्वं प्रभाते ननु दर्पणीभवन्निजाधिकारं कुरुते ततो रविः ॥ ९

सुरद्रुचिन्तामणिकामधुग्मरुद्घटादयो वाञ्छितसिद्धिमङ्गिनाम्।
त्वदीयजाग्रन्महिमांशवेशनदिवानिशं नाथ ! वितन्वतेतराम् ॥१०

प्रणेमुषां प्राणजुषां प्रभो ! भवत्पदारविन्दं स्वरसैकभक्तितः ।
चिन्तामणीकामघटादयोऽप्यमी गृहाङ्गणे सन्ति निदेशवर्त्तिनः ॥११

त्वमेव बुद्धोऽसि विदां वरत्वतः
श्रिया श्रितत्वात् पुरुषोत्तमोऽतमाः ।
प्रजापतिस्तत्प्रतिपालनादपि
त्वमीश्वरो विश्वसमृद्धिसेवनात् ॥ १२

शंपोषपौषदशमीदिवसार्हतत्व-
सम्पादकाय निजजन्ममहोत्सवेन ।
श्रीअश्वसेननृपवंशविभूषणाय
नम्रामरेन्द्रमहिताय विभो ! नमस्ते ॥ १३

हृदयकमले ध्येयोऽमेयो गुणर्यतयोगिनां
त्रिदशरमणीगेयोऽजेयोऽपरैस्त्रिजगज्जयी ।
महितमगसीपार्श्वाधीशः सतां जनयन् सुखं
भुवि विजयतां स त्रैलोक्यश्रियां कुलमन्दिरम् ॥ १४

इत्थं निर्भरभक्तियुक्तमनसा भट्टारकग्रामणी-
श्रेणीशेखरहीरहीरविजयश्रीसूरिशिष्याणुना ।
वामाकुक्षिसरोमरालमगसीपार्श्वप्रभुः सन्ततं
कल्याणोदयमातनोतु विजयी देवाधिदेवः स्तुतः ॥ १५

पू. पं. श्री नयविमलगणिविरचितम्

## १०. ॥ श्रीशङ्खपुर-पार्श्वनाथस्तोत्रम् ॥

(शार्दूलविक्रीडित)

ऐन्द्रश्रेणिनतावतंसनिकरभ्राजिष्णुमुक्ताफल-
ज्योतिर्ज्वालसदालवाललहरीलीलायितं पावितम् ।
यद्पादाद्भुतपारिजातयुगलं भाति प्रभाभ्राजितं
श्रीशङ्खेश्वरपार्श्वनाथजिनपं श्रेयस्करं संस्तुवे ॥ १

यन्नामाभिनवप्रभूतसुमहो-धाराधरासारतः
कल्याणावलीवल्लरी कलयति प्रस्फूर्ज्जतां सान्द्रताम् ।
भव्यानां भवदीयपादयुगलोपास्तिप्रसत्तिजुषाम्
श्रीशङ्खेश्वरपार्श्वनाथजिनपं श्रेयस्करं संस्तुवे ॥ २

यद्ध्यानोत्कटचित्रभानुरनिशं नीरोत्करैर्दिद्युते
मुक्तैर्दुष्टशठेन तेन कमठेनाऽनिष्टकृत्कर्मणा ।
स्पष्टं जुष्टफणीफणामणिगणाऽऽश्लिष्टक्रमाम्भोरुहं
तं शङ्खेश्वरपार्श्वनाथजिनपं श्रेयस्करं संस्तुवे ॥ ३

दुर्यवनाधिकवातकम्पितपरप्रौढप्रभावे महत्-
यस्मिन् कालकरालिते कलियुगे कल्पान्तकालोपमे ।
जाग्रच्चारुयशोभिराममलयोद्धुताभितः सौरभं
तं शङ्खेश्वरपार्श्वनाथजिनपं श्रेयस्करं संस्तुवे ॥ ४

श्रीमद्ध्यानविधानतानमनसां भव्यात्मनां भाविनां
यन्नामापि पिपर्ति पुण्यजनितान् कामान् मनोऽभीष्टकान् ।

विश्वाशापरिपूरणाय किमिमं विश्वागतं स्वस्तरुं
तं शङ्खेश्वरपार्श्वनाथजिनपं श्रेयस्करं संस्तुवे ॥ ५

श्रीमत्काप्यविलोकना मम करे स्फूर्जन्महासिद्धय:
सम्प्राप्ता द्युसदामधीशविनुत ! प्राज्यप्रतिष्ठाः पुनः ।
सञ्जाता परमा-रमा सहचरी सौख्यं सदाऽऽलिङ्गितम्,
श्रीमच्छङ्खपुरावतंस ! जिनप ! प्रौढ प्रभावाद्भुत ! ॥ ६

क्षीणाऽज्ञानभरो नतामरनरश्रेणिप्रयुक्तादर:
ध्वस्ताशेषदरस्तमोभरहर: कर्मद्रुमे मुद्गर: ।
लोकोद्योतकर: स्मरज्वरहर: सौख्य-द्रु-धाराधरो
दद्याद् भूरितरप्रमोदनिवहं त्वन्नाममन्त्राक्षर: ॥ ७

नष्टं दुष्टोग्रकर्माष्टककरटिगणैर्निर्गतं क्रोधमान-
प्रोद्यत्पञ्चप्रमादादिकचटुलतरक्षत्किरै: क्रूररूपै: । (स्रग्धरा)
भग्नं पातकजातशाखिनिवहैरापच्छिवाभिर्गतम्
दृष्टेऽस्मिन् भवदीय-दर्शनमहानादे दयायुक् प्रभो ! ॥(शा.वि.)८

ॐकारादिमसिद्धसाध्यमहिमा ऐँकार ह्रीँकारयुक्
मायाबीजसमन्वितो विषहरस्फुलिङ्गनाऽऽश्लेषित: ।
अर्हं श्रीनमिऊणपासकलितस्त्रैलोक्यसौख्याकरो-
भूयाश्च्छ्रीधरणेन्द्रसेवितपद: पार्श्वप्रभुर्भूतये ॥ (शा.वि.) ९

ॐकारप्रथितावदाततरयुक् ह्रीँकारसाराश्रित:-
पद्मावत्यै नमो+ म्लस्व्यु हन(हन)दहता रक्ष रक्षेति युक्त: ।
क्लीँ श्रीँ क्लीँ ह्रौँ... प्रतियति समयं सस्वधामन्त्रबीजम्,-
प्रोद्यद्धामप्रतापान्वितविशदतरस्फारवीर्यप्रचार: ॥ १०

ये जानन्ति जपन्ति सन्ततमभिध्यायन्ति मन्त्रद्विकम् ।
तेषां साम्राज्यलक्ष्मीः, कृतकलनिलया जायते सम्मुखीना ।
ससाङ्गा गाङ्गनीराकृतिविशदयशोराशिरुज्जृम्भतेऽस्मिन्
लोके सम्पूर्णकामोऽमितगुणनिकरस्थैर्यमालम्बते ते ॥ ११

कृत्वाऽलीके च वामेतरभुजयुगले नाभिदेशे सुवत्से
शस्ते हस्तद्वये वा अभिमतफलदं मूर्ध्नि संस्थापयित्वा ।
पार्श्वं शङ्खेश्वराख्यं सुरतरुकरणिं ये जपन्तीति शश्वत्
ते भव्या यान्ति सिद्धिं तनुतरदुरिताः द्वि-त्रिकैः सद्भवैश्च ॥१२
(स्रग्धरा)

पार्श्व ! त्वत्पदपद्मपूजनकृते सत्केतकीनां वने
तीक्ष्णैरुत्कटकण्टकैश्च सततं विध्यन्ति येषां कराः ।
तेषां चारुपतिंवरा व भविनां चक्रित्वशक्रश्रियः
स्वैरं स्थैर्यतया चलत्वरहिता भव्याः भजन्ते प्रभो ! ॥(शा.वि.)१३

आकल्पं जनुषो मयाऽद्य सुतरां जातं प्रशस्योदितः
श्लाघ्यं जीवितमद्य हृद्य सफलं श्रेयानयं स क्षणः ।
जाताकृत्य कृतार्थिनी बहुफला सा धारिका कारिका
सौख्यस्यैव यदीश ! शर्मकृदिदं त्वद्ध्यानमध्यापितम् ॥ १४

लोला त्वद्धुति-लोलुपे तव गुणग्रामाय ते मे श्रुती
नित्यं त्वद्वदनावलोकनजुषी स्वामिन् ! पुनश्चक्षुषी ।
शीर्षं त्वत्पदमण्डनं तव विभो ! ध्यानैकतानं मनो
जातं तन्मम सर्वमेव शुभकृदात्माप्ययं त्वन्मयः ॥ १५

शष्यत्वद्गुणचक्रवालजलधेः पारं न यामि प्रभो !
आत्मीयोत्कटदुष्टदुष्कृतततेर्नो यामि पारं तथा ।

तस्माद्देव ! तथा विधेहि भगवन् ! प्राप्नोमि पारं तयोः
सम्यक्त्वेन विधाय भव्यकरुणां कारुण्यपात्रे मयि ॥ १६

श्रीखण्डागुरुधूपवासनिवहैः कर्पूरपूरैस्तथा
काश्मीरद्रवसान्द्रचान्द्रविहितैः सद्वन्दनैश्चान्दनैः।
स्वामिँस्त्वद्-पदयामलं गतमलं येऽर्चन्ति चर्चाचणाः
लोके लोकिततत्त्वयुक्तहृदयास्तेऽप्यर्चनीयाः सदा ॥ १७

विष्णुस्त्वं भुवनेऽसि भूपतिरसि श्रेयस्करः शङ्करो
धाता सत्त्वमहाव्रती शतधृतिः कालारिरुग्रस्तथा ।
ऋद्ध्या सिद्धियुतः कृतान्तजनको गौरीगुरुस्त्वं सदा
जैनैर्जैनपरैश्च भक्तिभरितैस्त्वं गीयसेऽस्यां भुवि ॥ १८

दुर्ध्यानद्रुमखण्डखण्डनखटादुर्दम्यदन्तावलः
श्रीधीराद्रिमलप्रबोधकमलप्रीतिप्रदानोज्ज्वलः ।
सद्ध्यानप्रबलप्रतापबहुलज्वालावलीधूमल-
ध्वस्ताशेषमलः खलीकृतमलः सिद्ध्यङ्गनाकामलः ॥ १९

मूर्ध्नि स्फारफणीन्द्रजालजटिलोऽक्षुद्रक्षमाकन्दलः
सम्यग्ज्ञानजलप्रवाहपयसाप्रक्षालितक्ष्मातलः ।
धैर्यस्वर्गनगः सुसाधितकलादौर्गत्यवारार्गलः
दत्ताभीष्टफलः पुनाति भुवनं पार्श्वो घनश्यामलः ॥ २०

त्वं मातापितरौ त्वमेव सुगुरुस्त्वं जीवनं त्वं सखा
त्वं त्राता भवसिन्धुमज्जनभयात् तत्त्वं त्वमेवानिशम् ।
त्वं विद्याः सकलास्त्वमेव परमाधारस्त्वमेवेहितं
ज्ञात्वेति प्रभुतां दिशेति भगवन् सर्वार्थसिद्धिप्रदाम् ॥ २१

श्रीशङ्खेश्वरतीर्थभूषणमणे ! श्रीयुक्तपार्श्वप्रभो !
भक्त्यैवं नय पूर्वता विमलयुक् नाम्ना मया संस्तुतः ।
भूयास्त्वं भवभीतिभेदभिदुराकारोपमानः सदा
गीर्वाणद्रुमसन्निभो मम सदा सर्वेष्टसम्पत्तये ॥ २२

स्तोत्रं पवित्रं पठति प्रभाते, पार्श्वप्रभोर्यो मतिमान्नितान्तम् ।
त्रिसन्ध्यमेतत् खलु तस्य सर्वाः,
विद्याः मुखाब्जे विलसन्ति हृद्याः ॥ (उपजाति) २३

पू.उपा.श्री नयविमलगणिविरचितम्

## ११. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥

(पादाकुलक)

श्रीमत्पार्श्वजिनं सारङ्गं, प्रणत जना जिनततिसारङ्गम् ।
वामाकुक्षिसरःसारङ्गं, भविमानसमानससारङ्गम् ॥ १

अश्वसेनकुलजलधिसारङ्गं, संयमितोद्धतहृदयसारङ्गम् ।
वचनमधुरिमाधरितसारङ्गं, निजनिगरणतर्जितसारङ्गम् ॥ २

सुक्षतलतासेचनसारङ्गं, श्वासामोदविजितसारङ्गम् ।
देहकान्तिभर्त्सितसारङ्गं, नयनविनिर्जितवरसारङ्गम् ॥ ३

ज्ञानविभावगणितसारङ्गं, संशयतम(मो)भेदनसारङ्गम् ।
दुर्द्धरकर्मद्विपसारङ्गं, कुगतिकलाचकवं सारङ्गम् (?) ॥ ४

करपदकोमलजितसारङ्गं, प्रमुदितजनवीक्षितसारङ्गम् ।
वपुदित[प्रमुदित]तृषितभविकसारङ्गं,
योगिहृदयपङ्कजसारङ्गम् ॥ ५

निजनासान्यक्कृतसारङ्गं, दानगुणैर्दासितसारङ्गम् ।
निर्जितसज्जनतासारङ्गं, कामितफलदायकसारङ्गम् ॥ ६

उपशमसाररसालसारङ्गं, ध्यानदहनदितसुकृतसारङ्गम् ।
विस्तृतसद्दर्शनसारङ्गं, सुस्वरतातर्जितसारङ्गम् ॥ ७

भ्रूयुगलार्जितसामिसारङ्गं(?), बुधजनसेवितसमयसारङ्गम् ।
स्तुतिमुखरीकृतशचिसारङ्गं, पदयुगनाथितसमयसारङ्गम् ॥ ८

सुरनिकरैर्निर्मितसारङ्गं, दिव्यध्वनिनाहृतसारङ्गम् ।
प्रकटितसद्देशनासारङ्गं, दशनद्युतिमन्दितसारङ्गम् ॥ ९

मङ्गलकमलाकेलिसारङ्गं, नयविमलप्रवचनसारङ्गम् ।
लक्ष्मणदम्भ(म्भा)श्रितसारङ्गं, मञ्जुलमङ्गलरत्नसारङ्गम् ॥१०

इति सारङ्गशब्दार्थैः, संस्तुतः पार्श्वतीर्थपः ।
शङ्खेश्वरपुरोत्तंस-स्तन्यात् मङ्गलमालिकाम् ॥ (अनु.) ११

॥ इति सारङ्गशब्दार्थमयं पार्श्वनाथस्तोत्रं संपूर्णम् ॥

पू. मु. श्री रत्नसुन्दरगणिरचितम्

अष्टोत्तरशतनामनिबद्धजेसलमेरुमण्डनम्

## १२. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(अनुष्टुप्)

श्रीमत्पार्श्वः सुखं कुर्य्यात्परब्रह्मप्रकाशकः ।
परमेष्ठी परेशानः परादित्यः परापरः ॥ १

शुद्धस्फटिकसङ्काशः स्वयम्भूः सर्वतोमुखः ।
अप्रमेयो मनोध्येयो मनोदृश्यः शिवात्मकः ॥ २

ध्यानलक्ष्यो मनःसाध्यः शिवश्रीसौख्यदायकः ।
परमात्मा प्रमोदात्मा परमः परमेश्वरः ॥ ३

जगद्गुरुर्जगन्नाथो योगीनाथः सदाशिवः ।
विश्वेश्वरोऽव्ययो व्यक्तरूपोऽव्यक्तः शुभप्रदः ॥ ४

सर्वगः सर्वदेवेशः सर्वसिद्धिप्रदायकः ।
सर्वदर्शी स्वयंसिद्धः श्रीनिवासः सुधार्णवः ॥ ५

सर्वज्ञः श्रीकरः स्वामी सर्वविघ्नहरोऽरुजः ।
व्योमाकारस्वरूपोऽनः सर्वदेवमयो जिनः ॥ ६

भगवान् सर्वसत्त्वेशः सर्वतीर्थमयः शिवः ।
सर्वव्यापीश्वरः सर्व-कामदः परमाक्षरः ॥ ७

सर्वसत्त्वहितः शान्तः शरण्यः सकलोऽकलः ।
लोकालोकमयोऽलक्ष्यो निर्विकल्पो निरामयः ॥ ८

नित्यधर्मो निर्विकारो निराकारो निरञ्जनः ।
साकारो निर्ममोऽनन्तो भूतेशः पुरुषोत्तमः ॥ ९

सुरज्येष्ठः सुरेन्द्रोऽर्हन् परप्राणः सनातनः ।
ॐकाराकृतिः परमः शङ्करः परमार्थदः ॥ १०

ब्रह्मद्वयप्रकाशात्मा निर्भयो बोधिदो विभुः ।
दिव्यतेजोमयो देवदेवः शान्तस्त्रयीमयः ॥ ११

तत्त्वमूर्त्तिः सर्वात्मैको नेकोऽनाद्यस्त्रिकालवित् ।
परमानन्ददः परमशक्तिस्तीर्थकरप्रभुः ॥ १२

परमेन्दुश्चिदानन्दामयस्तीर्थङ्करोऽनघः ।
आद्य आप्तो ध्रुवः सार्वोऽचलोऽचिन्त्यो महाव्रती ॥ १३

सर्वोत्कृष्टः स्फुरद्रत्न-निधानस्य जगद्गुरोः ।
दिव्यमष्टोत्तरं नाम शतं पार्श्वजिनेशितुः ॥ १४

ये पठन्ति प्रतिप्रातः पवित्रीभूय पूरुषाः ।
तेषां मङ्गलमालाः स्युः सुविशालाः पदे पदे ॥ १५

यक्षराक्षसवेतालशाकिनीडाकिनीमुखाः ।
सुरामिथ्यादृशोऽन्येऽपि भूचराः खेचराः परे ॥ १६

दौष्ठवं सम्परित्यज्य भजन्ते सौष्ठवं सदा ।
येषां कण्ठे स्थिता पार्श्व-नाममालास्त्यहर्निशम् ॥ १७

अपुत्री लभते पुत्रा-न्निर्द्धनी लभते धनम् ।
असुखी सुखमाप्नोति पार्श्वनामस्मृतेर्न्नरः ॥ १८

इत्यस्तवीज्जेसलमेरुमण्डनं
पार्श्वं सदा सङ्कटकोटिखण्डनम् ।
वर्म्माङ्गजातं वरभक्तिसुन्दरः
सर्वर्द्धिगेहं गणिरत्नसुन्दरः ॥ (इन्द्रवंशा) १९

पू.मु.श्री उदयवीरगणिविरचितम्

## १३. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(अनुष्टुप्)

जय श्रियो निधे ! स्वामिन्नश्वसेननृपाङ्गज ! ।
नम्रामरशिरोभृङ्गसङ्गचङ्गपदाम्बुज ! ॥ १

अद्य मे सफलं गोत्रं नेत्रे च विमलीकृते ।
स्नातोऽहं धर्मकृत्येषु जिनेन्द्र ! तव दर्शनात् ॥ २

अद्य मे सफलं जन्म प्रशस्तं सर्वमङ्गलम् ।
भवार्णवं च तीर्णोऽहं जिनेन्द्र ! तव दर्शनात् ॥ ३

अद्याहं सुकृतीभूतो विधूताशेषकिल्बिषः ।
भुवनत्रयपूज्योऽहं जिनेन्द्र ! तव दर्शनात् ॥ ४

अद्य मे कर्मणां जालं विधूतं सकषायकम् ।
दुर्गत्या विनिवृत्तोऽहं जिनेन्द्र ! तव दर्शनात् ॥ ५

अद्य मे सफलं देहम् अद्य मे सफलं बलम् ।
नष्टानि विघ्नजालानि जिनेन्द्र ! तव दर्शनात् ॥ ६

अद्य नष्टो महाबन्धः कर्मणां दुःखदायकः ।
सुखसङ्गः समुत्पन्नो जिनेन्द्र ! तव दर्शनात् ॥ ७

अद्य मिथ्यान्धकारस्य हन्ता ज्ञानदिवाकरः ।
उदितो मच्छरीरस्य जिनेन्द्र ! तव दर्शनात् ॥ ८

तव स्तवननिध्यानध्यानैरजनि निर्मलम् ।
वक्षश्चक्षुर्मनो मेऽद्य वीतराग ! नमोस्तु ते ॥ ९

पू.मु.श्री उदयवीरगणिविरचित-

पार्श्वनाथचरित्रान्तर्गतमश्वसेननृपकृतम्

## १४. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(अनुष्टुप्)

एकः पुरुषसिंहस्त्वं मोहमत्तेभनिग्रहात् ।
इतीव विदधे नाथ ! सिंहासनमिदं सुरैः ॥ १

रागद्वेषमहाशत्रु-जयोत्थयशसी इव ।
चक्राते चामरे शुभ्रे पक्षयोरुभयोस्तव ॥ २

ज्ञानदर्शनचारित्रराज्यं त्वय्येकतां गतम् ।
अतस्तेषामिवैषा ते मूर्ध्नि च्छत्त्रत्रयी स्थिता ॥ ३

चतुर्धा दिशतो धर्मं चतुर्मुख तव ध्वनिः ।
दिव्यश्चतुर्दिशं जातः कषायानिव घर्षितुम् ॥ ४

मन्दारादीनि पुष्पाणि पञ्चधा देशनाभुवि ।
किरन्ति तव पञ्चाक्षजयतोषादिवामराः ॥ ५

शाखाशिखरमूलैः षट्दिग्गतैः शंसतीव ते ।
षण्णां जीवनिकायानां रक्षां कङ्केल्लिरुल्लसन् ॥ ६

दग्धसप्तभयैधस्त्वात् सप्तार्च्चिः सममप्यदः ।
धत्ते भामण्डलं नाथ ! त्वत्सङ्गादिव शैत्यताम् ॥ ७

भूत्वा (भ्यां) दुन्दुभिरप्युच्चैर्ध्वनन्नष्टासु दिक्ष्वसौ ।
अष्टकर्मरिपुव्रातविजयं शंसतीव ते ॥ ८

प्रातिहार्यश्रियं मूर्तामन्तरङ्गां गुणश्रियम् ।
इत्थं दृष्ट्वा मनो नाथ ! कस्य न स्यात्त्वयि स्थिरम् ॥ ९

पू.मु.श्री शिवचन्द्रगणिविरचितम्

# १५. ॥ पुष्पाञ्जलि-स्तोत्रम् ॥

केवललोकितलोकालोक-सकलवसुगुणपर्यायते,
दरभरकर-संसारमहा-मकराकरतारण-तरणरते ! ।
परमानन्दनन्दन ! प्रमदानन्दनवल ! विबुधपते !,
जय जय हे जिन ! जगदानन्दन ! वामावन्दन ! विश्वपते ॥ १

त्रिभुवनशङ्कर ! सकलसुरासुरनरवरनिकरैर्विहितनुते !
भव्यकमलकमलाकरबोधनवासरकर-करनिकरकृते ! ।
शठतामठ-दुर्द्धरकमठासुरमदतरुभञ्जननित्यगते !,
जय जय हे जिन ! जगदानन्दन ! वामावन्दन ! विश्वपते ! ॥२

विकटिक-जन्तुविटपिकट-मोहमहोद्भटसुभटकटकमिलिते,
करटिघटोत्पाटनप्रकटीकृतवीर्यसटोत्कटहरिणपते ! ।
जय जिनचन्द्र ! निजक्रमणाम्बुज-प्रणत-भक्तजनकृतसुमते !,
जय जय हे जिन ! जगदानन्दन ! वामावन्दन ! विश्वपते ! ॥३

नीलकमलदलससलिलजलधरकाञ्चनगिरिवरकरणद्युते !,
मददवजलदोरगपतिपूजितपदपङ्कजराजमरालगते ! ।
तीर्थकराद्भुत-गरिमावगणितगिरिवरसुरगिरिराजधृते !,
जय जय हे जिन ! जगदानन्दन ! वामावन्दन ! विश्वपते ! ॥४

हे चिदानन्दघनकन्दसलिलसुमहानन्द ! विशद-वितते !,
पद्मानन्दवृन्दमकरन्दास्वादनमधुकरहतकुमते ! ।
सुरललना-नटनेऽपि वशीकृतदुर्जय-सकलकरणचिकृते !,
जय जय हे जिन ! जगदानन्दन ! वामावन्दन ! विश्वपते ! ॥ ५

अयि विमलाचल !
केवल-कमला-लीला-निलय ! दलय ! दुरितं,
वितरत रामे सुषमाशालं मङ्गलमालां मां त्वरितम् ।
विनिमग्नं भवजलधौ तारय गुरुतर-पातक-दर-भरितं,
जय जय हे जिन ! जगदानन्दन ! वामावन्दन ! विश्वपते ! ॥६

त्वयि पार्श्वेश ! विश्वविश्वेश्वरताभर्तरि यो नारमते,
पापतापसंहर्तरि मङ्गलकर्तरि गुणधर्तरि शमिते ।
अनवद्यां स जिनेन्द्रचन्द्र वन्द्यां परमात्मदशां भजते,
जय जय हे जिन ! जगदानन्दन ! वामानन्दन ! विश्वपते ! ॥७

तव जिनचन्द्र ! वचन-सुर-तरुवरभङ्गमिभीभूयारभते,
योवदु(?)यावदनन्तकालमनाधिसमाधि-धनाधिपते ।
भव-दीपाङ्कुर-ज्वलन-ज्वालायां स शलभतामालभते,
जय जय हे जिन ! जगदानन्दन ! वामावन्दन ! विश्वपते ! ॥८

सुशरच्चन्द्रविशद-सुयशो-विमलीकृतसकलविश्ववितते,
वचन-परशु-विच्छिन्न-भव्य-जन-व्यसनविततिकुगतिव्रतते ।
जय निजमुखशिवचन्द्र-सुवर्द्धित समजन-नयन-चकोररते,
जय जय हे जिन ! जगदानन्दन ! वामावन्दन ! विश्वपते ! ॥९

(कलश)

अश्वसेननन्दनपदवन्दनममृतपदेदनमातनुते (?),
यः पुष्पाञ्जलिना ह्यमुना धृतहृदय-विमलभावः सुमते ! ।
स स्वं मङ्गलनिलयं पातक-विलयं मुक्तिलयं कुरुते,
जय जय हे जिन ! जगदानन्दन ! वामावन्दन ! विश्वपते ! ॥१०

पू.उपा.श्री शिवचन्द्रगणिविरचिता

# १६. ॥ चिदानन्दलहर्याख्या अध्यात्मचत्वारिंशिका ॥

(श्रीवामानन्दन-जिनेन्द्र-स्तुतिः)

यकः संसाराम्भो-निधि-तरण-तारण्य-तरणि-
स्त्रिलोकीभव्यानां दुरित-तिमिर-ध्वंस-तरणिः ।
अनन्त-ज्ञाना-विष्कृत-विमल-गो-ब्रह्मसरणिः,
स च श्रीपार्श्वेशस्त्रिभुवन-विजेता विजयताम् ॥(शा.वि.) १

(शिखरिणी)

यकः प्राक् सञ्जातः शठकमठसन्दुष्टकुतपोऽ-
जनि स्फारापारोन्नतमदगिरिच्छेदकुलिशः ।
सदा प्रातीहार्योल्लसदतिशयैश्वर्य्यकलितः,
स पार्श्वाधीशोऽयं भवतु भवतां मङ्गलकरः ॥ २

भवारण्यातङ्कक्रमपवनवह्निर्भवदव-
ज्वलज्ज्वालामालाविपुलघनमालाप्रतिनिधिः ।
गलत्कामो वामोदरवरदरीदन्तिदमनः ।
स पार्श्वेशः पायाद् व्यसन-पततो भव्यभविनः ॥ ३

समस्तत्रैलोक्यान्तरसुभृतसुव्यापिगतिना,
कुमत्याः पित्रा वै सकलघनकर्म्माधिपतिना ।
अचिन्त्यात्मैश्वर्य्यं स्मरणज-मदोन्मत्त-मतिना-
ऽन्यदा ध्यातं चित्तेऽतिकुटिल-महामोहपतिना ॥ ४

अहो ! यादृक् शक्तिर्म्मयि परिवरीवर्त्ति सुतरां,
न तादृक् चाऽन्यस्मिन्निखिलजगदानन्ददददद(रे?) ।
अतो मत्सादृश्यं नहि परिदधत्कोऽपि भुवन-
त्रयेऽहं त्रैकाले जगति विजयै विश्वविजयी ॥ ५

समीक्षध्वं शक्तिं मम सवयसो भो मतिभृतो,
महाजैनेन्द्राणां त्रिभुवनविभूनां मघवताम् ।
पुनश्चक्र्यादीनां हरिहरविधीनामपि मया,
महीयांसो जीवाः शृणुत हि पुराऽनन्तसमयम् ॥ ६

महाकारागार-प्रतिनिभ-निगोदादिकुगतौ-
महादुःखानन्तोत्कट-निगड-कोटीषु पतिताः ।
कृताः सन्तस्तस्थुर्द्युतिलघुतराणामसुमतां,
तदाऽन्येषां पापाकुल-मतिमतां कापि गणना ॥ (यु.) ७

अपारे संसारे शुभतर-निगोदादिकुगति-
स्वरूपे निःसारे विगतततपारे रतिकरे ।
महातङ्कागारे व्यसनततिधारेऽनवरतं
महाकारागारेऽमृतपदमहानन्ददददरे ॥ ८

पुनर्भव्याभव्यद्विविधपदपर्य्यायकलिता,
अनन्तानन्ता वा गुरुतरमदादेशनिरताः ।
अनन्तानन्तैर्यद्घनदुरितपाशैर्दृढतरै-
रनन्तानन्तैर्वा निजनिजप्रदेशेषु भविनः ॥ ९

मया बद्धा गाढं विविधभवभीतिव्यसनिनः
कषायाग्निज्वालावलिभिरवलीढाः सुविहिताः ।

सदा सन्तिष्ठन्ते शृणुत समतिष्ठन्त विबुधाः,
पुनः सङ्ख्यास्यान्ते विविधविकलावस्थितिमिताः (त्रिभि.)१०

सकामाकामाभ्यां निरुपपदकाभ्यामतिभृशं,
जराभ्यां स्फाराभ्यां प्रचुरतरकर्म्माणि पुरुह(?) ।
क्षयं नीत्वा भव्या समितनृभवाः केचिदमला-
स्तु केषां मध्यानां झटिति च विनिःसृत्य कुगतेः ॥ ११

ततो मत्तो भीता अरमुपगता जैन-सविधिं,
जिनेन्द्रस्तांस्त्रस्तान् स्वनिकटगतान् वीक्ष्य सदयः ।
स्ववाण्या वक्रोक्त्या समितसुमतीन् कारितसम-
स्त-कर्म्मारिध्वंसान् परमचरणे योगिगुणगान् ॥ १२

अनादौ भूते भाविनि च समनन्ते भवति च,
त्रिकाले दुष्प्रापं निरुपममहानन्दनगरम् ।
महाभव्यं नव्यं विभयमचलं द्रागगमयन्,
सदृज्वा गत्या वा सपदि गमयिष्यन्ति नितराम् ॥ १३

तितीर्षन् संसारं झटिति गमयन्तीह चरितं,
तदैतद् दृष्ट्वाऽयं भवति हि भवो भव्यविरही ।
अमुष्यारिव्यावा विपुलतरचिन्ताकुलतया,
महामोहेनैवं मदनपुरतश्चिन्तितमहो ॥ १४

विहायान्यत् कृत्यं स्मर शृणु मदुक्तं व्यतिकरं,
य एते गीर्वाणाः परमविभवैश्वर्य्य-कलिताः ।
समस्ता इन्द्राद्या हरि-हर-विरञ्चि-प्रभृतय-
स्तथाप्यन्ये सृष्टि-स्थिति-प्रलय-कर्तृत्वनिरताः ॥ १५

त्रिलोक्याः सम्पूज्याः सकलजगतां वल्लभतमा
इमे त्वेतादृक्षा अपि मम महाज्ञानुचरिणः ।
अहं चित्ते नित्यं मम भवतु योगो नहि कदा-
प्यमीषां ध्यायामि स्फुटतरवियोगः सवयसाम् ॥ १६
(द्वाभ्यां सम्बन्धः)

पुनर्ये संसारस्थितिपरमवृद्ध्यर्थमुररी-
कृतव्यापारास्ते मम परममैत्रीमुपगताः ।
मया प्रागत्रापि स्फुटविविधभोगैः सुखकरै-
र्मनोऽभीष्टां नीता घनतरसुपुष्टिं सुरवराः ॥ १७

अतस्ते मन्वाना उपकृतिमिमां मे बहुतरां
मयि स्नेहौत्सुक्यादपि रुचिरनिर्वाणपदगाः ।
भवे वारं वारं समवतरणं संविदधते
मम स्फीत-प्रीति-प्रतति-ततितां पल्लवयितुम् ॥ १८

इमे ये जैनेन्द्रास्त्रिभुवनजनैर्वन्दितपदा
महान्तो विज्ञाना सकलभुवनव्यापियशसः ।
भृशं लोकालोकप्रगटनपरा विश्वविदिता
महादेवा आसन्निखिलजगतां पालनपराः ॥ १९

मया पूर्वं नानाविधललितलावण्यविजिताऽ-
मरस्त्रीसौन्दर्यस्वयुवतिविलासैर्न्निरुपमैः ।
तथैवान्यैर्भोगोद्भवसुखभरैः सम्प्रति कृता
महाभक्तिस्त्वेषां तदपि मम तन्त्रं नहि गताः ॥ २०

अतोऽमी तीर्थेशा वरगुणमहान्तोऽपि सुधियः
कृतघ्नाः सञ्जाताः कुत उपकृतिं मे गुरुतराम् ।

अरं विस्मृत्याऽनुत्तरशिवपदं जग्मुरभयं
विधायाऽस्य द्राग् मे मम निखिलसैन्यस्य निधनम् ॥ २१

ये भूता भवभाविनो हि बहुशः संवर्तमानास्तके
संसारोद्गमिता अनन्त-भविनो भव्यात्मनो निर्वृतिम् ।
भव्यानन्तजनैर्विहीनमिमकं सङ्कर्तुकामा भवं
ह्येते सर्व्वजिनेश्वरा मम महाप्रत्यर्थिनः सन्त्यतः ॥(शा.वि.)२२

समस्तं त्रैलोक्यं लघुतर-कनिष्ठाङ्गुलिजया
सुकोट्या प्रोत्पाट्यान्तरमलमलोक सुतराम् (?) ।
विभुः पार्श्वेशोऽयं गमयितुमरं नेतरहरि-
र्ह्यतोऽनन्ता शक्तिर्भगवति दरीदृश्यत इति ॥ २३

अचिन्त्यैषां शक्तिर्गुरुतरमहावीर्य्यधरणा-
दजय्या एतेऽतो जिनवरनियुक्तस्य भवता ।
निरोधः कर्त्तव्यो जिनपयतिनां मुक्तिसरणे-
रतस्संसारोऽयं न भवति सखे ! भव्यवियुतः ॥ २४

इति श्रुत्वा वाचं धृतमदमहामोहनृपते-
स्तदेवं सज्जोऽभूज्जलधितनयासूनुरभयः ।
समस्तत्रैलोक्यान्तरगतसमग्रामनगर-
स्त्रियो गण्याचिन्त्याद्भुतललितलावण्यकलिताः ॥ (यु.) २५

अनङ्गव्याप्तात्माऽखिल-सुर-नर-स्वान्त-हरिणाऽ-
पकर्षाभेद्याच्छेद्यघनतरपाशप्रतिनिभाः ।
इमा याः सन्तीह प्रियललितवक्षःस्थलजयो-

स्तकासां सौन्दर्याद्‌भुतकनककुम्भोपमितयोः ।
भुजाजङ्घाजेत्रोदरवरशरच्चन्द्रवदना-
दिमां गोपाङ्गाग(ङ्ग?) प्रकरवृतयोश्चित्तहरयोः ॥ २६

(षट्पदं काव्यम्)

सुदुर्ल्लङ्घ्यस्फूर्जत्कुचशिखरिणोस्तुङ्गतरयो-
र्गभीरायां नाभीरुचिरदर्य्यां पुनरसौ (?) ।
कृतावासो वासः कुगतिजभयानामसुमतं
महाभिल्लाभासोऽमृतसुललनालिङ्गनरतीन् ॥ २७

सुवामावामाभ्रूधनुषि हि समारोपितनिजे-
रितस्त्रीदृग्बाणावलिसमभिघातार्द्दितहृदः।
शुभध्यानव्याप्तोल्लसदुपशमश्रेण्युपगतां-
स्तथा तत्राप्येका दशमगुणगाञ्जैनयतिनः ॥ २८

शुभक्षान्त्याद्युद्यद्दशविधसुवाचंयमतमो-
ल्लसद्धर्म्माधारान् सुविमलचतुर्ज्ञानगुणिनः ।
धियाऽधीतोदाराम्बुनिधिदशपूर्वानपि तदा,
ह्यधस्तात्सम्पात्याहमहमिकयोऽनन्तगुणितान् ॥ २९

अपार्द्धं देशोनं निरुपम-महापुद्‌गलपरा-
ह्यवर्त्तं कालत्वादिति गदितानन्तगुणतम् (?) ।
महातङ्कैर्घोरान्नरकगतितोऽनन्तगुणिता-
तिघोरा सातौघावलि-समुचितान् पाप-कलितान् ।
महाभीतित्रस्तान् कुमतिनिरतान् सञ्चरिकरां
चकार प्रायातान् पुनरपि निगोदादिकुगतौ ॥ (ष.कु.)३०

अपीदृक्षं कामं पुनरपि महामोहसुभटं,
समूलं संहत्याऽखिलविकटकर्मारिकटकम् ।
क्षणेनैव प्राप्योज्ज्वलकलचिदानन्दघनतां,
समक्षेत्रोदाराविदरमकरं लोकशिखरम् ॥ ३१

सुगत्याग्रेगण्याचिरतरसमश्रेणिगतिना,
सुभाजेन्दुः प्रापामृजुसरणिना मुक्तिनगरी ।
विभूतिं सम्भूतिं त्रिभुवनमहैश्वर्य्यविवते-
श्चिरं पार्श्वेशोऽयं भवतु शिवतातिस्त्रिजगताम् ॥ ३२

मुदा ॐ ह्रीँ अर्हं नम इति महामन्त्रसुपदाऽ-,
ध्यानं ध्याये जगदधिपपार्श्वेशितुरलम् (?) ।
स्वसद्भक्त्यासक्तो भगवदतिभक्तोऽनवरतं,
त्रिलोकाधीशानां गुणगरिमभूतिं स भजते ॥ ३३

सङ्ख्यातीतमहानदीनविमलाम्भोराशिरूप्यात्मको-
दारस्फारमसीभिरुत्तरमहावीर्य्यप्रतापोद्भटाः ।
दिव्याऽचिन्त्यसुशक्तिपङ्क्तिकलिता दिव्यप्रभाभासुराः,
सङ्ख्यातीतसमायुषः सुविलसद्देवीविलासान्विताः ॥(शा.वि.)३४

ये भूता यदि भाविभो(नो)ऽपि च भवन्तोप्यत्र कालत्रये-
तोऽते भाविनि सम्भवत्यपि तदा सम्भूय सात्यद्भुताः ।
रङ्गद्गाङ्गतरङ्गरङ्गसुमिलच्चञ्चच्छरच्चन्द्रिके-
नालोकां विलसद्गुणावलिमनन्तानन्ततां बिभ्रतीम् ॥(शा.वि.)३५

जानद्भिर्भगवद्भिराननकजेनावाच्यरूपामपि,
लोकसमस्तपुष्करदले नात्र ह्यनन्ते मले (?) ।

शश्वत्ते लिलिखुर्ल्लिखन्ति नितरां कृत्यं विमुच्याखिलं,
लेखिष्यन्ति तथापि ते हि सकला भावा व्रजन्तोऽव्ययम् ॥३६
(शा.वि.)

पारं न प्रययुः प्रयान्ति न तदा यास्यन्ति नो कर्हिचित्,
तस्यास्ते मयकाह मन्दमतिना स त्वं कथं स्तूयसे ।
योगीन्द्रैरपि चारुवाङ्मनसयोर्वालक्ष्यरूपोद्यतः,
स्वस्य स्वच्छविरूपकेवलचिदानन्दात्मकत्वादलम् ॥(प.कु.) ३७
(शा.वि.)

सदा विश्वव्याप्तोऽखिलकुमतविध्वंसकरणा-
ष्टमस्थस्वर्भानोरघतिमिरभानोर्भगवतः ।
प्रशस्तस्याद्वादोद्धतवचनतन्त्रीकृतज[ग]त्-
त्रयस्याग्रेगण्याऽमरशिखरिधीरत्वविजितः ॥ ३८

समस्ताधि-व्याधि-व्यसन-निधियादोनिधिविधि-
प्रपाने पीताब्धिप्रतिनिधिरुदाराय सुलभः ।
प्रसादोऽमन्दारामरमणिसुगीर्वाणसुरभी-
समानो वो भूयान्मम सपरिवारस्य सततम् ॥ ३९

चिदानन्दलहर्य्याख्या स्तुतिरेषा जिनेशितुः ।
आचन्द्रार्कं च बोभूयात्स्थायिनी मोददायिनी ॥ (अनुष्टुप्)४०

समाधिप्राग्भारामृतजलधिवेलाम्बुजननि,
मुदा स्पृष्टा येनोज्ज्वलतरचिदानन्दलहरी ।
महातापं छित्त्वा निविडतरकर्मौघजनितं,
महानन्दानन्दातुलविपुलशैत्यं स भजते ॥ (यु.) ४१

मुदोपाध्यायेनेत्थमिति शिवचन्द्रादि गणिना,
स्तुतिस्त्रक् सन्धार्य्या वरनिगरणे भव्यमतिभि : ।
सदौदार्य्यस्फूर्जद्द्विविधवरवर्णावलिलसत्-
स्वयम्भूस[च्च?] श्चचद्गुणमणिगणैः संविरचिता ।
कृपाम्भोधेर्म्मायाक्षितिसुहलपार्श्वेशितुरियं-
स्तुतस्यासङ्ख्येयैर्व्विविधविबुधेन्द्रैः क्रमनतैः ॥ ४२

(षट्पदं काव्यम्)

(कलशः)

भवसिन्धुवद्र्धनचन्द्रिकोपम-कुमतितापसुचन्दनः,
समभक्तिभर-निर्भरपुरन्दर-निकर-विरचितवन्दनः ।
घनकुशलकारी दुरितदारी सकलजगदभिनन्दनः,
स भवतु भविनां भक्तिमनसां जननिवामानन्दनः ॥ ४३

पू.मु. श्री उदयधर्मगणिप्रणीतम्

## १७. ॥ श्रीजीरापल्लिपार्श्वनाथस्तवनम् ॥

(वंशस्थ)

सुधाशनक्ष्माधरधीर ! जीरिकापुरीपुरन्ध्रीमृगनाभिपुण्ड्रक ! ।
अयं जनःपार्श्वविभो ! विभावरी
विभुप्रभान् भासयते भवद्गुणान् ॥ १

अमेय ! वामेय ! जिनेश ! नेशते
सुरासुरा अप्यखिलास्तव स्तवे ।
क्व तत्र मादृक्षजनस्य मूढता-
युतस्य विस्फूर्तिमियर्ति शेमुषी ? ॥ २

तदप्यमन्दप्रमदप्रकर्षतः
प्रभो ! गुणाणूंस्तव कांश्चन ब्रुवे ।
सधर्मतां संश्रयते रजोऽपि किं
न भानुभानुप्रकरप्रभावतः ? ॥ ३

न दृश्यते नाथ ! तवातनुस्तनुः
प्रभाप्रभावः पुनरद्भुतावधिः ।
महातमो हन्त्यणुरप्यथांशुमान्
महस्विमाहात्म्यमहो महत्ततः ॥ ४

श्रितेषु सर्वेषु सुरेष्वदृश्यतां
जिनेश ! जागर्ति भवान् प्रतापवान् ।
तपे हि तापेन सरस्सु निर्जली-
कृतेषु वारान्निधिरेव गर्जति ॥ ५

स्थलेऽनलेद्धे मकराकुले जले
वने घने चापि महारणे रणे ।
त्वदीयनाम स्मरतां सतां सतां
न जातु भीतिर्भुवि बोभवीति वै ॥ ६

कठोरचोरस्फुटसङ्कटोत्करे
स्वसद्मनीवाध्वनि यात्रिका जनाः ।
अपायमुक्ताः प्रचुरं चरन्ति यन्-
महान् प्रतापः खलु तावकः सकः ॥ ७

स कासकण्डूश्वयथुक्षतभ्रमि
स्फुरन्मरुत्पित्तकफज्वरादिभिः ।

नरो न रोगैरधिपाभिभूयते
शरण्य ! यस्त्वां शरणं प्रपद्यते ॥ ८

न तस्य दस्यूरगवारिवारिधि-
द्विपद्विपद्वेष्यहितानलादयः ।
भवन्ति भीत्यै भयभीत् त्वमीश ! यन्-
मनोऽम्बुजे राजसि राजहंसवत् ॥ ९

पिशाचदुर्मुद्गलवानमन्तरा महोरगा राक्षसयक्षकिन्नराः ।
परेऽप्यसद्दृष्टिसुरास्तव क्रमा-
श्रितान् न हन्तुं प्रभविष्णुविक्रमाः ॥ १०

भयङ्करा भिल्लभरैर्धनुर्धरैः
सुदुर्गमा कर्कशकर्करोत्करैः ।
अलङ्घनीया गिरिकूटकाटिभि-
र्विसङ्कटा कण्टकितैस्तरूच्चयैः ॥ ११

अपीदृशी त्वत्पदपद्ममण्डिता
बलातुलैर्वैरिबलैरखण्डिता ।
सुभूरभूत् पल्लिरियं पुरीनिभा
सतां हि सङ्गः शुभसम्पदां पदम् ॥ (यु.) १२

सदा त्वदास्यद्युतिसारसागरे
सुवृत्तमुक्तोपमदन्तसन्ततौ ।
सन्नेत्रमीने फणभृत्फणामणि-
प्रभाः प्रवालाङ्कुरवद् विरेजिरे ॥ १३

प्रभा भवत्यञ्चति धीरताखिला
श्रयत्यपि श्रीः कलयत्यलं कला ।

इर्यति मुक्तिर्न चिरात् तमादरात्
प्रयासि यस्य त्वमिह प्रसन्नताम् ॥ १४

एवं पन्नगराजराजितपदं पद्मावतीपूजितं
जीरापल्लिपुरीपुरन्दरमहं पापच्छिदेऽस्तग्रहम् ।
संस्तुत्योदयधर्मभासनपरं श्रीपार्श्वतीर्थङ्करं
नाथे नाथमिदं तदङ्घ्रियुगले चेतो ममालीयताम् ॥ १५

(शार्दूलविक्रीडित)

पू.आ.श्री पार्श्वचन्द्रसूरिशिष्य-

पू.मु.श्री रत्नचन्द्रगणिविरचितम्

## १८. ॥ श्रीगौडीपार्श्वनाथ-स्तोत्रम् ॥

स्वस्ति श्रीपदमद्भुतं सुकृतिनामानन्दसन्दोहदं
मुक्तिस्त्रीरमणं त्रिलोकशरणं कारुण्यकल्पागमम् ।
संसारार्णवलङ्घने गुरुतरे निष्णातनिर्यामकं
वन्दे वीतभयं प्रसिद्धसमयं श्रीगोडिपार्श्वं जिनम् ॥ १

(शार्दूलविक्रीडित)

(भुजङ्गप्रयात)

स्फुरत्स्फाररोचिःकलापाभिरामं
जगज्जालजञ्जालदावानलाभम् ।
प्रभावोद्धुरं बन्धुरं स्वर्वराणां,
भजे पार्श्वपार्श्वं प्रभु गौडिपार्श्वम् ॥ २

यदीया यशोराजहंसी हसन्ती सुधासिन्धुशोभा सती सञ्चरन्ती।
नमन्नाकनागाधिपैर्गीयमाना भजे पार्श्वपार्श्वं प्रभु-गौडिपार्श्वम् ३

लसत्तारहारावलीलम्बिनीनां कणत्किङ्किणीमेखलाझङ्कृतीनां,
गणैः सादरं स्वर्वधूनां समर्च्ये
भजे पार्श्वपार्श्वं प्रभु-गौडिपार्श्वम् ॥ ४

यदीयः प्रतापः प्रतिष्ठां प्रयातः सहस्रांशुलज्जामसावातनोति ।
महीयान् प्रकाशो यतो विश्वलोके
भजे पार्श्वपार्श्वं प्रभु-गौडिपार्श्वम् ॥ ५

अपायादपैति स्मरन्नाम घोराद्यदीयं जनो भूतले भूतिभूतम् ।
जितो येन चिन्तामणिर्यन्त्रमुख्यः
भजे पार्श्वपार्श्वं प्रभु-गौडिपार्श्वम् ॥ ६

सुधासारणिं भक्तिमत्सूद्गिरन्तं शरत् कालशुभ्राभ्रमूर्तिवहन्तम् ।
दयालुं दलन्तं महाजालकन्दं ।
भजे पार्श्वपार्श्वं प्रभु-गौडिपार्श्वम् ॥ ७

यदि स्वान्तपारं प्रयातुं प्रयत्नो
भवाब्धेस्तदा गौडिपार्श्वाय नित्यम् ।
नमस्कुर्वतस्ते पुनर्नात्रपातो
भजे पार्श्वपार्श्वं प्रभु-गौडिपार्श्वम् ॥ ८

हृदि स्याद्यदाभीष्टधुग् यस्य पार्श्व-
स्तदा तस्य किं कल्पवृक्षैः पुरोगैः ।
किमर्थं पशुः कामधेनुर्वराकी
भजे पार्श्वपार्श्वं प्रभु-गौडिपार्श्वम् ॥ ९

अष्टकमनुपममरचन्मन्त्रपदेनापि गुम्फितं गुणिना,
यो जानाति स विद्वान् रत्नेन्दुर्ज्जीवताच्छतं शरदाम् ॥(आर्या)१०

पू.मु.श्री रत्नहर्षवाचक विरचित:

## १९. ॥ जेसलमेरमण्डनश्रीपार्श्वनाथस्तव: ॥

(चतु:षष्टिदलकमलबन्ध:)

परम मङ्गल राजित संचरं, रसिकलोकनतक्रमसुन्दरम् ।
मतिवितर्जित वि... ...........................॥ १

........................ विनिर्ज्जितभास्करम् ।
परमितेतरसौख्यगुणाकरं, रहितमावरणै:..........संवरम् ॥२

महदयं सदयं प्रतिवासरं, मेयसारं, मज्जत्सुरासुरनरव्रजदत्तपारम्।
नीतिप्रतीतिगुणरञ्जित-यत्यग्निमंसमितिगुप्तिदयात्म ।
................ तयोगिवारं, गर्जद्गिरं प्राप्तदशावतारम् ।
प्रतापसंतर्जितनव्यसूरं, धाराधराभं दितपापचौरम् ॥ ४
(उपजाति)

नम्रानेकवि .................... लीलाधरम् ।
श्रीशं सद्गुणराजिनिर्जित विधात्रीशानविश्वंभरम् ।
जिह्वाकोट्यनुदीर्घमाणमहसं लोकाग्रतामं ...
................मिरं देवेशदत्तादरम् ॥ ५

रागविषापहागरुडोद्गारं, जङ्गमनिर्जराण्यनुकारम् ।
सूक्तसमर्पितजनताधारं....................... ॥ ६

सूतोपमं दृषर–स्यकृतोपकारं, रिष्टापवर्जितमुखकृतपुण्यपूरम् ।
चन्द्राननं गुरुमनन्तमपास्त वि..., कव्यादि.. . सुहितंविदारम्॥७

वर्णितसूक्ष्मनिगोदविचारं, तिग्ममहत्तपसंविदुदारम् ।
भिक्षुपतिं प्रथम व्र......रं नु, ................. ताव्यवहारम् ॥८

तत्त्वरुचिं निर्वृतिभर्त्तारं, भक्तपञ्चजन सुखकर्त्तारं,
नयमणि पारावारम् ।
सा..ज्ञात... भाण्डा... जित कमठ विकारं, स्थिरमद्यपंकासारम्॥९

सत्पुण्यपण्यविपणिसकलंकितारं, जीर्णस्फुट... लसद्विहारम् ।
नोद् घकृताखिलजगत्कलुषापहारं,
धात्रीधवप्रणतपक्वजयुग्मतारम् ॥ ११

रत्नत्रयाढ्यं शिववृक्षकी, ................ णमवासतीरम् ।
श्वः शंखकुंदरजनीपतिहारहीर–देवावदातयशसंभुवनैकवीरम् ॥१२

वंदारुस्त्रिदशेशमौलिविहितोद्द्यो....................
...............मतं सदनेकमङ्गलगृहं प्रोद्भूतपुण्यांकुरम् ॥
साराङ्गं धरणेन्द्रपूजितपदं नीरागता तु.................. रम्,
रथ्यांदायकभात्प्ररूपमजितं यो.................... ॥ १४

प्रणमाम्यपवर्गकजभ्रमरं, नतनागरलोकततिं विदुरम् ।
मद्–पर्वतशात... दुरं, तिलकं त्रिजगच्छिरसि प्रवरम् ॥ १५

इ...................... दिने जगच्चिविदिरसेन्दु वर्षे ।
श्रीपेशले जेसलमेरु कोट्टे, तिरस्कृतस्वर्ग्गिपुरीमरट्टे ॥ १६

एवं देवेन्द्रसंख्यैः कमल दल ... सुकाव्यैः,
श्रीमच्छ्रीपार्श्वनाथः प्रकटतरयशा संस्तुतो वीतरागः ।
भूयाच्छ्रीरत्नसारक्रमणविहितदृग्रत्नहर्षप्रसत्त्या,
श्री.................. र्भविकसुरमणिबोधिबीजस्य दाता ॥१७

पू.मु.श्री रत्नहर्षवाचकविरचितः

## २०. ॥ जेसलमेरमण्डनश्रीपार्श्वनाथस्तवः ॥

(द्वात्रिंशद्दलकमलबन्धः)

श्री पार्श्व जिनेश्वर प्रणमउ धरि उल्हास,
अद्भुत दहदिसि जसु जसवास ।
माता जिम पूरइ पुत्र तणी सवि आस,
सुप्रसन हुउ साहिब द्यउ मुझ लीलविलास ॥ १

त.................. इं धन दिन धन ए मास,
समतारस-पूरित मूरति पुण्यप्रकास ।
तरुणी-तरुणीगण देखि न पाम्यउ त्रास,
तसु पाय नमं... ...............क नास ॥ २

विषमा अरि जुडिया नही तिलभर अवकास,
हिलि हिलि स्वर पूर्यउ धरणीनइ आकास ।
.................षण ज... ण चित्ति विमास,
जे वांका वयरी ते पिण थायइ दास ॥ ३

समरंतां नासइ रोग भगंदर खास,
लहि[यउ]घरि ल.................. दर आवास ।

मेटइ दुःख दोहग दुरगति दुष्ट प्रवास,
रूसइ नवि तूसइ जउ को करइ विणास ॥ ४

दस ........ ....रतर ............... अभ्यास,
यतिवर कमठासुर देखी थयउ उदास ।
सम घनन वरसाव्यउ आव्यउ जल आनास,
दर ......................... तुझ पास ॥ ५

यतिवर तसु खंदइ कीधउ पद-विन्नास,
स्तवना करि वलि-वलि गावइ जिनगुण रास ।
वीत ... ..............................स,
तिणि पापी सुरनउ थयउ निष्फल आयास ॥ ६

श्री जिनवर पाए लागि करइ वेखास
................................ साहिब तूं माहर ............।
..........मियइ तुझ पाए तूं सुतरू संकास
मुझ नइ पिण तारउ जिम स ............... वास ॥ ७

निरमलतइं साहिब ......................... ।
मी गुण उज्जल जि हवउ फटिक आरास ।
दउलति तुझ दरसण सहु को द्यइ साबास ।
रंगइ अवधार ...................... ॥ ८

इम आदि प्रभुवर पास (कलस) जिनवरं कमलदल बत्रीस ए।
श्री नगर जेसलमेरु, णसु थुण्यउ जग
....................[वा] चक रत्नहर्ष सुहामणा,
श्रीसार तासु विनेय प्रणमइ पाय परमेसर तणा ॥ ९

वाचनाचार्यश्रीवल्लभगणिविरचितम्

## २१. ॥ तिमिरीपुरीश्वरश्रीपार्श्वनाथस्तोत्रम् ॥

समस्यामयं

श्रीपार्श्वनाथजिनपं तमहं स्तवीमि,
दृष्ट्वा यदीयवरधारिमवर्द्धनत्वम् ।
स्थूलोन्नतोऽपि जनमानसमुत्सुमेरुः,
शैलो बिभर्त्ति परमाणुसमत्वमेषाम् ॥ (वसन्ततिलका) १

वामेय सर्व्वीयमहं स्मरामि, त्रैलोक्यलोकम्पृणवर्ण्यवर्णम् ।
धर्मोपदेशावसरे यदास्यचन्द्रो हि पृथ्व्यामुदितो विभाति ॥ २
(इन्द्रवज्रा)

यस्तर्हि पश्यति मुखं सुषमं प्रभाते,
निःस्वोऽपि पार्श्वजिन ! जायत इन्दुरौकाः ।
मूकः प्रजल्पति शृणोति च कर्णहीनः,
पङ्गुश्च नृत्यति विभातितरां कुरूपः ॥ (वसन्ततिलका) ३

श्रीपार्श्वनाथः सततं करोतु, श्रेयांसि भूयांसि नताङ्गभाजाम् ।
यत्कीर्तिनक्षत्रलसत्तरङ्गैर्देदीप्यते व्योमतले समुद्रः ॥ ४
(इन्द्रवज्रा)

पार्श्वप्रभो ! त्वं तिमिरीपुरीशं, ध्यायंश्चिरं घातिकुकर्म हत्वा ।
ज्ञानौषधं प्राप विलासि तस्मादन्धो जगत् पश्यति दर्शरात्रौ ॥५
(इन्द्रवज्रा)

प्रणतः सततं कुरुते स्तवनं, महनं च यकस्तव देवनरः ।
कुशलं कमलामरुजं च शिवं, लभते लभते लभते लभते ॥६
(तोटक)

पापानि नाशय भवान्तरसञ्चितानि,
स त्वं जिनेश ! रचयाशु च मङ्गलानि ।
यत्सद्विशुद्धयशसः स्फुरतस्त्रिलोक्यां,
सोमश्चिरेण शुशुभे खलु नीलमूर्तिः ॥ (वसन्ततिलका) ७

प्रापूयते नम्रसुरेन्द्रमर्त्यैर्दिवस्पृथिव्योरथ पार्श्वनाथः ।
यदीयगाम्भीर्यगुणाग्रतो वै, दधाति सिन्धुः सुरभीपदाभाम् ॥८
(उपजाति)

समवसरणमध्यासीनसन्नाष्टकर्मन्,
प्रहतकुमतिमान त्वत्पदाभ्यर्चनार्थम् ।
जिनवर ! सुरनागैरागते रागवद्भिः,
शुभभुवि भुवि दृश्येते द्युपाताललोकौ ॥ (मालिनी) ९

स्वः सिन्धुपानीयसमानराजद्युष्मद्यशोमञ्जुलमण्डलाल्या ।
विस्तारवत्या नभसा तदातर्देदीप्यते चन्द्र इवोष्णरश्मिः ॥१०
(इन्द्रवज्रा)

श्रीपार्श्वनाथस्स ददातु मङ्गलं, स्फूर्जद्यशोभिर्गुरुभिर्यदीयकैः ।
क्षीराम्बुनिध्यन्तरशुभ्रिमोपमै-
र्देदीप्यते रूप्यनिभं हि कज्जलम् ॥ (इन्द्रवंशा) ११

इत्थं श्रीपार्श्वनाथः शमयमवितदुर्मन्मथो वल्गुमार्गे,
मुक्तिश्रीपत्तनासो भ(र्भ?)वतु भुवि विशां भावुकानां प्रदाता ।

स्फूर्जत्छ्रीपाठकज्ञानविमलसुगुरूपास्तिरक्तेन भक्त्या,
धीमच्छ्रीवल्लभेन स्तुतकृतवचसा सत्समस्यास्तवेन ॥ १२
(स्रग्धरा)

वाचकश्रीवल्लभगणिविरचितम्

## २२. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(द्रुतविलम्बितम्)

जिनवरेन्द्रवरेन्द्रकृतस्तुते, कुरु सुखानि सुखानिरनेनसः ।
भविजनस्य जनस्यदशर्मदः, प्रणतलोकतलोकभयापहः ॥ १

अविकलं विकलङ्कमुनिः शिवं, विगतमो गतमोहभरः क्रियात्।
विनयवन्नयवन्नृभिरर्चितः प्रमददो मददोषमलोज्झितः ॥ २

मुनिजने निजनेमियुजा मुदं, वितरतातरता च भवाम्बुधिम् ।
अविरतं विरतं स ददातु शं, शिवरमावरमापि हि येन वै ॥३

कलिकुमार्गकुमार्गमहामृगद्विपरिपोऽपरिपो परमं पदम् ।
वित(व)रमे वरमे चरणाम्बुजे, रतिमतोऽममतो महितस्तव ॥४

सुरगुरूपमरूपमनोहरैः, प्रवरधीभिरधीभिरसंयुतैः ।
अभिनुतो भवतो भवतोऽवताज्जिनवरोमररोमरकापहृत् ॥ ५

असुमतः सुमतः शुभतीर्थपः सुमहसोऽमहसोज्झितमाधुपः ।
विदितजातिरऽजातिरतिः श्रियं, वितनुतात्तनुतामलदीधितिः ॥६

सकलमुत्कलमुत्पललोचनं नमत तं मततन्त्रमगः प्रदम् ।
मुनिजना निजनायकमादरादसितरुक्सितरुक्करुणापरम् ॥ ७

सुकविराजिविराजितपर्षदाश्रितमसन्तमऽसन्तमसंश्रिया ।
भजत मालतमाल समुद्युतिप्रचुरमर्त्यरमर्त्यपहं गुरुम् ॥ ८

भुजगचिह्नममन्दममन्दकं, चतुरसादरसादरमानकम् ।
भृशममन्दतमन्दतरांहसं, वसुमती तमतीतरसं भजे ॥ ९

मुनिपतेरमृतेरमृतेशितुश्चरणमक्षयमक्षयदं सदा ।
अरितहन्तुरऽहन्तुरसाश्र्ये वितरसोदरसोदरसङ्गरे ॥ १०

भववृषाय वृषायतसंयमः, शुभवतो भवतो नवदो मम ।
सुखकृते खकृते विदितावधे,
विमलधीमलधीरिमयुग्विभो ! ॥ ११

सुतनुभाऽतनुभा तनुभावुकं, वृजिनहृज्जिनहृत्कमलार्यमा ।
सततमाततमाननृपार्चितो, विजयदो जयदोहदपूरकः ॥ १२

सुमहितानि हितानि वचांसि यः, श्रुतिवशन्तवशन्तनु पार्श्वराट् ।
नयति तस्यतितस्य च दुर्विशं,
नरवरः स्तवरस्तमसोज्झितम् ॥ १३

इत्थं स्तुतो यो यमकस्तवेन, वामाङ्गजः पार्श्वजिनो जनानाम् ।
भूयाद्विभूत्यै विभुताप्रशस्तः, श्रीवल्लभेनार्चितपादपद्मः ॥ १४

(इन्द्रवज्रा)

पू.मु. श्री पूर्णभद्रगणिकृतम्

## २३. ॥ अष्टप्रातिहार्यगर्भितपार्श्वजिनस्तवनम् ॥

(स्रग्धरा)

छत्रं भेर्यंशुबिम्बं प्रवरमणिमृगेन्द्रासनं चामरे द्वे,
सद्वाणी पुष्पवृष्टिर्बकुलतरुरमीभिस्स्तुवे पार्श्वदेवम् ।
रेजे यस्यातपत्रं शरदिजरजनीजानिबिम्बोपमानम्,
भेर्याकाशे रसन्ती जिनमुखवचनं श्रोतुमाह्वास्त दूरात् ॥ १

पृष्ठे भामण्डलोऽभाद्गगनमणिरिवोद्दामधामा सुवृत्तो,
रत्नस्वर्णीननाथासानवरमशुभन्मेरुवतु(त्तु?)ङ्गशृङ्गम् ।
गङ्गासिन्धुद्वयं वा शितचमरयुगं सेवितुं देवमागाद्-
वाणीवीणेव वाणीश्रवणशुभसुधास्यन्दिनी सज्जनानाम् ॥ २

ताराभाः पञ्चवर्णसदसि सुमनसोऽभ्रादभुर्नाकिमुक्ताः,
मूर्द्धन्युच्चैरशोकोऽभिनवदलफलैः नृत्यतीव प्रमोदात् ।
पार्श्वः पश्चानुपूर्व्याःस्तुत इति भगवानष्टभिः प्रातिहार्यै-
र्भव्येभ्यः पूर्णभद्रैर्गणिभिरतिनुतः पूर्णभद्रं ददातु ॥ ३

पू.मु. श्री कुशललाभविजयरचितम्

## २४. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

ॐ ह्रीँ श्रीँ धरणोरगेन्द्रमहितश्रीसप्तभोगोल्लसन्-
माणिक्यावलिकान्तिसञ्चयदिनध्वान्तप्रतापप्रभुः ।
श्रीवामोदरचारुपङ्कजवनीमार्तण्डबिम्बायते,
विघ्नश्रेणिनिमन्थनो विजयते श्रीपार्श्वनाथो जिनः ॥ १
(शार्दूलविक्रीडित)

ॐकारैः ह्रीँकारैः श्रीँकारैर्वर्णसङ्घातैः ।
हृत्पुण्डरीकपीठे स्मरन्ति श्रीपार्श्वतीर्थकरम् ॥ (आर्या) २

ध्यायन्ति स्फुटिकश्वेतमभिप्रेतं परं पदम् ।
ह्रीँकारश्रीँवशीकारचतुरं श्रीपार्श्वतीर्थकरम् ॥ ३

लभन्ते कमलामर्द्धि सिद्धि वृद्धि सुपुत्रताम् ।
प्राज्यं राज्यं कलत्रं च सम्यक्तत्त्वं सुनिश्चलम् ॥ (अनुष्टुप्) ४

निःशेषमन्त्राक्षरचारुमन्त्रं, श्रीपार्श्वतीर्थेश्वरनामधेयम् ।
सदा स्मरामः प्रभुदा महामः,
प्रीत्या नमामः कुशलं लभामः ॥ (उपजातिः) ५

पू.मु.श्री ज्ञानप्रमोदगणिकृतम्
सुवर्णगिरिमण्डन-

## २५. ॥ श्रीपार्श्वनाथस्तवनम् ॥

विमलगुणनिधानं केवलश्रीप्रधानं
सकलसुखविधानं ज्योतिरर्च्यं दधानम् ।
दुरितभिदवधानं श्रेयसां सन्निधानं
जिनमुपसमधानं नौमि पार्श्वाभिधानम् ॥ (मालिनी) १

भविक कुमुदचन्द्रस्त्यक्तदोषो वितन्द्र
प्रमद दम समुद्र पुण्य पद्मा सुभद्र ।
प्रणत सुरनरेन्द्र सौख्यकारी जिनेन्द्रो
जयति नति दयार्द्रस्तर्ज्जितानङ्ग मुद्र ॥ (मालिनी) २

अश्वसेनावनीनाथ रम्याङ्गजं
पन्नगाधीश पद्माश्रितां हृ(द्व)यं भुजम् ।
तत्त्वधीसौदधी पानु कारं सदा
भव्य सत्त्वा विभु संश्रियध्वं मुदा ॥ (स्त्रग्विणी) ३

इन्द्रनीलङ्गवर्णं निरंहस्ततं
वासवाचार्य वाचामगम्य स्तुतम् ।
त्वांसिमाराधयन्ति त्रिसन्ध्ययके
पार्श्व धन्याह्यूपास्तान्यकृत्पास्तके ॥ (स्त्रग्विणी) ४

सत्य विद्या तपः श्री प्रणेताप्रधी
रुग्र वंशांबरा हर्मणि धीरधी ।
पार्श्व नाथो जनै नम्यते .. म
प्राग्विलीनाथि मिथ्या तमो विभ्रम ॥ (स्त्रग्विणी) ५

द्राग्भवाब्धिव्वुडज्जंतु पोतोपमः
कोपथिध्व.....विद्धं स पूषोत्तम ।
काम मुत्फुल्ल पद्मानन: पारग
पार्श्व यक्षार्च्चितस्त्वं जयां को रग ॥ (स्त्रग्विणी) ६

वामोदरोदार–सरोमरालं
तीर्थाधिराजं सुयशो विशालम् ।
ध्यायन्ति ये त्वां परमात्मरूपं
भव्या लभन्ते प्रभुतास्वरूपम् ॥ (इन्द्रवज्रा) ७

गीर्व्वाण धे ... कुं ... काम प्र ... नांत्वद ।
भावै विश्व पूजातिसया ...................... ॥ ८

.. र जनन व्रत केवल श्री सिद्युत्स वागल.. सुश्री ।
लोक नयी ? प्रमद वृन्द सुख प्रदानि
कुर्याज्जिनो भविनृणां स समीहितानि ॥ (वसन्ततिलका) ९

गाढं सठोग्र कमठोरु तपो तिधर्म्म
निर्म्माथ पाथ उत भाषित–शुद्धधर्म्म ।
स्फूर्ज्जित्फणामणि विभा विशथी कृतास
पार्श्व प्रभुर्जयति सर्व्व जगत्प्रकास ॥ (वसन्ततिलका) १०

परमं पुरुषं नवहस्ततनुं
भगवन्तमनन्तगुणं सुततुम् ।
नत पूरित काम म काम मिनं
प्रयताः कृतिनो भजतार्य जिनम् ॥ (तोटक) ११

कनकाद्रिपुरा तुल चैत्य रमा
वर भूषण पार्श्व निरस्त तम ।

सकलानि मनोभिगतानि सतां
किल पूरय विश्वपते ! सुकृताम् ॥ (तोटक) १२

इत्थं सुवर्णगिरि-मण्डन-पार्श्वनाथो
भक्त्या श्रुतं सभविनां महिमा सनाथ ।
श्रीरत्नधीरसुगुरो-रणुभावतस्तु
ज्ञानप्रमोदगणिना प्रभुता प्रदोस्तु ॥ (वसन्ततिलका) १३

पू.मु.श्री पद्मराजगणिविरचितम्

## २६. ॥ श्रीपार्श्वनाथ-लघु-स्तोत्रम् ॥

(भुजङ्गप्रयात)

समानो ! समानोऽसमानोऽसमानो,
महेलाऽमहेला महेला महेला ।
सिताराऽसितारासितारासितारा-
वधीरावधीरावधी रावधीरा ॥ १

गमाभागमाभागमाभागमाभा-
गभीरो गभीरोऽगभी रोऽगभीरो ।
गवीरा गवीरागवीरागवीरा-
ऽसुधा मासुधामा सुधामासुधामा ॥ (यु.) २

घनाभाघनाभाऽघनाभाघनाभा
कलापं कलापं कलापंकलापम् ।
गदाभोगदा भोगदां भोगदाभो,
दितानन्दितानं दितानन्दितानं ॥ ३

महा वामहावाऽऽमहावा महावा-
गतारं गतारंगतारं गतारं ।
समाया-समायाऽसमायाऽसमाया-
भवेशं भवे शंभवेशं भवेशम् ॥ (यु.) ४

क्षमारक्ष मारक्षमा रक्षमार !,
प्रभाव प्रभावप्र भाव प्रभाव ।
परागोऽपरागोपरागोऽपरागो-
वदाताऽवदातावदाताऽऽवदाता ॥ ५

इत्थं मया परमया रमया प्रधान-
स्तोत्रं पवित्रयमकैर्विहितं हितं ते ।
पार्श्वप्रभो ! त्रिभुवनाद्भुतपद्मराज-
दिन्दीवरच्छवितनो ! वितनोतु सातम् ॥ (वसन्ततिलका) ६

पू.मु. श्री सङ्घविजयगणिप्रणीतम्

## २७. ॥ श्रीपार्श्वसप्ततीर्थीस्तवनम् ॥

ॐ नत्वा जिनमण्डलीसुरगवीमिष्टार्थसम्पादनीं
स्मृत्वा सद्वरदायिनीं भगवतीं श्रीसारदां सारदाम् ।
ऐँ क्लीँ मन्त्रपदैर्मुदा मुनिजनध्येयां नमद्दैवतां
झौँ स्वाहाक्षरसंयुतैः सुखकरीं श्रीसप्ततीर्थीं स्तुवे ॥(शा.वि.)१

जयति नमदनेकाखण्डलश्रेणिमौलि-
प्रकटमणिमयूखोद्योतिपादारविन्दः ।
भुवनविदितनामा ध्येय 'शङ्खेश्वरो' ऽयं
दुरितहरणपार्श्वः पार्श्वनाथः प्रसिद्धः ॥ (मालिनी) २

वन्दे श्रीअणहिल्लपत्तनपुरालङ्कारहारोपमं
श्रीपञ्चासरपार्श्वनाथमनघं प्रौढप्रभावास्पदम् ।
ॐ ह्रीँ श्रीँ धरणेन्द्रसेवितपदं विश्वत्रयीमण्डनं
विघ्नव्राततमःप्रसारमथने पाथोजिनीवल्लभम् ॥ (स्रग्धरा) ३

वीजापुरस्थितमहं प्रणमामि नम्र-
श्रीपार्श्वयक्षमतुलातिशयैकगेहम् ।
वैरोट्यया स्तुतपदं जिनपार्श्वनाथं
पद्मावतीहृदयपङ्कजचञ्चरीकम् ॥ (वसन्ततिलका) ४

श्रीभीडभञ्जन इति प्रथिताभिधानः
श्रीपार्श्वसार्वमुकुटो जयमश्नुते स्म ।
कंसारिनामनगरावनिभासमानः
प्रध्वस्तदुःखदुरितो हतविघ्नवृन्दः ॥ (वसन्ततिलका) ५

श्रीगोडीपुरनायकं त्रिभुवनप्रत्यूहविध्वंसकं
साधुश्रेणिसरोजवासरमणिं सम्पत्तिसम्पादकम् ।
भेजे भक्तसमस्तदुःखदलनं निःशेषदर्पापहं
कल्याणद्रुमसेचने जलधरं वामेयतीर्थाधिपम् ॥ (शा.वि.) ६

श्रीमन्तं वरकाणपार्श्वमवनीख्यातं भजे भक्तितो
वामाकुक्षिसरोजशोणचरणं श्रीअश्वसेनात्मजम् ।
दुष्टव्यालविषान्धकारहरणे स्निग्धं सरोजन्मना-
मर्हन्तं ग्रहशाकिनीनरपतिस्तेनादिभीतिच्छिदम् ॥(शा.वि.) ७

श्रीमन्मालवदेशभूमिललनाभालस्थलीभूषणं
सेवेऽहं मगसीश्वरं जिनपतिं पार्श्वं प्रमोदप्रदम् ।

आदिव्याधिविनाशकं सुरवरध्येयं मनःपङ्कजे
दुष्टम्लेच्छनृपोत्थकष्टहननं कल्याणलीलालयम् ॥(शा.वि.) ८

सप्तैतानि समस्तसंयमवतां तीर्थानि विघ्नं जवात्
विश्वत्राणपराणि दैत्यविभुना निघ्नन्तु निर्मापितम् ।
एतत्कृत्यविधौ विलम्बमधुना कुर्वन्तु तीर्थानि नो
किं ध्वान्तौघविनाशने दिनपतिः कुर्याद् विलम्बं क्वचित् ? ॥९

सत्तीर्थसप्तकमिदं भुवि सर्वतीर्थ-
मुख्यं जगत्त्रयविपत्तिविनाशहेतुः ।
विघ्नं छिनत्तु सुरराजकृतं ...
सन्तो भवन्ति परकार्यकृतौ हि दक्षाः ॥ (वसन्ततिलका) १०

विराजमानं वरमन्त्रवर्णैः श्रीसप्ततीर्थीस्तवनं सदैव ।
सूर्योदये ये सुधियः स्मरन्ति भवन्ति ते भूरिविभूतिभाजः ॥११

स्वकण्ठपीठे बिभराम्बभूवुर्ये सप्ततीर्थीस्तवहारवल्लीम् ।
स्फुरत्प्रभावस्फुटरत्नरम्यां तदङ्गणे क्रीडति कामधेनुः ॥ १२

देयादियं विजयसेनमुनीन्द्रशिष्य-
शिष्यस्य सङ्घविजयस्य सुसप्ततीर्थी ।
दुष्टाष्टभीतिकजराजिहिमांशुलेखा
सानन्दमङ्गलसदोदयसिद्धिवृद्धिम् ॥ १३

इत्थं सप्तभयापहारनिपुणा श्रीसप्ततीर्थी स्तुता
सप्तद्वीपसमस्तजन्तुहितकृत् सप्ताब्धिकीर्त्तिस्थितिः ।
यावत् सप्ततुरङ्गमो जलरुहां प्रीतिं विधत्तेऽशुभि-
र्जीयात् तावदियं विपत्तिदलना सा सर्वभव्यात्मनाम् ॥ १४

पू.मु.श्री धर्मवर्द्धनगणिविरचितम्

समसंस्कृतमयम्

## २८. ॥ श्रीपार्श्वनाथलघुस्तवनम् ॥

(वसन्ततिलका)

संसारवारिनिधितारकतारकाभ,
डिण्डीरहीरसमसत्तमबोधिलाभ ।
आतङ्कपङ्कदलनातुलवारिवाह,
वामेयदेव जयभिन्न भवोरुदाह ॥ १

जानामि कामित करं तव नाम देव,
तेनाऽऽगतोऽहमिह पादसरोरुहे ते ।
मां माऽवहीलय गुणालय सद्दयालो,
सन्तो भवन्ति निपुणा हि परोपकारे ॥ २

मोहारिभूमिरुहभङ्गमतङ्गजाय,
संछिन्नतुङ्गसमनोज मनोजवाय ।
मायाविवादिकुवलालिन वारुणाय,
भूयो नमो भवतु ते जिननायकाय ॥ ३

वामाङ्गजं दरभरागगजं भजन्ते,
ते जन्तवो नव-नवोदयतां लभन्ते
भूमीरुहो हि समयामलयं वसन्तो,
गच्छन्ति किं न शुभचन्दनतां समेऽपि ॥ ४

इत्थं सदैव समसंस्कृतशब्द शोभं,
यः पापठीति मनुजः स्तवनं यशोभवे ।

स व्रीयते विजयहर्षसुखं सलीलः,
पार्श्वेशितु स्मरणतः शुभधर्मशीलः ॥ ५

पू.मु.श्री धर्मवर्द्धनगणिविरचितम्

## २९. ॥ श्रीपार्श्वजिनलघुस्तवनम् ॥

(वसन्ततिलका)

विश्वेश्वराय भवभीति निवारणाय
सन्ताप-पादप निवारण वारणाय ।
सत्यक्तमाय सजलाम्बुदनीलकाय,
तुभ्यं नमोऽस्तु सततं जिननायकाय ॥ १

सम्मोहमारुतसुरेशधराधराय ।
मुक्त्यङ्गनाप्रणयपुञ्जकृतादराय ।
दुःकर्मकाष्ठ-भरकाननपावकाय,
तुभ्यं नमोऽस्तु सततं जिननायकाय ॥ २

सज्जन्तु वाञ्छितसुदानसुरद्रुमाय,
कन्दर्पसर्पहरणे गरुडोपमाय ।
योगीश्वराय शिवशालिवने शुकाय,
तुभ्यं नमोऽस्तु सततं जिननायकाय ॥ ३

दारिद्र्य-रेणु भर-संहरणाम्बुदाय,
सम्पत्ति-सिद्धि सुयशः सुखबोधदाय ।
आजन्मदुःखगणपल्लवलावकाय,
तुभ्यं नमोऽस्तु सततं जिननायकाय ॥ ४

देवाऽसुरप्रणतपाद सरोरुहाय,
कुन्देन्दुमण्डलसमुज्ज्वलचिद्गृहाय ।
निःसङ्ख्यदुःखदगदक्षय कारकाय,
तुभ्यं नमोऽस्तु सततं जिननायकाय ॥ ५

पूर्णक्षपारमण शुभ्रकलाकलाय
सत्कीर्ति सम्भृतदिगीश्वरमण्डलाय ।
लीलाऽऽलयाय विकचाम्बुरुहाम्बकाय,
तुभ्यं नमोऽस्तु सततं जिननायकाय ॥ ६

(कलशः)

इत्थं विश्वयमश्वसेननरराड्- वंशाब्जघस्राधिपं,
सद्वामोदर शुक्तिमौक्तिकनिभं कल्काग भङ्गद्विपम् ।
श्रीपार्श्वं विजयादिहर्षसहिताः स्युः संस्तुवन्तो नराः,
पार्श्वेशं बहुधर्मवर्द्धनधनं चिद्रत्नरत्नाकराः ॥ ७

पू.मु.श्री धर्मवर्द्धनगणिविरचितम्

## ३०. ॥ श्रीपार्श्वजिनबृहत्स्तवनम् ॥

वाञ्छितदानसुरद्रुम तुभ्यं,
नम ए कुरु सौख्यानि लसन्ति ।
जय जय जगतिपतेः ॥ १

नव नव नवनमहर्निशममलं,
यश ए तव कवयो गायन्ति ।
जय जय जगतिपतेः ॥ २

इक्ष्वाकुकुल-कमलाकरवर
भास्कर ए अश्वसेनवंश-वतंस
जय जय जगतिपते: ॥ ३

वामामातृवामोदरमानस
सर ए तत्र मनोरमहँस,
जय जय जगतिपते: ॥ ४

धन्यतरं तदहो अहस्त्रिभुवन
मह ए तव शुभ-उद्भव आस,
जय जय जगतिपते: ॥ ५

ववृधे प्रियमनोरथ इव सुखमिव
दिव ए वर राज्यं विललास,
जय जय जगतिपते: ॥ ६

ज्वलदहियुगलं बहुहित मंत्र-
दानत ए इन्द्रपदं नयसिस्म
जय जय जगतिपते: ॥ ७

नमीकृतशक्रव्रज राज्यं-
रज ए त्वं तूर्णं त्यजसि स्म
जय जय जगतिपते: ॥ ८

मोहलता दलन द्विप बहुलं
तप ए चारुतरं च चकर्ष
जय जय जगतिपते: ॥ ९

लध्वा केवलसंफ्दः शिवपद
सद ए त्वं श्रीपार्श्व बभर्थ,
जय जय जगतिपतेः ॥ १०

सौख्यं बहुभिरवाप्यत तव-
नामत ए कामितदायक देव
जय जय जगतिपतेः ॥ ११

श्रीधर्मवर्द्धन पेहत तव मत-
रत ए त्वं प्रभुरेधि सदैव
जय जय जगतिपतेः ॥ १२

पू.मु.श्री धर्मवर्द्धनगणिविरचितम्

## ३१. ॥ श्रीपार्श्वलघुस्तवनम् ॥

(द्रुतविलम्बित)

प्रवरपार्श्वजिनेश्वर पत्कजे,
भयहरे भविभावुकदे भजे ।
य इमके न कदापि नरस्त्यजेत्
तमिह सद्रमणीवरमासजेत् ॥ १

उदितमेतदहः सफलं नशं,
सफलतां च नयामि तथा दृशम् ।
जिनप दर्शनतो भव एष मे-
सफल एव गुणाः सफलाः समे ॥ २

जरिदृषीति विलोक्य सना जिनं
मम मनोऽत्र शिखीव घनाघनं ।

मिलति वै यदि वाञ्छितदायक-
स्तमनुसृत्य न वष्टि सुखाय कः ॥ ३

लघुवया अपि यः सवयाः सतां
निजगुणैः प्रबभूव तनूभृतां ।
अहियुगाय यकोज्ज्वलते ददे
सुरपदं स जिनो भवतां मुदे ॥ ४

शमदमादिगुणैरति सुन्दर-
स्तव जिनेश ! विराजति संवरः ।
परिभृतो मणिभिः सुयशश्चणः
क्षितितले किमु भाति न रोहणः ॥ ५

तव यशश्च गुणान्निगमं पदं,
वचनतो मनसस्तनुतो मुदः ।
वदति वेत्ति च विन्दति वन्दते,
विधिरयं जिन यस्य स नन्दति ॥ ६

गुणचनो भुवि पार्श्वजिनेश्वरः
सम इहाऽस्ति न येन परः सुरः ।
जित इनो महसा यशसा शशी
नमति तं सततं मुनिधर्मसी: ॥ ७

पू.मु.श्री धर्मवर्द्धनगणिविरचितम्

## ३२. ॥ श्रीपार्श्वलघुस्तवनम् ॥

(प्रमाणी)

भजेऽश्वसेन-नन्दनं मुहुर्विधाय वन्दनम्,
न रागिणो हि के नरा इने जिने सुदृग्धराः ॥ १

सतां विपश्चितां मतां सदेव सुप्रसादताम्,
विधेहि पार्श्वदेवते मयि क्रमाब्जयो रते ॥ २

अभीष्ट युष्मया मया प्रवृत्य ते त्वदाज्ञया ।
न दद्यते कृपोदयाद्विभो ममोद्यता अयाः ॥ ३

चरीकरीति ते यशः प्रसर्सरीति तद्यशः ।
वरीवरीति ते पदं स वर्व्वरीति ते पदम् ॥ ४

समस्तदुःखनाशनं विभो ! तवानुशासनम् ।
तदस्तु मे पुनर्धनं सुजैनधर्मवर्द्धनम् ॥ ५

पू.मू.श्री. धर्मवर्द्धनगणिविरचितम्

## ३३. ॥ श्रीपाश्र्वाधीशितु र्बृहत्स्तवनम् ॥

सर्वश्रिया ते जिनराज राजतः,
श्लोकोस्ति शुल्को गिरिराज-राजतः ।
अर्घप्रदानैरपि राजराजतः-
त्वत्कोऽतिरेको भुवि राजराजतः ॥ (उपजाति) १

स्मरणं कुरुते सदा यक-
स्तव तस्मै सुखवासदायकः ।

त्वमसि प्रभवे सदायकः
प्रणमन्नेश ! भवेत्सदायकः ॥ (वैतालिय) २

शुभदृक् तव नाथ ! सेवकं,
नयते वाञ्छितमेव सेवकम् ।
विबुधै र्विहितैकसेवकं,
त्वदृते वश्मि ही मानसे बकम् ॥ (एकरूप) ३

तव ये चरणेऽत्रनामिनः
स्युरहो ते तु कदापि नामिनः ।
मणिमाप्य मुनीश ! नाकिनः,
किमु चित्रं हि भवन्ति नाकिनः ॥ (एकरूप) ४

जिनपार्श्वसुनाम तावकं,
शरणं यः श्रयते न तावकं ।
न पराभवितुं हि कोऽपि तं,
प्रभविष्णुः क्षितिपोऽपि कोपितम् ॥ (वैतालिय) ५

परिहृत्य वसुस्त्रियौ वने,
निवसन्तीश ! यके हि यौवने ।
हृदि यैर्निहितं न नाम ते,
विदधीरन्सहितं न नाम ते ॥ (वैतालिय) ६

गमितं नरजन्म देवनै-
र्हृदि मे तेन कदापि देव नैः ।
तदहं परवश्यतां गतः,
परसेवा च मया कृताङ्गतः ॥ (वैतालिय) ७

शुभवता भवता सुकृता कृताः,
कतिचिदूर्ध्व जगत्प्रभूताद्भुताः ।
कतिचिदिश महोदयतायता,
मम विधौ विहिता लसता सता ॥ (द्रुतविलम्बित) ८

मम सदा नतनिर्जरवारके,
त्वयि विभौ सति पापनिवारके ।
इह जिनाधिपदुःषमवारके,
किल मया किमऽदायि न वारके ॥ (द्रुतविलम्बित) ९

राका भवानिव भवानिह भात्यतोऽपि,
श्रेष्ठाः स्तुवन्ति शुभवन्तमहो भवन्तम् ।
छिन्नार्त्तिरासभवता भवतापकर्त्री,
तस्मै सदाऽत्र भवते भवते नमः स्तात् ॥(वसन्ततिलका) १०

देवोऽधिकः प्रभवतो भवतो न कोऽपि,
सेवाज जिष्णु-भवतो भवतोऽतिरम्या ।
सद्भक्तिरा भवति यै र्भवति प्रक्लृप्ता,
प्रोप्तातया शिवफला जिनधर्मसीता ॥ (वसन्ततिलका) ११

पू.मु.श्री.धर्मवर्द्धनगणिविरचितम्

## ३४. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(भुजङ्गप्रयात)

प्रसर्सत्ति पार्श्वेश ! विश्वे यशस्ते,
विशस्ते धन्याः पदाब्जस्पृशस्ते,

मदीयाऽपि लोला, स्तुतौ तेऽस्तु लोला,
विदोलायमाना भ्रमादत्त मा भुत् ॥ १

बुधास्ते सपर्य्यातया चारुतर्य्या,
भवाब्धि प्रतीर्य्या भजान्सद्विपुर्य्याः ।
अहं तेऽनुभावं समारुह्य नावं,
तितीर्षुर्विभावं श्रितस्त्वां मुदाऽवम् ॥ २

न केनाऽपि केनाऽपि भोगादिना मे,
वशायां रिरंसा निनंसोस्त्वदं ह्री ।
विनेता तवेशास्मि नेतासि मे त्वं,
रमां धर्मशीलप्रमां देहि मह्यम् (?) ॥ ३

पू.मु.श्री धर्मवर्द्धनगणिविरचितः

चतुरक्षरायां

## ३५. ॥ श्रीपार्श्वनाथस्तवः ॥

(कन्या)

भो भो भव्याः, कीर्त्तितव्याः ।
नव्या नव्या, जैनी श्रव्याः ॥ १

प्रत्यूषेणः, श्रीपार्श्वेणः
यो ज्ञानेन, प्रयत्नेन ॥ २

ध्वस्तद्वन्द्वं, सम्यक्सन्धं
त्यक्त्वा व्यध्वं, तं वंदध्वं ॥ ३

यः श्रीकाश्यां, वाणारस्यां
पुर्य्यामस्यां स्वश्रेयस्यां ॥ ४

अश्वातसेनः, श्रीभूपेन
ईतिस्तेन, स्तद्राज्येन ॥ ५

तत्स्त्रीमुख्या, वामाभिख्या
तस्याः कुक्ष्याः, पुत्रो न्युष्यात् ॥ ६

चेतोऽन्तर्वैः, न्यस्तोऽखर्वैः
ग्लायद्गर्वै र्देवैः सर्वैः ॥ ७

पुण्यं प्राज्यं, भुक्त्वा राज्यम्
तत् साम्राज्यं, ज्ञात्वा त्याज्यम् ॥ ८

यः संसारं, त्यक्त्वा भारम्
साध्वाचारं, चक्रे सारम् ॥ ९

अन्यापोहं, ध्यात्वा सोहम्,
श्रेण्यारोहं क्षिप्त्वा मोहम् ॥ १०

तद् व्याख्यानं, तस्य ध्यानम्
तत्त्वज्ञानं, भूयात्मानम् ॥ ११

तच्चाश्चल्यं, हत्वा शल्यम्
प्रापत्कल्यं, यः कैवल्यम् ॥ १२

द्वे आयातस्तत्सेवातः
श्री विद्यातः, सातव्रातः ॥ १३

अन्यानीह, स्तद्भक्तीह
धर्मात् सीहस्तं स्तौतीह ॥ १४

पू.मु. श्री वत्सराजगणिवरकृता

## ३६. ॥ श्रीस्तम्भनपार्श्वनाथस्तुतिः ॥

(भुजङ्गप्रयात)

लसच्चारुकल्याणसौख्याभिरामं
जनानां वितीर्णोत्तमोदारकामम् ।
सदम्भोजसंदोहबोधे दिनेशं
वरेण्यं स्तुवे पार्श्वनाथं जिनेशम् ॥ १

जनानां गताधिं समाधिं ददानं
सुधर्मैकबीजं हृदीड्ये दधानम् ।
विमुक्तातिमर्याददोषादिलेशं
वरेण्यं स्तुवे पार्श्वनाथं जिनेशम् ॥ २

महाज्ञानिनं दर्शनादर्शयुक्तं
समाजादराख्यातसिद्धान्तसूक्तम् ।
पदेन्दीवरोपास्तिचित्तामरेशं
वरेण्यं स्तुवे पार्श्वनाथं जिनेशम् ॥ ३

विरागं विपापं विकोपं विमानं
विमायं विलोभं गुणै राजमानम् ।
वशानीतविक्रान्तमोहाचलेशं
वरेण्यं स्तुवे पार्श्वनाथं जिनेशम् ॥ ४

सुसिद्धिप्रदं दृष्टिदं शर्मदं तं
महानन्ददं गात्रकान्त्या हसंतम् ।
कृपासेवधिं वादिगर्जे मृगेशं
वरेण्यं स्तुवे पार्श्वनाथं जिनेशम् ॥ ५

समाज्ञासुवल्लीवितानाश्रयागं
महायोगिनाथं सुगाथं शिताङ्गम् ।
गुणग्रामगानोन्नमन्मानवेशं
वरेण्यं स्तुवे पार्श्वनाथं जिनेशम् ॥ ६

इत्थं स्तम्भनपार्श्वनाथममलं नौतीह भावाद् ध्रुवं
श्रीवामोदरमानसे हि रुचिरे श्रीराजहंसोपमम् ।
त्वत्पादाम्बुजसेवने हि मधुपो वै वत्सराजः प्रभो !
नित्यं शं वितनोतु साधु भविनामाचन्द्रसूर्यं सदा ॥ ७

(शार्दूलविक्रीडित)

पू.मु.श्री हंसराजगणिविरचिताः

वरकाणामण्डन-

## ३७. ॥ श्रीपार्श्वनाथस्तुतिः ॥

(अनुष्टुप्)

चित्रैः स्तवीमि श्रीपार्श्वं वरकाणकतीर्थपम् ।
प्रौढप्रभावविख्यातं, वाञ्छितार्थप्रदं मुदा ॥ १

भुवने हारसंकाश, - यशसा धवलीकृतः ।
काकारिपुरतो देव !, काको हंसायते तव ॥ २

नर्तिं तनोति ते तात !, नौति तं नानतो ननु ।
नानानीततिनेनूना, नतते नततां न नः ॥ ३

(असंयोगाक्षर श्लोकः)

लालीलीलाललो लाल, तततीत ततातत: ।
तंतु तातो तते तात, ममा मीम ममा ममः ॥(द्व्यक्षरश्लोकः)४

देहि सेवककल्पद्रो ! सहसाततसाहस ! ।
पापपादपपर्शो ! मे, ममतां ददतां तमः ॥ ५
(एकाक्षरपादश्लोकः)

रंगसारंगकासार, रसाकाम्य रमाकर ! ।
रंकं मां पाहि संसार-रसासंवित्तिसागर ! ॥ (रथपदबंधः) ६

महन्ति ये त्वां जिन ! वीतमानं,
महाप्रभावेण विराजमानम् ।
माराजितं राज्यमियर्ति नूनं,
माराजितं तेषु यशः प्रधानम् ॥(उपजाति)(अष्टदलकमलम्)७

घनस्वनजनश्रीन, हर रोरं शुभाकर ! ।
पीतज्ञानधनस्थान, धीर मेरं ! शुभावर ॥ (अनुष्टुप्) ८
(दर्पणबंधः)

चित्रं मया भक्तिवनेन सिक्त,-
श्चिरं नृभिः, सिद्धिगुणेषु रक्तः ।
भवांश्च रोमाङ्कुरतां दधासि,
गुणाधिकस्तेषु जनेषु देव ! ॥(गोमूत्रिकाबंधः) (उपजाति) ९
(अनुष्टुप्)

जय त्रिभुवनोत्तंस !, जगद्वन्द्य ! जिनेश्वर !
मत्तद्विरेफसंकाश !, सर्वेषामसुखं हर । १०

वरकाणेकतीर्थेशो, हंसराजस्तुतो जिनः
एधि श्रिये सदा मे त्वं, पार्श्वनाथमहावीरः ॥ ११

पू. आ. श्री सोमसुन्दरसूरिशिष्यविरचितम्

## ३८. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(वसन्ततिलका)

श्रेयः श्रियः श्रितवतां वितनोतु नेता
जेता जगद्विजयिमोहरिपोः स पार्श्वः ।
फुल्लत्फणाफलकमाकलयत्ययत्न-
नीलातपत्रकमलां किल यस्य मौलौ ॥ १

निःसङ्ख्यसौख्यपदवीमदवीयसीं वः
कुर्यादहार्यविभवः प्रभुपार्श्वदेवः ।
यस्याऽऽस्यपद्मगुरुसौरभलब्धरङ्गा
भृङ्गा भजन्ति फणिराजफणामिषेण ॥ २

प्रौढप्रभावविभवः प्रभवः शुभानां
भानां पतिस्तमसि पार्श्वविभुर्विभूत्यै ।
सप्तान्तरीपजनताभिमतार्थपूर्त्यै
चिन्तामणी-निव बिभर्त्ति फणामणीन् यः ॥ ३

दुष्कर्मकश्मलवनीलवनैकपार्श्वं
पार्श्वः स विश्वविभुरद्भुतभूतये वः ।
प्रेङ्खत्फणामणिमिषेण विधाय साक्षा-
दाख्यातवान् कुनयहृन्नयसप्तकं यः ॥ ४

श्रीणां विलाससदनं सदनन्तसंवि-
द्विश्राणनेन तनुतां मुदमीश ! पार्श्व ! ।
निःसीमसाम्यकमलामभिलाषुकाग्रं
सप्तर्षयः फणमणीवपुषो जुषन्ते ॥ ५

पार्श्वः स विश्वजनता प्रणतिप्रवीणाः
प्रीणातु सप्रणयमप्रतिमप्रसादैः ।
यन्मूर्ध्नि केलिकमला इव सप्त तत्त्व-
श्रीणां फणाङ्कमणयः प्रणयन्ति शोभाम् ॥ ६

श्रीपार्श्वतीर्थपतिरर्थितमर्थसार्थं
सर्वार्थिनां प्रथयतु प्रथितप्रतापः ।
यस्य स्फुरत्फणिफणाः किल सप्त भीति-
प्रध्वंसनाय दधते गुरुमुद्गरत्वम् ॥ ७

श्रीअश्वसेनतनुभूरनुभूतसिद्धि-
सङ्गः सरङ्गमुरगेन्द्रनुतः स तुष्ट्यै ।
पूजानिमित्तमिव सप्त जगत्प्रदत्त-
रत्नानि यत्फणिफणामणयो विभान्ति ॥ ८

श्रीमानसीममहिमासमवाप्तकानां
वामाङ्गजः सृजतु जन्तुततिं यदीयाः ।
सप्त स्फटाः सपदि सप्त जगज्जनानां
निःश्रेणयः किमु विमुक्तिगृहाधिरोहे ? ॥ ९

कैवल्यलक्ष्मिरमणीरमणीयलीला-
लीलागृहं जयति पार्श्वजिनाधिनाथः ।
यः सप्त दुर्गनिपतज्जनताविधृत्यै
धत्ते ध्रुवं फणिफणानवलम्बदण्डान् ॥ १०

यस्याभिलाषजमहाविरहप्रतप्त-
सप्ताङ्गराज्यकमलाप्रहिताः प्रसत्त्यै ।

दूता इवोरगफणाः प्रविभान्ति चित्त-
भ्रान्तिच्छिदे सपदि पार्श्वजिनेश्वरोऽसौ ॥ ११

गाम्भीर्यनिर्जितमहार्णवसप्तकस्य
यस्य प्रशस्यफणभृत् फणमण्डलीयम् ।
उत्तम्भितेव विजयत्वजराजिरेष
निश्शेषदुष्कृतभिदे प्रभुपार्श्वदेवः ॥ १२

ध्यानानलात् प्रतिकलं ज्वलतः कराला
ज्वाला इव प्रसृमराः फणरत्नदम्भात् ।
प्रादुर्बभूवुरपि सप्त जिनस्य यस्य
पश्यत्वसौ शुभदृशा फणभृद्ध्वजो वः ॥ १३

सप्तापि सप्तभुवनप्रसरत्प्ररोहां
मोहान्धकारपटलीं युगपद् विलोप्तुम् ।
यस्योज्ज्वलाः किल फणामणयः प्रदीपाः
श्रीपार्श्वविश्वपरमेश्वरमाश्रये तम् ॥ १४

क्षेत्रेषु सप्तसु पुरा विनियुक्तवित्त-
बीजोद्भवाः सुकृतवल्लिवनप्ररोहाः ।
स्फारस्फटालिकपटात् प्रकटा इवासन्
सप्तापि यस्य स निरस्यतु मोहमर्हन् ॥ १५

स पुस्फुरद्व्यसनसप्तलताङ्कुराणा-
मेकक्षणं क्षणनकर्मणि कर्मठन्त्यः ।
वेल्लल्लवित्रलतिका इव कामितार्थ-
सार्थं फणिध्वजफणीन्द्रफणाः पृणन्तु ॥ १६

भोगिप्रभोः प्रतिफणन् फणसप्त रत्न्यां
मूर्त्तीर्बिभर्त्ति किल योऽष्टदिगष्टकस्थम् ।
मोहस्य सैन्यमिव जेतुमना जनानां
नानान्तरारिविजयाय फणिध्वजोऽयम् ॥ १७

यो निःसपत्नफणसप्तकरत्नचक्र-
सङ्क्रान्तमूर्त्तिरजनिष्ट किलाष्टमूर्त्तिः ।
आलिङ्गितुं युगपदिष्टमहाष्टसिद्धी-
र्ऋद्धीः संवर्धयतु पार्श्वजिनेन्द्रचन्द्रः ॥ १८

प्रोल्लासिविंशतिनखीफणसप्तरत्न-
व्याजाद्यशोविशदताविजितानि भानि ।
यं सप्तविंशतिरपि ध्रुवमाश्रयन्ते
श्रेयांसि वो दिशतु पार्श्वजिनः स नित्यम् ॥ १९

दृग्दम्भतः शशिरवी पृथिवीभवाद्याः
शेषास्तु सप्तफणसप्तमणीमिषेण ।
नित्योदयश्रियमिवार्घयितुं यमित्थं
भेजुर्ग्रहा नव स वः शिवतातिरर्हन् ॥ २०

सेवाविधिर्विदधती वितता भुजङ्ग-
रङ्गत्फणावलिनिभादपि कल्पवल्लिः ।
यं याचतेऽभिलषितातिगदानलीलां
नीलांशुमांसलवपुः स पुनातु पार्श्वः ॥ २१

इन्दुभ्रमाद्वदनपद्मसमीपमाप्त-
स्तत्कालकीलिततनुश्च जिनप्रभावात् ।

यस्योल्लसत्फणगणः किमु सैंहिकेयः
प्रेयः करोतु कृतिनामयमाश्वसेनिः ॥ २२

व्योमस्थलीविमलनीलयिताऽभिरामा
वामातनूरुहतनूरतनु श्रिये नः ।
राराष्टिरत्नतडिदुल्लसितप्रशस्या
यस्यामसौ घनघटाकपटात् पटानाम् ॥ २३

देयादमेयमहिमा स हिमालयश्री-
विश्रंसि पार्श्वजिनपः खपदं यदङ्गे ।
स्फूर्जत्फणामणिरुचोरचितप्रपञ्चाः
प्राञ्चन्ति रक्तहरिचन्दनचारिमाणाम् ॥ २४

प्राचीनस्तुतिकारसारसरसव्याहारलीलोचित-
स्तुत्यः सत्यमपि स्वभक्तिवशतः किञ्चिन्मयेति स्तुतः ।
श्रीपार्श्वः फणडम्वरार्थघटनाव्याजेन नित्योदितां
दत्तां श्रीगुरुसोमसुन्दरचिदानन्दश्रियं देहिनाम् ॥(शा.वि.) २५

पू.आ.श्री सोमसुन्दरसूरिशिष्यविरचितम्

## ३९. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

(यमकमयम्) (वंशस्थ)

विभाति यद्-भास्तरुणारुणारुणा
किमङ्गमेघे रुचिरा चिराऽचिरा ।
तवाऽत्रते पार्श्व ! महेम हे मरे-
श्वरायितुं निर्विपदे पदे पदे ॥ १

विदुर्यदुच्चैः सुकृते कृतेकृते
प्राप्यं स्वसंवित् कलयालयालयाः ।
तन्मेऽस्त्यघद्रुप्रकरे करे करे !
त्वय्यद्य दृष्टेऽतिसुखं सुखं सुखम् ॥ २

न ते प्रपीड्या पुरुषा रुषाऽरुषा
न तांश्च दृष्टाः समया मयाऽऽमयाः ।
नमन्ति तान् मुद्रसवास ! वासवा
येषां मतिस्ते रमते मतेमते ॥ ३

वह्नेर्विनम्र द्युसदा सदा सदाऽऽ-
यताक्ष ! नागं भवता बताऽवता ।
आर्द्रीकृतान्तर्हृदयो दयोदयो
निदर्शितः सद्विधिनाऽऽधिनाधिना ॥ ४

यदीयगीश्चङ्ग-गमा गमाऽऽगमा-
वनीसमा मोहरतीरतीरती ।
उपासते त्वामदरा दराऽदरा-
पहं न के सन्महितं हि तं हितम् ॥ ५

तावत् कुविद्यागुरवो रवोरवो
वादीन्दवः संयमधाम ! धामधाः ।
यावद्भवत्तीर्थ्यघनाघनाघना
नोद्यन्ति तद्विप्लवदा-वदावदाः ॥ ६

प्रपञ्चितमप्यतिभीतिभीतिभी
रुणद्धि भक्त्योल्लसतां सतां सताम् ।

त्वन्मूर्तिरर्तिं सकला कला कला-
वपीश ! क्लृप्तव्यसनासना सना ॥ ७

त्वयि प्रसन्ने प्रगुणा गुणागुणा
द्विषोऽपि च प्राज्यमहा महामहा ।
भवेत् सदोदित्वरधीरधीरधी-
शता च जन्तुष्वतिभूतिभूतिभूः ॥ ८

इत्थं स्तोत्रपथं कथञ्चन घन-श्यामाङ्ग ! वामाङ्गज !
त्वां नीत्वा तनुधीरपि त्रिभुवन-त्राणैकदीक्षागुरो !
नेन्द्रत्वादि वरं जिनेश ! न वरं नाथामि नाथाऽमिता-
ऽऽनन्द ! श्रीगुरुसोमसुन्दरपरब्रह्मप्रकाशोदयम् ॥ ९
(शार्दूलविक्रीडित)

पू.आ. श्रीसोमसुन्दरसूरिशिष्य
(पादान्त-यमकमय)

## ४०. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

(वंशस्थ)

यो भ्राजसेऽतान्तिरभीरभीरभी-मान्तोऽघसर्पे वरवी रवी रवी ।
मोहान्धकारेष्ववनीवनीवनी, पार्श्वं भजे राजगृहेऽगृहेगृहे ॥ १

भद्रौषधीसानुमतीमती मती-रानन्दयन्तीनमताऽमतामता ।
मूर्तिर्जयेत् तेऽवृजिनं जिनं जिनं, पार्श्वं भजे राजगृहे गृहे गृहे ॥२

मुक्तेरधाद् यं सुमनोमनोमनो-रथावहाऽस्तारधराधरा धरा ।
मनोम्बुजेऽसानुशयाशयाऽऽशया, पार्श्वं भजे राजगृहे गृहे गृहे।।३

वाणी कृपाणीक्षुरसाऽरसा रसा-
नन्दा यदीयास्यभवाऽभवाऽऽभवात् ।
आस्ते तरीवेतिवनेऽवनेवने, पार्श्वं भजे राजगृहे गृहे गृहे ॥ ४

सौजन्यसम्पद् रमते मतेऽमते !, वैराग्यभङ्गीकृदरीदरी दरी ।
श्रीणां यमेत्याऽमरतार ! तारता, पार्श्वं भजे राजगृहे गृहे गृहे ॥५

स्तोतुं भवन्तं विबुधा बुधा बुधा-दयो यमीशाऽऽविनया नयानयाः।
दधुर्न शक्तिं धरधीरधीरधी, पार्श्वं भजे राजगृहे गृहे गृहे ॥ ६

तृष्णातुरे सिद्धिरमाऽऽरमार ! मा-
योज्जासकोऽसत्समरोऽमरो मरोः ।
त्राता कलेः संवरभूरभूरभूः, पार्श्वं भजे राजगृहे गृहे गृहे ॥ ७

कामं विलासं कमलामला मला-
नोदा विधत्ते सकला कला कला ।
आश्चर्यकृत् ते विगदाऽऽगदागदा, पार्श्वं भजे राजगृहे गृहे गृहे॥८

त्वां सद्विवेकं जनता नताऽऽनता-
रातिं नितान्तं विमतामता मता ।
संसारसंहारकृतेऽकृतेंकृते !, पार्श्वं भजे राजगृहे गृहे गृहे ॥ ९

तन्तन्ति मोदं वसुधासुधाऽसुधा-रकस्य ते गीर्विधृतेऽधृतेधृते !।
वामेय ! मायाविलया लयालया,
पार्श्वं भजे राजगृहे गृहे गृहे ॥ १०

इच्छामि नो सुरपतेः पदसम्पदोऽहं
चक्राधिपस्य पदवीमदवीयसीं वा ।

श्रीसोमसुन्दरगुणास्तरितेल ! देया
वामेय ! मे निजपदाम्बुजरेणुसेवाम् ॥ (वसन्ततिलका) ११

पू. मु. श्री सकलचन्द्रविजयविरचितम्

## ४१. ॥ श्रीपार्श्वनाथजिनस्तवनम् ॥

सिद्धं हृदयनिरुद्धं बुद्धं ध्यानैर्लताभिरिव वृक्षम् ।
अतिशयमहिमाकक्षं वन्दे वामेयसुरवृक्षम् ॥ (आर्या) १

जिनमिह नतसमयक्षं भवप्रतिपक्षं च सर्वगुणलक्षम् ।
केवलरमाकटाक्षं कुरु पक्षे दक्ष ! भवसमरे ॥ (आर्या) २

सम्मतिसंयतिसन्ततिसन्नतिदुर्गतिहं
शोचनमोचन ! केवललोचन ! दर्शनदम् ।
त्वां हृदि शुद्धरसेन्द्रमिव प्रविधाय जिनं
नागमलं प्रदहन्ति बुधा निजकर्ममलम् ॥ (सोपानकम्) ३

कल्याणाम्बुधरो महोदयकरो रोगार्त्तिगर्त्ताहरो
मोहोच्छेदकरो जरामरहरो विश्वासकीर्त्तीश्वरः ।
भग्नानङ्गशरोहताहिपगरो विध्वस्तजन्मादरो
ब्रह्माण्डैकदिवाकरो भवतु मे मित्रं प्रभो ! ते गुणः ॥ ४
(शा.वि.) (काव्यम्)

सकलमुनिजनप्रमोदकं कमठदग्धहरिप्रतिबोधकम् ।
निखिलभवतमोविरोचनं नम जिनं जगतीत्रयलोचनम् ॥ ५
(मागधिका)

करुणाकरणादरणार्णवलोलतरङ्गतरं
तरुणीरमणीशरणीकृतमन्मथमर्महरम् ।
अधरीकृतदेवनदीसुतरीशुचिगीर्विभवं
सदये हृदये ह्युदये तरणेर्नम पारगतम् ॥ (आलिङ्गनकम्) ६

विश्वेन्दीवरभास्वते जिनपते ! त्रैलोक्यवाचस्पते !
शुद्धाचारवते प्रबुद्धमरुते सर्वत्र शोभावते ।
दुष्कर्माद्रिशते युगान्तमरुते निर्लेपतां कुर्वते
ब्रह्मज्ञानवते नमो भगवते वामेय ! तुभ्यं यते ! ॥(काव्यम्) ७

निचितदुरिततिमिरनिकररविविलसितं
सकलसुकृतसुकृतकुमुदविपिनविधुसमुदितम् ।
अरिहरिहरिकरिसमरसमदरगहनदहनगतं
जिन ! तव गुणसुमणिगणनम (पारं) परे शमिह तनुते ॥ ८
(सङ्गतकम्)

भन्दकन्द ! कन्द ! नन्दपुण्यकुन्दवृन्दचन्द्र ! मन्दबलह !
दुष्कृतान्त ! विःकृतान्त ! सुकृतान्त ! विप्रशान्तजनन ! ।
वान्तसर्वधातुजातविश्वजन्तुघातपात ! जिनप ! शान्तदान्त !
सिद्धिकान्त ! पूतनीलदेहकान्त !
भूनितान्तसुकृतशान्तिदस्त्वम् ॥ (नाराचकम्) ९

जिनमखिलगुणाकरावतारं
दलितसमस्तमदेन्द्रियार्थवारम् ।
प्रशमरसतरङ्गनेत्रतारं भजत
भजत भवाब्धिमग्नलोकतारम् ॥ (कुसुमलता) १०

वज्री स्वर्गिषु मानवेषु च यथा चक्री च तेजस्विनां,-
मार्तण्डः कनकाचलो गिरिषु वा वृक्षेषु कल्पद्रुमः ।
गङ्गा सर्वनदीषु वा हिमरुचिस्तारासु मुख्यस्तथा
सद्ध्यानेषु तव स्वरूपसुलयो नेतो मया ध्यायते ॥(काव्यं)११

सदरी बदरी चमरी भ्रमरी शबरीखचरी-
सुसुरीवनरीतिपुरीमधुरीकृतगीतगुणम् ।
अमरीकबरीचमरीकृतचीरसमीरगतं
शफरी लहरीनगरीमिव शीलय जीव ! जिनम् ॥ १२
(आलिङ्गनकम्)

सुरनरसुखसम्पदामगारं
विपुलमतियतिरमोरुकण्ठहारम् ।
कमठहठकुकाष्ठताकुठारं
स्मर पुरुषोत्तममङ्गनाविकारम् ॥ (कुसुमलता) १३

हेमकुचकुम्भिनी विविधसुरमानिनी
कुसुमवरदामिनी वदति गीतं
भुवनपतिकामिनी मरुजवरवादिनी
नागसीमन्तिनी वहति तालम् ।
चन्द्रमण्डलमुखी हंसगतिगामिनी
कापि लीलावती धरति तन्तिं
कलितकटिमेखला श्रवणवरकुण्डला
नक्रमुक्ताफला सृजति नृत्यम् ॥ (गेयराग) १४

रचितकटिकिङ्किणी खचिततनुकञ्चुका
तिलकमुखशोभिनी वाति तूरं

हारकेयूरका स्तनितपदनूपुरा
ललित-सुललन्तिका काऽपि वीणाम् ।
अहिपपद्मावती ताण्डवं तन्वती-
तीन ! ते किं मनो हरति नैव
रोचते तन्न किं मोदसे तेन नो
वेति तर्कोऽस्ति नीरागोऽसिआ मे ॥ (गेयराग) १५

निर्विद्यागुरुविद्वते गुणवते निर्ग्रन्थता राजते
ध्येयानां महते सुखं विदधते सौभाग्यतः स्फूर्जते ।
शुक्लध्यानवते शमं च वहते योगस्य निद्रावते
निद्रायां स्फुरते च योगिमनसो मे ते नमोऽर्हन् सते ॥ १६
(शा.वि.) (काव्यं)

वासवमौलिवृन्दविनते कृतसमस्तविरते
वीतसमस्तदोषकुगते जिन ! विशदयते ।
धौतशरीर कुन्दसुरभे वरकलभगते चेतसि मे
हि मम रमते तव सुगुणततेः ॥ (खिज्जितम्) १७

सिद्धबुद्ध रुद्धरागरोष पापपोषमानदोषजनन !
भावयुद्धसुप्रसिद्धदुर्निवारवीरमार-विजय ! ।
सर्वत्रृद्धिसिद्धिबुद्धिवृद्धिशुद्धलब्धिदानवचन !
सन्निरुद्धमोहमल्लवीतराग ! देहि मे हि ते
स्वरूपकलनमीश ! हे ॥ (नाराचकम्) १८

बहुलमधुमासके वरचतुर्थीदिने प्राणतस्वर्गतश्च्यवनभद्रो
योऽश्वसेनाधिपस्त्रीसुवामाङ्गजः शिवपुरीतिलकसमभुजगचिह्नः।

पौषमासे जिनो बहुलदशमीदिने
जननकल्याणको मरकताभो
वरविशाखाभतुलराशिनवकरतनु-
स्त्रिंशदब्दो गृहेऽभुक्तराज्यः ॥ १९

पौषमासे व्रती बहुलतैकादशी
त्रिशतनरवरयुतोऽष्टमतपस्वी
कोपकटधनगृहे परमान्नकृतपारणः
छद्मताशीतित्रिदिने विहारी ।
सुपिकमधुमासके सितचतुर्थीदिने धातकीद्रुमतले षष्ठतपसा
सर्ववेदीजिनो विश्वमङ्गलकरो वेदबीजं ददौ दशगणिभ्यः ॥२०

पार्श्वपद्मावतीसेविताशासनः सहस्रषोडशमुनिव्रातबोधी
सोऽष्टत्रिंशत्सहस्रार्यिकानायकः सप्तदशकाब्दपर्यायधारी ।
श्रावणाष्टमदिने वर्षशतजीवितोपोषितो मासि सम्मेतशैले
वरत्रयस्त्रिंशदनगारसमसिद्धिगो भुवनहरिचन्दनो वो मुदेऽस्तु
(घटितगद्यविशेषकम्) ॥ २१

नमत नमत जिनपण्डितं क्लेशनाशभुवि मण्डितम् ।
जन्मसागरतरण्डितं त्रिगुणरत्नसुकरण्डितम् ॥ २२

अरतिरतिविमुक्तप्रबोधाब्धिनिर्मायनिर्लोभनिः-
कामनिर्माननिःक्रोधनिःशोकनिर्निद्रता
सकलजगति निःपाप-निःसङ्गनिष्-
कर्मनिर्दम्भनीरागनिर्वेद-निरोग-निर्ग्रन्थता ते सदा ।
त्रिभुवनगतवस्तुप्रकाशावबोधाग्रलक्ष्मी-

लसद्दर्पणस्त्वं विनिर्दोष-निर्मोह-निःप्रेमता
शमजलधिनिमग्नं मनो निर्गमायावकाशं
न लातीति सञ्चिन्त्य मे ते गुणाब्धिं प्रभो ! ॥ (दण्डक) २३

सर्वसुरेन्द्रा विश्वनरेन्द्रास्तापनचन्द्राश्चोज्झिततन्द्रा
मङ्गलबुधगुरुशुक्रशनैश्चरराहुककेतुकखेटकवृन्दाः ।
सोमयमासुरवैश्रमणामरवारुणलोकपकिन्नरभूताः
पार्श्वजिनाधिप ! कीर्तनतस्तव शान्तिकरा जगतां तु भवन्तु ! ॥
(रत्नमाला) २४

अमतितिमिरपरिवर्जितं ज्ञानमास्तनसुमर्दितम् ।
भारतीवदनचुम्बितं स्मर जिनं त्रिजगदर्चितम् ॥(सुमहम्) २५

निर्दोषध्वनिगर्जते विलसते मुक्त्या तमोभास्वते
सम्मोहं हरतेऽर्हते विकसते ते प्रातिहार्यश्रिया ।
सच्चित्ते भ्रमते पयोजसरते ध्यानाम्बुदोद्विद्युते
श्रीवामेय ! नमो नमो मम विभो ! ज्ञानाम्बुधौ मज्जते ॥ २६
(शा.वि.) (काव्यं)

हरिहरिचलचित्तगुप्तिगुप्तं हरिहरिदङ्गमयूखराजमानम् ।
कमठहरिहरिं हरिप्रियादं हरिहरिणातपवारणत्रयाप्तम् ॥ २७

हरिहरिपरिचर्ययोपयुक्तं नखहरिहारि मुदाप्रलोकलेखम् ।
हरिहरिभयभीतिदं च पार्श्वं हरिहरिचन्दनसोदरं नमामि ॥२८
(काव्ययुग्मम्)

नीतिनदीनसुमीनमहीनमहीनकिरीट-
मानविलीनसुगन्धविविधकुसुमार्चितपादकजम् ।

दीनदयालुमुनीनमहीनमनोहरचरितमणिं
लीनमुने ! जिनमुपचर सुर इव सुरतरुमङ्गल ॥(चित्राक्षरा)२९

अतिमुदितसकलचन्द्रं स्तुतिमिति पार्श्वं च जिनचन्द्रम् ।
गुरुविजयदानभद्रं शान्तिकरं सर्वदा लोके ॥ ३०

पू.मु. श्री गुणविनयविरचितम्

## ४२. ॥ श्रीस्तम्भनकपार्श्वनाथ-स्तवनम् ॥

पूरितकामितभरमतिसुन्दर-भानुकलाकमलाकमलाकर-
मकलितविभुताधारम् ।
श्रीस्तम्भनकपुरालङ्करणं, भविकजनव्रजशिवसुखकरणं,
पार्श्वजिनं कुरु शरणम् ॥ १

यदि वाञ्छसि जगतामैश्वर्यं, परमानन्दपदप्रदवर्य्यं,
धर्मधुराधरधुर्य्यम् ।
अनुपममहिमोदधिहिमकिरणं, कुर्वाणं मनसिजमदकिरणं,
भज तासाहिमकिरणम् (?) ॥ २

दूरोत्सारितदुरितकलापं, स्वररसवत्ताजितपिकलापं,
पार्श्वजिनं दितपापम् ।
श्रीमदभयदेवैः खरतरगण-नाथैः प्रकटितमद्भुतगुणगण-
राजितमजितमनन्तम् ॥ ३

श्रीधरणेन्द्रभुजगपतिनिर्मित-नानातिशयगुणोदयवर्म्मित-,
मधिपं वन्दे पार्श्वम् ।

पार्श्वसुराश्रितपार्श्वमहासं, नीलकमलदलकज्जलभासं,
विश्राणितसुविलासम् ॥ ४

पद्मावतीसुरीकृतसेवं, पार्श्वजिनं गुणसिन्धुररेवं,
पदलुलितासुरदेवम् ।
अट्टे मट्टे गर्भितमन्त्रैः स्मर वरकविकृतसद्गुणतन्त्रै-
रतिशयपूरितयन्त्रैः ॥ ५

नागार्जुनविरचितचितबुद्धे-र्द्रवीभूतहाटकरससिद्धेः,
स्तब्धत्वात्सकलत्वम् ।
यद्दृष्ट्या समजायत नियतं, तत्स्तम्भनकमिति क्षितिविदितं,
तीर्थं यदभून्महितम् ॥ ६

कासश्वासप्रभृतिमहामय,-तूलोच्छालनपवनरमामय,-
पदभूषण जगदीश ! ।
गुणविनयस्तुत ! साधय वाञ्छित,-ममितशुभाश्रित !
वामायाः सुत !, सन्मतिदायक देव ! ॥ ७

पू.मु.श्री जयसोमविजयविरचितम्

## ४३. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(हारचित्रमयम्)

(वसन्ततिलका)

वन्दे सुभाव-वसुसङ्घकरं शमोकं,
सिद्धान्तरासिततनम्नकदं न शोकम् ।
मन्दारकामकरकम्पितपङ्कजातं,
दिव्यङ्गनादिवग वन्दितजावतातम् ॥ १

सपदिताऽऽशविदितं भवपातनावं,
सन्तापनाशनपरं सुरवं रतावम् ।
रम्याननं रविनतं विशदं तमीशं,
मर्त्यावली मतवदं सुसदं दमीशम् ॥ २

दन्तावलं दरवनच्छितये नमन्तं
निर्वाणदं निपुणनिर्मितकं नितान्तम् ।
गर्वाङ्गजाऽगनगभित्समताऽभिरामं,
सद्भोगभाससुगतिक्रमदातिकामम् ॥ ३

सत्शासनेशलसदंशुरदं दयारं,
सर्वाऽभिसंशयभिदं वरनादसारम् ।
सन्नाकवासद कसङ्गरजःसमीरं,
वर्य्यं जनाऽवमऽजरं वरसारधीरम् ॥ ४

एवं मया विपुलहारविचित्रचित्र-
स्तोत्रेण पार्श्वजिनपो जनपस्तुतोऽयम् ।

भक्त्या दयातिलकभूषितभालदेशः,
सौख्यं ददातु 'जयसोम' मुनेर्जिनेशः ॥ ५

पू.मु.श्री जयसोमविजयविरचितम्

## ४४. ॥ श्रीपार्श्वनाथस्तवम् ॥

(शृङ्खलाचित्रमयम् ।)

(भुजङ्गप्रयात)

लसत्पङ्कजाऽऽमोदनिश्वाससारं,
ससारं सुरेन्द्रोल्लसच्छ्रीविसारम् ।
विसारं सुखाम्भोनिधौ सद्विजेशं,
द्विजेशं कुकर्माद्रिभङ्गे जने शम् ॥ १

जने शङ्कर पार्श्वनाथं सुराऽऽसं,
सुराऽऽसङ्घसंस्तूयमाऽऽनाऽशिवासम् ।
शिवाऽऽसं हि कल्याणवल्लीपयोदं,
पयो दन्तपङ्क्तिं कृताऽनन्तमोदम् ॥ २

तमोदं वरं पार्श्वनाथं विमायं,
विमाऽऽयं हितं संस्तुवेऽहं सदाऽऽऽयम् ।
सदा यं द्विजिह्वाङ्कितं तं वृषाङ्कं,
वृषाङ्कं महाकामनाशे सुनाकम् ॥ ३

सुनाकस्थनाकिव्रजस्तूयमानं,
यमानक्ष्यमभ्राऽऽरवं तं सदानम् ।
सदानन्दकारं खगश्रीसमानं,
समानं, नतपत्नलक्ष्मीवितानम् ॥ ४

इत्थं विश्वप्रकाशिप्रबलपरलसज्ज्ञानसद्ध्यानधाम्नः,
श्रीपार्श्वस्य प्रशस्तपृथुतरयशसः सौख्यकृद्वामनाम्नः ।
स्तोत्रं चक्रे विमुक्तग्रहणयुतमदः प्रोल्लसद्भोगभाजः,
हर्षः प्राग्भारभास्व'ज्जयशश'मुनिना रङ्ककृज्जैनराजः ॥ ५

(स्रग्धरा)

पू.मु.श्री जयसोमविजयविरचितम्

## ४५. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(वसन्ततिलका)

सन्तोषशर्मसदनं स(द)नन्द्य सारं,
दत्ताङ्गिमोक्षसुगतिं सुगतिं सुसारम् ।
मेघोल्लसच्छविपदं विपदन्तकारं,
सेवे मनःप्रभवसम्भवसङ्गवारम् ॥ १

कैवल्यवल्लिकदभं कदभन्ददारं,
शालत्रयीसहितसंहित-सङ्घकारम् ।
नम्रामरेन्द्रभविकं भविकं समानं
सद्भोगि-भासिततनुं तत्र नुन्नमानम् ॥ २

इक्ष्वाकुवंशसुभदं सुभदन्तमीशं,
संवीतसंयमधुरं मधुरं दमीशम् ।
वन्दे दिताऽऽ(शु)सु (?) प्रभवं प्रभवं गमानां,
निर्नाशिताऽऽघतमसं तमऽसङ्गमानाम् ॥ ३

वन्दे जिनं नवरदं वरदं जनानां,
दुर्दान्तदान्तकरणं करणं धनानाम् ।

सत्पादनम्रविबुधं विबुधं सुशीलं,
वामाऽङ्गजं हि सुपदं सुपदं सुनीलम् ॥ ४

इत्थं मयाऽत्र विहितं विहितं तवेश !,
स्तोत्रं विचित्रपरमं परमङ्गलेश ! ।
सौख्यानि मे वितनुताऽतनुताऽऽत्तशस्य !,
देवेन्द्रसद्गजयशो 'जयसोम'कस्य ॥ ५

पू.मु.श्री जयसोमविजयविरचितम्

## ४६. ॥ श्रीतिमिरीग्रामस्थपार्श्वजिनस्तवनम् ॥

(द्रुतविलम्बित)

भविकभावुकसङ्गमकारकं, सकलशास्त्रलताजलदायकम् ।
जलदवर्णधरं हरिणाङ्कितं, नमत पार्श्वजिनं तिमिरीस्थितम् ॥१

प्रबलमोहतमस्तपनप्रभं, सुमतिचित्रशिखण्डिजसन्निभम् ।
सदनपङ्ककदं सुगुणान्वितं, नमत पार्श्वजिनं तिमिरीस्थितम् ॥२

विदलिताशुभकर्ममतङ्गजं, प्रणमितेश्वरमस्तपतङ्गजम् ।
नवकनिर्जरपङ्कजपत्रितं, नमत पार्श्वजिनं तिमिरीस्थितम् ॥३

अधरकान्तिविनिर्जितविद्रुमं, शमधरं शिवमार्गवरद्रुमम् ।
हरिवराशनसंस्थितमऽर्चितं, नमत पार्श्वजिनं तिमिरीस्थितम् ॥४

श्रीमत्पार्श्वजिनेन्द्रमिन्दुसदृशाऽऽस्यं तापपापापहं,
ऐक्ष्वाकान्वयनिर्मलाम्बुधिनिशानाथं नमस्याम्यहम् ।
देवेन्द्राऽमरमौलिमौलिशिखरश्रेणिप्रकाशिक्रमं,
कल्याणं 'जयसोम'सेवकमुनेः श्रीपार्श्वकल्पद्रुमम् ॥(शा.वि.)५

पू.मु.श्री जयसोमविजयविरचितम्
जालोरदुर्गस्थ-

## ४७. ॥ श्रीसुवर्णनगावतंसपार्श्वनाथ-स्तवनम् ॥

(इन्द्रवज्रा)

विश्वत्रयी जनमनोमतकामकुम्भं,
वर्चाऽभिभूतजलदं गतलाभदम्भम् ।
वामासुकुक्षिसरसीवरराजहंसं,
पार्श्वं जिनं नुतं सुवर्णनगावतंसम् ॥ १

मोहाद्रिनाशनसुरेन्द्रसमं प्रकामं,
राजेन्द्रवन्दितपदं नतह(त्नु)लकामम् ।
माद्यत्तम स्तिमिरचक्रविनाशहंसं
पार्श्वं जिनं नुत सुवर्णनगावतंसम् ॥ २

देवाद्रिधीरमधरं गुणराशिरामं,
कल्याणवल्लिवनदं गतकामरामम् ।
संसारवारिनिधिपोतसमं सुवंशं,
पार्श्वं जिनं नुत सुवर्णनगावतंसम् ॥ ३

सर्पाङ्कितं शिवरमारमणं रसालं,
कर्मच्छिदं सकलसौख्यकरं विसालम् ।
अद्र्धेन्दुबिम्बसमभालमपारिरंसं,
पार्श्वं जिनं नुत सुवर्णनगावतंसम् ॥ ४

इत्थं पार्श्वयुतः प्रमोदसुखदो भक्त्या मया संस्तुतः,
स्तोत्रेणाद्भूतकान्तकान्तिविलसद्विश्वत्रयीविश्रुतः ।

श्रीमन्नीलतमालनालबहलभ्राजिष्णुकान्त्युत्तमः,
भूयाच्छ्री "जयसोम" वाञ्छितकरः श्रीपार्श्वकल्पद्रुमः ॥ ५
(शार्दूलविक्रीडित)

पू.मु.श्री ज्ञानप्रमोदगणिविरचितम्

रतलाम–भूषण–

## ४८. ॥ श्रीपार्श्वनाथ–स्तोत्रम् ॥

(वसन्ततिलका)

आनन्दनम्रविबुधाधिपमौलिकोटी–
माणिक्यकान्तिमहितांह्रिनखत्विषं वै ।
उद्यत्प्रतापमहिमेन्दिरया सनाथं,
भक्त्या नमामि सततं प्रभुपार्श्वनाथम् ॥ १

श्रीअश्वसेननरराजकुलावतंसं,
वामोरुकुक्षिसरसीवरराजहंसम् ।
विश्वत्रयीकलुषपावनतीर्थनाथं,
भक्त्या नमामि सततं प्रभुपार्श्वनाथम् ॥ २

दुग्धार्णवेन्दुकिरणामलकीर्त्तिभासं,
भव्याम्बुजावलिविबोधनचारुसूर्यम् ।
पद्मावतीधरणसेवितभिक्षुनाथं,
भक्त्या नमामि सततं प्रभुपार्श्वनाथम् ॥ ३

स्वोद्योतवीक्षणविनिर्जितचन्द्रपद्मं,
यस्याननं निरुपमं भविकस्य तोषम् ।

संवीक्ष्य नेत्रमुपयाति भयप्रमाथं,
भक्त्या नमामि सततं प्रभुपार्श्वनाथम् ॥ ४

पद्मेक्षणा घनपयोधरभारनम्रा-
श्चैत्ये नरीनृतति यस्य पुरो ब्रुवाणाः ।
गीतस्तुतिं जिनपतेः कथिताऽऽर्यगाथं,
भक्त्या नमामि सततं प्रभुपार्श्वनाथम् ॥ ५

श्रीस्तम्भनाधिपजिनं रतलामपार्श्वं,
यं श्रीअवन्ति-मगसी-पुरतीर्थराजम् ।
नत्वा जिनं लभथ सौख्यमहो ! सुसार्थं,
भक्त्या नमामि सततं प्रभुपार्श्वनाथम् ॥ ६

शङ्खेश्वरादिरुचिरैर्जिननामधेयैः,
पार्श्वप्रभुर्विजयते भुवि नीलवर्णः ।
सम्पूरयन् जनमनोऽभिमतं कृपार्थं,
भक्त्या नमामि सततं प्रभुपार्श्वनाथम् ॥ ७

योऽभ्यर्चितस्तु कुसुमैर्विधिना स्तुतो वा,
पापं भिनत्ति भविनां यदि शं प्रदत्ते ।
कल्पद्रुमौघफलितश्च समीहितार्थं,
भक्त्या नमामि सततं प्रभुपार्श्वनाथम् ॥ ८

इत्थं मुदा श्रीरतलामरत्न !
श्रीरत्नधीरस्य गुरोः प्रसादात् ।
ज्ञानप्रमोदेन जिनः स्तुतो वः,
पायादपायात् स हि पार्श्वदेवः ॥ ९

पू.मु.श्री रत्नसिंहविजयविरचितम्

## ४९. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(वसन्ततिलका)

कल्याणकेलिसदनाय नमो नमस्ते,
श्रीमत्सरोजवदनाय नमो नमस्ते ।
रागारिवारकदनाय नमो नमस्ते,
वज्राभिरामरदनाय नमो नमस्ते ॥ १

अम्भोधराभकरणाय नमो नमस्ते,
लोकातिरिक्तिचरणाय नमो नमस्ते ।
संसारवार्द्धितरणाय नमो नमस्ते,
त्रैलोक्यसारशरणाय नमो नमस्ते ॥ २

सन्निर्मितांह्रिमहनाय नमो नमस्ते,
रागोरुदारुदहनाय नमो नमस्ते ।
विध्वस्तकृत्स्नकुहनाय नमो नमस्ते,
पुण्यद्रुमालिगहनाय नमो नमस्ते ॥ ३

संसारतापशमनाय नमो नमस्ते,
निर्दाक्ष्यदाक्षदमनाय नमो नमस्ते ।
सुव्यक्तमुक्तिगमनाय नमो नमस्ते,
रूपाभिभूतकमनाय नमो नमस्ते ॥ ४

पापौघपांशुपवनाय नमो नमस्ते,
सेवापरत्रिभुवनाय नमो नमस्ते ।
क्रोधाशुशुक्षणिवनाय नमो नमस्ते,
संसृत्युदन्वदवनाय नमो नमस्ते ॥ ५

नेत्राभिभूतकमलाय नमो नमस्ते,
शक्रार्चितांह्रियमलाय नमो नमस्ते ।
निर्नाशिताखिलमलाय नमो नमस्ते,
पद्मोल्लसत्परिमलाय नमो नमस्ते ॥ ६

श्रीअश्वसेनतनयाय नमो नमस्ते,
सर्वाद्भुतैकविनयाय नमो नमस्ते ।
विख्यातनिक्षितनयाय नमो नमस्ते ,
निर्णीतभूर्युपनयाय नमो नमस्ते ॥ ७

श्रीसङ्घहर्षसुविनेयकधर्मसिंह-
पादारविन्दमधुलिण्मुनिरत्नसिंहः ।
पार्श्वप्रभोर्भगवतः परमं पवित्रं,
स्तोत्रं चकार जनताभिमतार्थसिद्ध्यै ॥ ८

पू.मु.श्री ज्ञानतिलकप्रणीतम्

## ५०. ॥ श्रीगवडीपार्श्वनाथस्तोत्रम् ॥

शाश्वतलक्ष्मीवल्लीदेवं, देवा नतपदकमलं रे ।
मलिनकलुषतुषहरणे वातं, वार्तकरं कृतकुशलं रे ॥ शा. १

शलभनिभे कर्मणि दावाग्निं, वाग्निर्जत वद जीवं रे ।
जीवदयापालितसमविश्वं, विश्वसमयरसक्षीबं रे ॥ शा. २

क्षीबितगर्वितदुर्जयमोहं, मोहितबहुजनकोकं रे ।
कोकिलकूजितकलरववाचं, वाचा प्रीणितलोकं रे ॥ शा. ३

लोकितसदसन्नानाभावं, भवभयदर्शितपारं रे ।
परकुमतीनां हतपाखण्डं, खण्डितमारविकारं रे ॥ शा. ४

कारं कारं विनयं वन्दे, वन्द्यमहं श्रितनागं रे ।
नागसुदृढं श्रीगौडीपार्श्वं पार्श्वेशं जितरागं रे ॥ शा. ५

रागान्निर्मम मम सुनिकामं, कामं पूरय सततं रे ।
सन्ततमस्तु च तव मे सेवा, सेवक विश इति घटतं रे ॥ शा.६

(स्रग्धरा)
इत्थं गौडीशपार्श्वं पृथुतरयशसं पार्श्वपार्श्वाख्ययक्षं,
बिभ्राणं ज्ञानपूर्वं तिलकमतितरां ये जना भक्तिमन्तः ।
सेवन्ते सन्नियुज्य प्रवरकरपुटं मूर्ध्नि सञ्जातहर्षं,
यन्नाम्नः स्रग्धरास्ते प्रतिदिनमचिरात् सातजातं लभन्ते । ॥७

पू.मु.श्री गुणविजयशिष्यपू.मु.श्री मानविजयविरचितम्

## ५१. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(हरिणी)

चरणकमलं श्रीवाग्देव्याः प्रसादपरं सतां
रुचिरमतिदं मत्वा नत्वा मुदा विहिताञ्जलिः ।
निजहृदि गतं कृत्वा श्रीमद्गुरोरभिधाजपं
शिवसुखकरं श्रीवामेयं नये स्तुतिगोचरम् ॥ १

कुशलकुसुमक्रीडारामप्रवर्द्धनवारिदो
भुवनजनताप्राणत्राणप्रधानकृपाम्बुधिः ।
वदनशतभृत्प्रादुर्भूतप्रभूतप्रभाभरो
जिनपतिरसौ श्रीमत्पार्श्वो ददातु सुखं सताम् ॥ २

तुरगवदनैर्गीतस्फीतस्फुरच्छुचिसद्यशा
विमलमतिभिर्ध्यातः प्रातर्महर्षिभिरादरात् ।

वचनरचनामाधुर्येणाऽधरीकृतसत्सुधा-
मधुरिमगुणो योऽसौ पार्श्वः श्रिये भवतान्मम ॥ ३

पदसरसिजं देवाः सेवाविधानविचक्षणा
विकचकमलैर्यस्याऽभीक्ष्णं यजन्ति जिनेशितुः ।
स्फुटगुणगणान् स्मारं स्मारं नमन्ति च भूस्पृशः
सकलभविनां वामेयोऽसौ श्रियेऽस्तु दिनागमे ॥ ४

भवति च नृणां यन्माहात्म्यान्महोदयभूषितात्
द्विरदतुरगक्षोणिर्योषायुता कमलाचला ।
स्फुरदसि नभोनीलाम्भोजप्रकारतनुच्छविं
सुरमणिनिभं तं श्रीपार्श्वं प्रणौमि सुखाप्तये ॥ ५

श्रवणपुटकैः पायं पायं वचोऽमृतमुत्तमं
सकलमनुजा नामं नामं यदीह पदाम्बुजम् ।
अभिनवयशो गायं गायं प्रमोदमुपागता
भवभवमहादुःखं त्यक्त्वा भवन्त्यजरामराः ॥ ६

जगति सकले योऽर्हन् दत्त्वा मुदा वरवार्षिकं
पदरज इवाऽत्याक्षीद्राज्यं क्षणेन च दुस्त्यजम् ।
उपशमरसाम्भोधिर्बोधिप्रदो व्रतमग्रहीत्
जिनदिनकरो वामेयोऽसौ प्रबोधकरोऽस्तु नः ॥ ७

कमठविहितज्ज्वालाजिह्वप्रतप्ततनुः फणि-
र्धरणपतितां यस्यालोकाद्गतः परसंसृतौ ।
स्फुरति महिमा [तत्रा]ऽद्यापि प्रवृद्धकलौ युगे
भवभयभिदो वामेयोऽसौ स एव भवे भवे ॥ ८

इत्यष्टकं प्रेमकरं प्रभाते पार्श्वप्रभोर्ये मनुजाः स्मरन्ति ।
देहे च गेहेऽपि भवन्ति तेषां श्रियः समाना सततं नराणाम् ॥९

इत्थं स्तुतः सकलकामितकृत् सुपार्श्वः
सूरीशितुर्विजयराजगुरोश्च राज्ये ।
प्राज्ञप्रधानगुणतो विजयस्य शिष्य-
मानेन भक्तिभरतो मधुपूर्णिमायाम् ॥ (वसन्ततिलका) १०

पू.मु. श्री उत्तमसागरशिष्यविरचितम्

## ५२. ॥ श्रीपार्श्वजिनाष्टकम् ॥

(तोटक)

सुरदानवमर्त्यमुनीन्द्रनतं नतभव्यजनावलिदोषहरम् ।
हरभूधरहारियशःप्रकरं करणेभनिषूदनसिंहनिभम् ॥ १

निभपादपपङ्क्तिविभङ्गगजं गजसिंहदवानलभीतिहरम् ।
हरहारविधूज्ज्वलकीर्तिकरं करुणोदधिमद्भुतरूपधरम् ॥ २

धरणेन्द्रनिषेवितपादयुगं युगबाहुयुगं कमलाक्षयुगम् ।
युगपज्जनसौख्यविधानपरं परमाप्तपतिं जितकर्मरिपुम् ॥ ३

रिपुमित्रसमाशयमर्हतमं तमउत्करवारकचारुगिरम् ।
गिरिराजमहीधरधीरगुणं गुणराशिविशुद्धितसद्भुवनम् ॥ ४

वनथम्भनदुःखसुखैकमतं मतिकौशिकमण्डलसद्द्युमणिः ।
मणिकाञ्चनरूप्यलसद्वरणं रणसज्जपदं गतजन्मदरम् ॥ ५

दरभाववियोजितकर्मगणं गणनायकचित्तकजभ्रमरम् ।
मरकाम्बुधिपानपयोधिमुनिं मुनिनायकमीप्सितकल्पतरुम् ॥६

तरुणार्कसमोन्नतसत्करजं रजताद्रिमनोज्ञविशुद्धकुलम् ।
कुलवारिधिचन्द्रमनन्तकलं कलधौतनिभं जिनपार्श्वविभुम् ॥७

विभुसौख्यकरं भवभीतिहरं हरहारकृतोधरणेन्द्रवरम् ।
वरपोतनिभं भववारिनिधौ निधिवत् सुखदं जिनपस्तवनम् ॥८

श्रीवामेयो जिनाधीशः शिवपद्यादिति स्तुतः ।
पाठकार्योत्तमाम्भोधिगुरूणां सुप्रसादतः ॥ (अनुष्टुप्) ९

पू.मु. श्री गुणरत्नविजयविरचितम्

## ५३. ॥ श्रीवरकाणकपार्श्वजिनस्तवनम् ॥

(तोटक)

नमतामितकामितकामघटं घटनापटुनोद्यनिधायि नटम् ।
निजरूपसुरूपतयाऽस्तजिनं वरकाणकराणकपार्श्वजिनम् ॥ १

भजताद्भुतभाग्यभवद्विभवं विभवं भविनां कृतभव्यभवम् ।
महिमर्द्धिमहोदधिमध्यजिनं वरकाणकराणकपार्श्वजिनम् ॥ २

महताहतमन्मथभूमिभुजं भुजगावनिवल्लभलम्बभुजम् ।
परमारकमारनिरासजिनं वरकाणकराणकपार्श्वजिनम् ॥ ३

श्रयत श्रितसेवकदौस्थ्यहरं हरभूधरबन्धुरकीर्त्तिधरम् ।
सततत्रिपरीतसमस्तजिनं वरकाणकराणकपार्श्वजिनम् ॥ ४

स्मरत स्मरणोत्सुकसूरिगणं गणनातिगतुङ्गगुणप्रगुणम् ।
नतिमात्रनिरस्तजगद्वृजिनं वरकाणकराणकपार्श्वजिनम् ॥ ५

कुरुतां नरमान्तरवैरिभरं भरतावनिजं च विभूतिमरम् ।
प्रणयन्तमिमं जनमप्यजिनं वरकाणकराणकपार्श्वजिनम् ॥ ६

नुतनित्यनमन्नृपनागनरं नरकादिकपातकवर्णनरम् ।
यमुनाजलवीचिलसद्वृजिनं वरकाणकराणकपार्श्वजिनम् ॥ ७

नयवानतिमार्गमुदारतरं तरसाहतदुर्गतिदुःखदरम् ।
मनसा वचसा वपुषा वृजिनं वरकाणकराणकपार्श्वजिनम् ॥ ८

श्रीमेदपाटमरुमण्डलसन्धिदेश-
श्रेयःप्रवेशवरकाणकसन्निवेशः ।
इत्थं स्तुतो विजयतां वरकाणनाम
श्रीपार्श्वनाथभगवान्गुणरत्नधाम ॥ (वसन्ततिलका) ९

पू.मु. श्री सुरप्रभविरचितम्

## ५४. ॥ श्रीस्तम्भनकेशपार्श्वजिनस्तवनम् ॥

(उपजाति)

श्रीपार्श्व विश्वव्यसनापहारी व्यापारनिर्व्याजनवौजसस्ते ।
अयं जनः स्तम्भनकावतंस ! विज्ञापनावैनयिकं तनोति ॥ १

विज्ञीप्सतोऽभीप्सितमन्यदेवान्न मे निषेधात् त्वयि पक्षपातः ।
स्वेनैव रागादिरुजातुराणां जिह्रेमि तेषां तु पुरः प्रजल्पन् ॥ २

जानामि जानासि यथा जिनेश !
स्वेनैव मे क्लेशमयीमवस्थाम् ।
तथापि नाख्यातमृते प्रभूणां प्रायः प्रतीकारपरः प्रयत्नः ॥ ३

तद्भूयसी भक्तिरहं पुरस्ते विज्ञापनामज्ञतमोऽपि कुर्याम् ।
त्वं वीतरागोऽपि मुहूर्तमस्यां निस्सीमकारुण्यनिधेऽवधेहि ॥४

मुक्त्यर्थमत्यर्थमुपैतु सेवां देवान्तराणां किमुत ब्रवीमि ।
संसारकारान्धगृहाज्जनोऽयं विमोक्ष्यते त्वद्वचसैव देव ! ॥ ५

प्रागेव दुष्कर्म कियन्न मूढैरुपार्जितं देव ! पुनर्यदेषाम् ।
देवान्तरोपासनया प्ररूढं बभूव यन्नाम नृणामृणार्णम् ॥ ६

उद्दामपुण्यद्रुमपीठबन्ध ! निर्व्याजबन्धो ! भुवनत्रयस्य ।
अन्धे भवान्धौ मम निर्विलम्बं
प्रयच्छ पित्सोः स्वकरावलम्बम् ॥ ७

इदं मदन्तःकरणं व्यधास्त्वं स्वां राजधानीमिति मे प्रमोदः ।
तथाऽप्यरीणां भयमान्तराणां निवर्त्तते नेति मनाग् विषादः ॥८

अगाधता मे मनसः किमेषा सामर्थ्यमन्तर्द्विषतामथेदम् ।
तवाऽथवोदासिरियं यदत्र त्वमेकतः कौतुकमन्यतोऽमी ॥ ९

मिलन्न वाऽन्तर्द्विषतां च किञ्चिन्मनो बभूवोभयचेतनं मे ।
स्वेनैव संयम्य जिनाधिराज ! मयाऽर्पितं तेन तवेत्यवेहि ॥१०

पश्य प्रमुग्धस्य पुरन्ध्रिसारीक्रीडासु कामः कितवः कथं मे ।
श्रेयोधनं त्वच्चरणप्रसादप्राप्तं हरत्यक्षपराजितस्य ॥ ११

विकल्परूपाः समिधः समाधिवह्नावुरुज्योतिषि जुह्वतो मे ।
त्वत्पादसेवाक्रतुयज्वनोऽक्षरक्षोभवक्षोभहरोऽभवस्त्वम् ॥ १२

न मे त्वदुक्तागमसिन्धुमध्यमग्नं मनो मीन इवेदमास्ते ।
बकोटवच्चाऽयमटाट्यमानः कामस्तटीं नोज्झति किं करोमि?॥१३

उपार्जिताल्पेतरपुण्यपण्यः शरण्य ! वैराग्यपुरं प्रवेक्ष्यन् ।
अहं त्वदीयागमपत्रहस्तोऽप्यलं विलम्ब्ये स्मरशौल्किकेन ॥१४

प्रभो प्रमादस्थलचारिणं मे मनोमृगं व्याध इवातिहिंस्रः ।
आः कामिनीविभ्रमपाशबद्धं
स्मरः शरैर्विध्यति किं विदध्याम् ? ॥ १५

न व्यापृतं येष्वमृतं वचस्ते रागाहिदंशोपहता जनास्ते ।
आः कामचित्याग्निनिमग्नकाया
भस्मीभवन्तीह भवश्मशाने ॥ १६

त्वमेकतः कर्मविषं करोषि कृशं भृशं चाऽन्यत एष कामः ।
पीडाकृता मय्यमुना सहैष
क्रीडाक्रमः कारुणिकस्य कस्ते ? ॥ १७

कलिः कुलाचार्य इवाऽयमार्यमर्यादया यन्त्रितमप्यतन्त्रम् ।
अमुं जनं नाथ ! नयत्यविद्याजनङ्गमासङ्गमनिस्त्रपस्त्वम् ॥१८

निशामिमां मोहमयीं हिमर्त्तौ मूर्त्त्यन्तरे नाथ ! कलौ प्रवृत्ते ।
नेष्यन्ति मर्त्त्याः कथमर्त्तिभाजो
भवत्पदध्यानकृशानुशून्याः ॥ १९

उग्रे कलौ ग्रीष्मतयाऽवतीर्णे क्षामा ममाशासरितस्तदीश ! ।
तत्पूरमेताः करुणाम्बुपूरं वर्षन्तु वर्षा इव दृष्टयस्ते ॥ २०

निर्णीतभाग्यस्तव दर्शनेन भक्तौ भवान् स्वानुभवश्च साक्षी ।
नैसर्गिकी ते करुणा जगत्सु
तथापि नाप्नोमि किमीप्सितानि ? ॥ २१

प्रियापि न प्रौढतया प्रहीणे प्रेमार्द्रमेषा मयि वर्त्तते श्रीः ।
तदस्मि योगैः सुभगम्भविष्णुर्भवन्मतोक्तैर्भवतादविघ्नम् ॥२२

देव ! त्वदुक्ताञ्जनशुद्धदृष्टिः पश्याम्यहं तत्त्वनिधीन्नवाऽपि ।
क्षोभेण रागादिभुजङ्गमानां यथातथं किन्तु न मे प्रवृत्तिः ॥२३

अनास्पदं नाथ ! यदीहितानां यच्चान्तरैर्वैरिभिरत्र दूये ।
स्वामिन्नुपेक्षा मयि सेयमस्तु न चेत् प्रभुत्वप्रतिपन्थिनी ते ॥२४

अदो मम क्लेशसहस्रमीश भृशं भवत्यागधियं ! धुनोति ।
त्वद्वन्दनानन्दरसामृतानामतृप्तिरेका तु करोति मन्दाम् ॥ २५

तवोपदेशेऽपि भवाम्बुराशौ दुरासदं देव ! चरित्ररत्नम् ।
परःसहस्राः परितस्तदीश ! रागादियादांसि तदन्तरायः ॥ २६

विक्रान्तमन्तर्द्विषतामनन्तमहं तु तद्वक्तुमनीश्वरोऽस्मि ।
न मे न विद्वानसिदुःखमाभिस्तदालजालाभिरलं कथाभिः ॥२७

ध्यानानलेन ज्वलता प्रकामं दग्धेषु दुष्कर्मसु मे मुनीश ! ।
इमास्त्वदालोकनहर्षजन्मा आपो निवापाञ्जलयो भवन्तु ॥ २८

विजित्य रागादिरिपूनुपेत्य स्वधाम विद्यावनितासहायः ।
तत्ते प्रसादात् परमोपदेशपीयूषपानोत्सवमाचरेयम् ॥ २९

वदावदातैर्भवदागमानां वाग्भैषजै रागरुजं निवर्त्य ।
कदा मया प्रौढसमाधिलक्ष्मीर्निवेक्ष्यते निर्वृतिनिर्विशेषा ॥३०

रागादिहव्यानि मुहुर्लिहाने ध्यानानले साक्षिणि केवलश्रीः ।
कलत्रतामेष्यति मे कदैषा वपुर्व्यपायेऽप्यनुयायिनी या ॥ ३१

अभूवमीश ! व्यपदेशवर्णैः सूरप्रभः किन्तु तदा प्रसीद ।
यथाऽस्तरागादितमःसमूहः स्फुरन्महाः स्यामहमर्थतोऽपि ॥३२

इत्थं स्तोत्रमयीं निशम्य करुणाकूपार ! पार्श्वप्रभो !
विश्वव्यापिविपद्व्यपोहनविधिव्यग्रोऽपि विज्ञापनाम् ।
देव ! स्तम्भनकेश ! केवलकलासीमन्तिनीसङ्गतां
स्वामिन् ! मां नय सिद्धिसौधवलभीनिर्यूहपर्यन्तिकाम् ॥ ३३
(शा.वि.)

पू.आ. श्री जिनभद्रसूरिशिष्येण मु. श्री सिद्धान्तरुचिकृतम्
गुप्तभेदाद्यलङ्कृतम्

## ५५. ॥ जयराजपुरीशश्रीपार्श्वजिनस्तवनम् ॥

शश्वच्छासनवैरिदानववधूवैधव्यदानोद्गतं
गीतं किन्नरकिन्नरीभिरभितो यस्य प्रतापं मुहुः ।
श्रुत्वा तेऽपि कुलाचलाः परिलसन्नीलप्ररोहच्छलाद्
रोमाञ्चं दधते स मे जिनपतिः श्रीआश्वसेनिः श्रिये ॥ १
(शार्दूलविक्रीडित)

यन्नाममन्त्राक्षरजापलेशाद् भव्या भवन्त्येव चिरं महेशाः ।
तं गुप्तभेदैर्भुवनाभिरामं श्रीपार्श्वनाथं विनुवामि कामम् ॥ २
(उपजाति)

परेभ्यो जिनेभ्योऽपि वृद्ध्यै जिनेशस्-
त्वदालोकनोत्काधिका स्याद् विशिष्या ।
न पूर्णोऽपि वार्णोऽधिरिन्दूदयार्थी
न वेलाग्रहार्थं न वेलासु भूयात् ॥ (कर्तृगूढम्) ३
(भुजङ्गप्रयात)

तदा मन्दरं गत्वरायुर्जनस्ते स्तुतेस्तात ! चेच्छित्तिविच्छित्त्यतुच्छः ।
न किं चात्र दारिद्र्यमुद्रादरिद्रो
भवेन्निर्धनः कामधेनुप्रधानः ? ॥ (कर्मगूढम्) ४

प्रसीद देवात्मपदाश्रयं श्रिया त्रिलोकलोकेतरलोकितस्थिते ! ।
त्वदेकरागस्य ममेदमान्तरं कदापि किं योजयितुं त्वमर्हसि ॥ ५
(करणगूढम्)

विदेकचित्तं चरितोच्च !
चारुचारित्र ! चक्षुर्विषयीकृतस्त्वम् ।
मां मुक्तिकान्तस्पृहयालुमेव
त्रायस्व विश्वेश्वर ! विश्वमूर्त्ते ! ॥ (सम्प्रदानगूढम्) ६

कृता देव ! वामाभुवस्ते स्तुतिर्यै-
र्न भूतं भयं भूरिभव्येषु तेषु ।
तदन्तर्गन्तं लोलचक्षुः कटाक्षैः
क्षतं वीक्ष्य किं मामुपेक्षां करोषि ॥ (अपादानगूढम्) ७

भवेतां पदौ सर्वदौ सर्वदा ते
स्तुतौ तात ! सैषा स्तुतिस्ते न सम्यक् ।
यदेते न रोगं च चानिष्टयोगं
न चेष्टैर्वियोगं लभन्ते कदापि ॥ (सम्बन्धगूढम्) ८

जिन ! रुचिरमणीनां भूषणानां
भरेणाभिनवलवणिमाब्धेऽग्रस्थितेनास्पदेन ।
तव चरणनखानां नाकिनाथेन
नम्रोन्नतमुकुटगलच्छोणाश्मनां मोह ऊहे ॥ (आधारगूढम्) ९

येन ते चरणपर्युपासिनाऽभावि
भाविशिवभूविलासिना ।
तेन सा त्रिजगती स लोचना
लोचना किमपरास्तशोचना ॥ (संबोधनगूढम्) १०

पर्वतात् धीरिमाधारो गम्भीरो वारिधेरपि ।
दानशौण्डोऽम्बुदेभ्योऽपि देवो वश्चित्तचिन्तितम् ॥ ११
(क्रियागूढम्)

आनन्दरोऽरुचिरपातककूटकालः
क्षिप्तस्त्वयावनतदेव ! नयाश्रितस्त्वम् ।
किं पूर्यते मम स तेन गुणोर्मिमालिर्नो-
वैरितस्त्रसति यो भजते हितात् त्वाम् ॥ १२

(सप्तकारककसंबोधनैकक्रियाद्विकर्मगूढम्)

ये भजन्ति नियतं त्रिकालवित्
त्वां नवात्माभिमतांस्तनोषि किम् ।
देव ! सेवकमिमं विभालयं किं
निभालयसि नो भवालयम् ॥ (पादगूढम्) १३

नाथ ! ते पदपयोजदर्शनं पूर्वपुण्यविभवेन यो जनः ।
दर्शनं सुपदताप नाथते पूर्वपुण्यविभवेन तासु न ॥ १४

(द्विपादगूढम्)

सन्दोहापोहकारी मदमदनगजे केशरी सारवाक्यो
निर्वाणं सम्प्रयातो वृजिनगणभवामापदां पिष्टिसज्जः ।
यो नित्यं वन्द्यमानः सुरनरविसरैर्नागचिह्नः परघ्नो
नन्द्याद् व्याधिप्रमन्था मुकुरसममुखः पार्श्वराट् कृष्णतेजाः ॥१५

(श्लोकगूढम्)

श्लोकश्चायम्-
संसारवासनिर्नाशकरणं परमं जिनम् ।
ये वदन्ते सकृदपि स निधिः सुखसम्पदाम् ॥ १६

इत्थं मया कम्रकवित्वपङ्क्ति-कर्पूरपूरैर्महितः सुयुक्तिः ।
जीरापुरीशः सुखमातनोतु स्वकीयसिद्धान्तधियं धिनोतु ॥१७

पू.मु. श्री सिद्धान्तरुचिकृतं श्रीजयराजपल्लीमण्डन-

## ५६. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(शर्मस्तवाऽपराभिधानम्)

(वसन्ततिलका)

शर्म प्रयच्छ सुदशर्म तदेव शर्म
शर्मह्यसारविदशर्मवितानशर्मन् ।
शर्मप्रभासितसुशर्मनरेशशर्म
शर्मप्रनिर्मितसुशर्मपुरेशशर्म ॥ १

शर्मर्त्यसन्नतकृशर्मदहृद्धशर्म
शर्मज्जनास्तकुदशर्मलसद्वशर्म ।
शर्मर्मभेदकुलिशर्महिमालिशर्म
शर्मध्यनिर्मितदिशर्म यशोभृशर्म ॥ २

शर्म श्रियोऽस्मि कुलशर्म च जातिशर्म
शर्म श्रुतस्य बलशर्म च कीर्त्तिशर्म ।
शर्म प्रियस्य सुतशर्म कलत्रशर्म
शर्मप्रभुत्वजनशर्महभेन्यशर्म ॥ ३

शर्म प्रसिद्धहरिशर्म सयज्ञशर्म
शर्मप्रभूतगुणशर्म ससोमशर्म ।
शर्म प्रशस्य जयशर्म सदेवशर्म
शर्मप्रणूत जयशर्मपुरस्थशर्म ॥ ४

शर्मप्रदः सकलशर्मकरोऽस्तु शर्म
शर्मप्रकाश्यमलशर्मकृतेऽस्तु शर्म ।
शर्म प्रथो ग्रथितशर्म सुमोऽस्तु शर्म
शर्मक्रमाशिषि सशर्म... शर्म ॥ ५

शर्मत्वदा विदुरशर्म पणाद्यशर्म
शर्मत्वशर्म तरशर्मतमित्विशर्म ।
शर्म प्रभास्वदिनशर्म वदायिशर्म
शर्मत्वकाम्ययनशर्म मुखानि शर्म ॥ ६

शर्म प्रभो ! प्रियमशर्म न किं त्वशर्म
शर्मश्रियो नृपतिशर्म सुरेन्द्रशर्म ।
शर्मप्रधानतमशर्मद मुक्तिशर्म
शर्मत्वभागसदशर्मद देहि शर्म ॥ ७

शर्मत्तचन्द्रसदृशर्मह यास्यशर्म
शर्मच्छिदा कुसुमशर्मदनादि शर्म ।
शर्मत्स्यसृज्जलधिशर्मणि नेत्रशर्म-
शर्मत्युपास्य शुभशर्मरकाद्यशर्मन् ॥ ८

शर्मप्रदानिशमशर्मवतामशर्म
शर्मन्ननन्त तमशर्म शिवस्थशर्मन् ।
शर्मप्रहारि सुरशर्म मनुष्यशर्म
शर्मप्रमोच्य भवशर्म तदाश्वशर्म ॥ ९

शर्म श्रितातुलमशर्म ममानुशर्म
शर्मप्रधावितमशर्म मनःकुशर्म ।
शर्मक्षयि प्रतनुशर्म वहाप्यशर्म
शर्मत्विदं हि शिवशर्म नुवेत्य शर्म ॥ १०

इत्थं श्रीजयराजपल्लिनगरीसीमन्तिनीशेखरः
श्रीमत्पार्श्वजिनेश्वरः सविजयप्रौढप्रभावाकरः ।

शर्मप्रौढपदत्रिरूपकलिताद्यन्तान्तरालाखिल-
प्रोल्लासिक्रमवृ[त्त सिद्ध] विनुतः सम्पद्यतां शर्मणे ॥ (शा.वि.)११

पू.मु.श्री रामविजयकृतं 'सारङ्ग' शब्दयुतम्

## ५७. ॥ श्रीपार्श्वजिनलघुस्तवनम् ॥

वामासुत(तं) त्रिभुवनसारङ्गं, वन्दे मर्दितमदसारङ्गं,
निस्तारितसारङ्गम् ।
प्रणतसुरासुर[नर]सारङ्गं, वादिवृन्दवारणसारङ्गं,
भविककुमुदसारङ्गम् ॥ १

ध्वनिगम्भी(भी)रगर्जनसारङ्गं, अघरजगञ्जहरणसारङ्गं,
पुण्यतविषसारङ्गम् ।
वरतरसिंहासनसारङ्गं, दिग्धवलनयस(शो)भरसारङ्गं,
सुरविरचितसारङ्गम् ॥ २

प्रवरान्वयदीपनसारङ्गं, अधरशोणिमनिर्जितसारङ्गं,
मुक्तचक्रसारङ्गम् ।
अत्यु(त्र्यु)द्धु(द्धू)निगरणसारङ्गं, अनुक्र(कृ)ततनुछविशितसारङ्गं,
दमितेन्द्रियसारङ्गम् ॥ ३

क्रोधाचलदारणसारङ्गं, मानभुजङ्गजङ्गमसारङ्गं,
मायावल्लिसारङ्गम् ।
लोभमतङ्गगन्धसारङ्गं, मनुजमानसमानससारङ्गं,
ध्वस्तमोहसारङ्गम् ॥ ४

आननश्वासरुचिरसारङ्गं, दर्शनघनजनतासारङ्गं,
मण्डितध्वजसारङ्गम् ।
स्पर्शनभारसहनसारङ्गं, रोधितचपलचित्तसारङ्गं,
मौलिछत्रसारङ्गम् ॥ ५

स्थाने नयनयुगं सारङ्गं, अङ्गतरङ्गसुरभिसारङ्गं,
ध्वानशिखासारङ्गम् ।
पदपङ्कजसुरपतिसारङ्गं, सदृशकण्ठकन्दलसारङ्गं,
मधुरस्वरसारङ्गम् ॥ ६

स्तोत्रं श्रीजैनराजं विरचितमधिकं प्राप्य सान्निध्यमेत-
दब्दे जैनप्रमाने(णे) नयन-जलनिधो(धि)-चन्द्रपक्षे प्रयुक्ते ।
सारं सारङ्गशब्दे(दैः) श्रवणपुटसुखं कारकं कामितस्य,
श्रीरामदो(दौ)विजये(?) हितकरममलं शृण्वतां श्रेयसेऽस्तु ॥
(स्रग्धरा) ७

पू.मु. श्री सोभाग्यमूर्तिविरचितम्

## ५८. ॥ श्रीपार्श्वनाथजिनस्तोत्रम् ॥

जीरापल्लिपुरोत्तमाङ्गतिलकः श्रीपार्श्वकल्पद्रुमः
श्रीवर्मोदरनन्दनः शिवकरः श्रीअश्वसेनाङ्गभूः ।
काशश्वासभगन्दरज्वरभरातीसारसंस्फेटकैः
श्रीदेवेन्द्रनरेन्द्रचन्द्रपटलैः संसेव्यमानोऽवतात् ॥(शा.वि.) १

न प्रेता नैव भूता न च निचितबला मुद्गला नो पिशाचा
नो शाकिन्यो न चोरा न च नरपतयो विग्रहा ग्रहा नो ।

नो रोगाः स्पष्टमष्टाधिकशतमितयस्तं जनं पीडयन्ति
श्रीजीरापल्लिपार्श्वस्मृतिरतिमहिमा स्थेयसी यस्य चित्ते ॥ २
(स्रग्धरा)

देशाधीशसापदलक्षहृदयालङ्कारसारस्फुरन्-
मुक्तास्रक्फलवर्धिकाभिधपुरीमध्यस्थितो नायकः ।
सर्वाशाः परिपूरयन्निजमहास्फूर्त्या सुकीर्त्या दध-
च्छोभां कामपि वः पिपर्त्वभिमतं श्रीपार्श्वचिन्तामणिः ॥ ३
(शा.वि.)

सौभाग्यमूर्तिः सश्रीको नानागोपगणैः स्तुतः ।
रातु मां परमां प्रीतिं श्रीपाश्र्वः पुरुषोत्तमः ॥ ४

पू.मु.श्री ज्ञानचन्द्रकृतम्

## ५९. ॥ श्रीपार्श्वजिनस्तवनम् ॥

त्रिभुवनपूरुषतारक ! तारकतुल्यसमाज्ञ !
सुरसेवितपदपङ्कज ! पङ्कजये सुप्राज्ञ ! ।
शोभनधर्मप्ररूपक ! रूपकलाकलगेह !
पाश्र्वाऽघं मे श्याऽमल ! श्यामलताग्रिमदेह ! ॥ १

गतिविजितस्तम्बेरम ! बेरमहाद्भुतरूप !
जितगाम्भीर्यसमुद्र ! समुद्रनताखिलभूप ! ।
दर्शितधर्मसमूह ! समूहरहितधृतचित्त !
दुर्गतिपङ्क्तेरक्षय ! रक्षय मां वृषवित्त ! ॥ २

वरकल्याणकृतामर !, तामरसाद्भुतपाद !
प्रास्तसमस्तघनाघ !, घनाघनसमनिर्ह्राद ! ।
नामविनिर्मितशिवसुख !, वसुखसमाश्रितधर्म !
सकलकलासुमनोहर !, नो हर गर्हितकर्म ॥ ३

भवदावानलजीवन !, जीवनयस्थितिकार !
त्याजितविग्रह ! विग्रहसाध्वसकाष्ठकुठार ! ।
कुमतमतङ्गजचित्रक !, चित्रकराक्षरसौख्य !
मम कर्माणि विदार !, विदारय विष्टपमुख्य ! ॥ ४

विलसत्सत्प्रणिधान !, निधानसमाक्षरदान !
नतसुरनरसमुदाय !, मुदाय ! सदागतमान ! ।
श्रीजिनपार्श्वनिशाकर !, साकरवचनविचार !
ज्ञानं धर्मनिधे ! हि, निधेहि मयि स्फुटसार ॥ ५

पू.मु.श्री नयसागरविरचितम्

## ६०. ॥ श्रीगौडिपार्श्वजिन-स्तवनम् ॥

श्रेयोरमाकीर्तिविभूतिवल्ली-
विस्तारजीमूतमनन्तशक्तिम् ।
स्फुरत्प्रभाभासितविश्वविश्वं,
श्रीगौडिकं पार्श्वजिनं स्तुवेऽहम् ॥ (इन्द्रवंशा) १

दरिद्राधिदुर्व्याधिजाड्यादिदोषै-
र्नराः कुग्रहैः पीड्यमानाः सरोषैः ।
इवार्के भवद्भक्तिभाजो हि कोकाः,
प्रभो ! दृष्टमात्रे त्वयि स्युस्त्वशोकाः ॥ (भुजङ्गप्रयात) २

ज्ञानं प्रयच्छतु करुणानिधे ! विभो !,
पापं निवारयतु च किङ्करोऽस्मि ते ।
एनं प्रपूरयतु मनोरथं हितं,
स्वामिन् करोतु मम दिशां प्रभावतीम् ॥ (प्रभावती) ३

हर्षप्रपूरितहृदस्त्रिजगज्जनालि-
वृन्दा अमेयगुणसन्मकरन्दलोभाः ।
कामं प्रकामवरभक्तनतोत्तमाङ्गा-
श्चुम्बन्ति ते त्रिभुवनाधिप ! पादपद्मम् ॥ (वसन्ततिलका) ४

प्रबलसकलविघ्नध्वान्तविध्वंसभानुं,
दुरितनिहवाक्ष्यक्षामकर्तुं कृशानुम् ।
अरिकरिहरिवारिव्यालवेतालदस्यु-
प्रमुखभवभयानि त्वां स्मरन्तो न ययुः ॥ (मालिनी) ५

शशिनमुदितं सौम्यं ज्योत्स्नाप्रियो, मुदिरं शिखी,
विशदकिरणं सूर्यं कोको, द्विपो जलवालकम् ।
विकसितसुमं भृङ्गो, हंसो यथा शुचिमानसं,
कुशलजननीं युष्मन्मूर्तिं निरीक्ष्य मुदं लभे ॥ (हरिणी) ६

त्रैलोक्यान्तः प्रकटनकरं विश्ववृन्दिष्ठजिष्णु-
श्चन्द्रादित्याधिकतरविभं ध्वस्तनिःशेषदोषम् ।
भव्याम्भोरुड् विकसितकरं नन्दतु प्राज्ञवर्ण्यं,
व्याप्तं कान्तं चिरमनुपमं नाथ ! ते मूर्तितेजः ॥(मन्दाक्रान्ता)७

जातोऽद्याहं सनाथो, मम जनिरनघा, पावनं नेत्रयुग्मं,
नष्टा दुष्टाङ्गपीडा, फलितसुरतरुः कामधेनुः प्रसूता ।

साफल्यं जिह्वयाऽऽप्तं, पुलकितहृदयं, वामवामेयशम्भो !,
चेत्त्वं स्वामिन् ! नयाब्धे ! सुरमहित ! मया पार्श्वदेव ! स्तुतोऽसि॥८
(स्रग्धरा)

पू.मु.श्री जिनपद्मविजयविरचिता
(यमकमया)
चारुपमण्डन–

## ६१. ॥ श्रीपार्श्वनाथस्तुतिः ॥

तमालनीलच्छविपिच्छिलाङ्गः सिद्धान्तमुद्रासहितो मनोज्ञः ।
जीयाज्जिनेन्द्रः प्रभुपार्श्वनाथः सिद्धान्तमुद्रासहितो मनोज्ञः ॥१
(उपजाति)

वरेण्यलावण्यनिधे ! विधेहि सदा महानन्दमहासुखानि ।
प्रभावभङ्गीभरितत्रिलोक ! सदामहानन्दमहासुखानि ॥ २
(उपेन्द्रवज्रा)

सदर्थमुक्तोपमतारकाय सुबन्धुरारामजयाङ्गसार ।
सदर्थमुक्तोपमतारकाय सुबन्धुरारामजयाङ्गसार ॥ ३
(उपेन्द्रवज्रा)

सत्यागमासारवरङ्गनाना–दराधिकान्तो लुसमाननन्द ।
सत्यागमासारवरङ्गनाऽनादराधिकान्तो लसमाननन्द ॥ ४
(उपजाति)

गुरो सदालोक नबाल भाल विभावरीनाथविभास्वभाव ।
वामेय मे कामितका तेनु श्री–गरो सदालोकनवाऽऽलभाल॥५
(उपजाति)

कल्याणमालाकरणाधिहारी कल्याणमालाऽकरणाऽऽधिहारी ।
कल्याणमालाऽकरणाधिहाऽरी-
कल्याणमाऽऽलाकरणाऽधि हारी ॥ (इन्द्रवज्रा) ६

इत्थं स्तुतं सुयमकैर्यमकैरवेन्दुं चारूपभूमिरमणीरमणीयहारम् ।
श्रीपार्श्वनाथजिनयं जिनपद्मयाऽऽढ्यं
ध्यायामि भावसहितं सहितं समन्तात् ॥ (वसन्ततिलका) ७

पू.मु.श्री हंसरत्नविजयविरचितम्

## ६२. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥

(भुजङ्गप्रयात)

महानन्दलक्ष्मीघनाश्लेषसक्त !
सदा भक्त(ण्य)वाञ्छाविदानाभियुक्त ! ।
सुरेन्द्रादिसम्पल्लतावारिवाह !
प्रभो ! पार्श्वनाथाय नित्यं नमस्ते ॥ १

नमस्ते लसत्केवलज्ञानधारिन् !
नमस्ते महामोहसंहारकारिन् ! ।
नमस्ते सदानन्दचैतन्यमूर्त्ते !
नमस्ते नमस्ते नमस्ते नमस्ते ॥ २

नमस्ते जगज्जन्तुरक्षासुदक्ष !
नमस्तेऽनभिज्ञाततत्त्वैरलक्ष्य ! ।
नमस्तेऽव्ययाचिन्त्यविज्ञानशक्ते !
नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३

नमस्ते महादर्पकन्दर्पजेत-
र्नमस्ते शुभध्यानसाम्राज्यनेतः ! ।
नमस्ते मुनिस्वान्तपाथोजभृङ्ग !
नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४

नमस्ते सदाचारकासारहंस ! ।
नमस्ते कृपाधार ! विश्वावतंस !
नमस्ते सुरप्रेयसीगीतकीर्ते !
नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५

नमस्ते सुदुस्तारसंसारतायिन् !
नमस्ते चतुर्वर्गसंसिद्धिदायिन् ! ।
नमस्ते परब्रह्मशर्मप्रदायिन् ।
नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६

नमस्तेऽमितागण्यकारुण्यसिन्धो !
नमस्ते त्रिलोक्याप्तसम्बन्धबन्धो ! ।
नमस्ते त्रिलोकीशरण्याय नाथ !
नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७

नमस्ते सुरेन्द्रादिसंसेव्यपाद !
नमस्ते नतेभ्यः सदा सुप्रसाद ! ।
नमस्ते तमः स्तोमनिर्नाशभानो !
नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८

नमस्ते विभो ! सर्वविद्यामयाय
नमस्ते लसल्लब्धिलीलायुताय ।

नमस्तेऽसमश्रेष्ठदेवेश्वराय
नमस्ते नमस्ते नमस्ते नमस्ते ॥ ९

जय त्वं जगन्नेत्रपीयूषपात्र !
जय त्वं सुधांशुप्रभागौरगात्र ! ।
जय त्वं सदा मन्मनःस्थायिमुद्र !
जय त्वं जय त्वं जय त्वं जिनेन्द्र ! ॥ १०

इत्थं स्वल्पधियाऽपि भक्तिजनितोत्साहान्मया संस्तुतः
श्रीशंखेश्वरपार्श्वनाथ ! नतसद्भक्तैकचिन्तामणे ! ।
सर्वोत्कृष्टपदप्रदानरसिकं सर्वार्थसंसाधकं
तन्मे देहि जिनाङ्घ्रिपद्मविमलश्रीहंसरत्नायितम् ॥(शा.वि.)११

पू.मु.श्रीहंसरत्नविजयविरचितम्

## ६३. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥

(आर्या)

सकलसुरासुरवन्द्यं हृद्यगुणं जगदनिन्द्यमहिमानम् ।
श्रीशङ्खेश्वरपुरवरमण्डनमभिनौमि पार्श्वजिनम् ॥ १

त्रिभङ्गी
शिवसुखदातारं विश्वाधारं सौम्याकारं नेतारं
जितमदनविकारं करुणागारं हतरिपुवारं जेतारम् ।
कृतभवनिस्तारं परमोदारं स्तवनापारं त्रातारं
गुणपारावारं कीर्तिस्फारं केवलधारं धातारम् ॥ २

आनन्दसक्तं तोषितभक्तं छद्मविमुक्तं सुव्यक्तं
मदमत्सरमुक्तं तारणसक्तं विषयविरक्तं शिवरक्तम् ।
अव्याहतभद्रं धैर्यगिरीन्द्रं क्षमासमुद्रं सन्मुद्रं
मुखनिर्जितचन्द्रं प्रणतसुरेन्द्रं महामुनीन्द्रं निस्तन्द्रम् ॥ ३

सुखदायीशरणं दुःखितशरणं वन्दितचरणं विगतरणं
कृतदीनोद्धरणं कलिमलहरणं विमलीकरणं प्रवरपणम् ।
प्रकटीकृतविनयं दर्शितसुनयं प्रवचननिलयं सत्यमयं
अगणितगुणनिचयं मुनिजनहृदयं
लब्धसुविनयं क्षपितभयम् ॥ ४

कवलीकृतकालं नापिकरालं नतजनपालं सुदयालु(लं)...
दुष्कृततृणदात्रं स्तुतिशतपात्रं सुखकृद्यात्रं सद्गात्रम् ।
भयलतालवित्रं परममपवित्रं चारुचरित्रं दिनरात्रं
............................................... ॥ ५

जृम्भितकलिजातं त्रिभुवनतातं योगिध्यातं विख्यातं
विहिताघविघातं क्षपितासातं निर्जितपातं निष्णातम् ।
सम्भावितदासं मुक्तायासं विश्वावासं सद्भासं
कीर्तिस्थगिताशं विभुमविनाशं सदाप्रकाशं पूर्णाशम् ॥ ६

अकलितमहिमानं बुद्धिनिधानं मुक्तिनिदानं गतमानं
कृतकमठविगानं जगत्प्रधानं परमात्मानं सुज्ञानम् ।
यदुकूलकृतरक्षं सर्वसमक्षं विद्युतविपक्षं दुर्लक्षं
दुर्गतिहतिदक्षं साधुसपक्षं वशीकृताक्षं पद्माक्षम् ॥ ७

स्तुतिशतैरमेयं परममुपेयं सुरनरगेयं सुध्येयं
अनुभवविज्ञेयं स्वान्तध्येयं वि(जि) ष्णुमजेयं वामेयम् ।
भुजगेश्वरकेतुं भवजलसेतुं मलमपनेतुं सद्धेतुं
शान्त्या समुपेतं श्रुतिसमवेतं सिद्धिनिकेतं वन्दे तम् ॥ ८

गीतिः

इत्थं स्तुतोऽतिभक्त्या
निजसेवां सततमीश ! मे वितर ।
बुधनाननरत्नचरणा-रविन्दसंसेविहंसरत्नाय ॥ ९

पू.मु.श्री सुखसागरविजयविरचितम्

## ६४. ॥ श्रीशङ्खेश्वरपार्श्वनाथाष्टकम् ॥

(भुजङ्गप्रयात)

महानन्दकल्याणगेहं सुदेहं, लसद्सिद्धिरामावरं साधुगेहम् ।
अनन्तप्रभावं जितद्वेषमाशु, स्तुवे पार्श्वशङ्खेश्वरं सौख्यकारम् ॥१

कृतारिष्टशान्तं गुणश्रीनिशान्तं, नितान्तं सदा चारुरम्याङ्गकान्तम्।
दलत्क्लेशसंखेदने पार्श्वधारं,
स्तुवे पार्श्वशङ्खेश्वरं सौख्यकारम् ॥ २

वरानेकवन्दार(रु)भूपालवन्द्यं, त्रिलोके जनानन्दने कल्पवृक्षम्।
ज्वलन्मोहदावानले वारिधारं,
स्तुवे पार्श्वशङ्खेश्वरं सौख्यकारम् ॥ ३

कलौ सागरे मज्जतां यानपात्रं, घृणानर्थकं शालिलावैकदात्रम् ।
कृपासागरं केवलज्ञानधारं, स्तुवे पार्श्वशङ्खेश्वरं सौख्यकारम् ॥४

जिनाधीशयोगीश्वरं योगधेयं, जितक्रोधकेलिं भवद्वान्तहेयम् ।
जरामृत्युसन्तापपापापहारं, स्तुवे पार्श्वशङ्खेश्वरं सौख्यकारम् ॥५

बृहद्रोगनीरागनागप्रजान्तं, भयं नो भविदेहिनां यत्प्रसादात् ।
तमाक्षिप्तदुष्टप्रधृष्टारिवारं, स्तुवे पार्श्वशङ्खेश्वरं सौख्यकारम् ॥६

सुधास्वादसुस्वादवाक्यं सुवाक्यं,
मिलदेकन्यासमहे(न्दैः?)प्रगीतम् ।
जिनश्रीकुचालङ्कृतोत्तारहारं,
स्तुवे पार्श्वशङ्खेश्वरं सौख्यकारम् ॥ ७

जिनानां जिनो ज्येष्ठसौख्यप्रदोऽयं, जगद्भूषणं नीलजीमूतछायम्।
अनन्ताष्टकर्माद्रिषु वज्रधारं, स्तुवे पार्श्वशङ्खेश्वरं सौख्यकारम् ॥८

इत्थं स्तुतो देव मयाष्टकेन ................................. ।
साम्राज्यलक्ष्मीविपुलं सुखं मे,
श्रीपार्श्वनाथं सुखसागर ! संप्रदेहा ॥ ९

पू.मु.श्री भावदेवविजयविरचितः

## ६५. ॥ श्रीपार्श्वनाथ-जिनस्तवः ॥

(अनुष्टुप्)

जय त्रिभुवनोत्तंस ! पार्श्वनाथजिनेश्वर ! ।
सुराऽसुरनत ! स्वामिन्नमेयमहिमानिधे ! ॥ १

तव निध्यानसद्ध्यानसिद्धयोगजुषां जिन ! ।
व्याधिराधिरिवाऽसत्तिमियर्ति न कदाचन ॥ २

तव शान्तवपुः कान्तिनीरपूरप्लुतात्मनाम् ।
दुष्टोऽपि दहनोऽनिष्टं द्वेषो वा कर्तुमक्षमः ॥ ३

आस्तामन्यजलोलङ्घवार्त्ताधीरधियः प्रभो ! ।
त्वामवाप्य सदाधारं, तरन्ति भवसागरम् ॥ ४

ध्यातत्वन्नाममन्त्राणां, कथमाशीविषा भिये ? ।
नेष्टे दृष्टिविषोऽप्येषां, नाथ ! मिथ्यात्वपन्नगः ॥ ५

यान्त्यभीष्टं सधन्वासि त्वत्पादशरणाः पदम् ।
चौरैरक्षैरिवाऽध्वस्ताः, क्रान्त्वा भवमिवाटवीम् ॥ ६

प्रभोः फणिमणिज्योतिः, प्लुष्टाऽन्तवैरिभूरुहाम् ।
तत्पल्लवनिभाः पुंसां, अन्ये सन्त्येव नारयः ॥ ७

सनाथानां त्वया नाथ ! श्वापदा विपदे कृतः ? ।
तेषां कर्माष्टपाद्मोहशरभः करभायते ॥ ८

अत्राऽमुत्राऽपि नो तेषां, दोषदौर्गत्यजा विपत् ।
भवन्तं ये सदानन्द श्रेयोनिधिमधिश्रिताः ॥ ९

रोगा-ऽनल-जल-व्याल-चौरा-ऽरि-श्वापदा-ऽऽपदः ।
बहिरन्तरपि स्वामिन्न भिये त्वयि वीक्षिते ! ॥ १०

तव स्तवनवज्राङ्गीकृतरक्षाः सदा प्रभो ! ।
यान्ति दुर्गमपि श्रेयो, भावदेवमुनिस्तुत ! ॥ ११

पू. मु. श्री रविसागरविरचितम्

## ६६. ॥ श्रीमगसी-पार्श्वनाथ-स्तवनम् ॥

(कुटुंब-नाम-गर्भित) - (राग केदारगुडी तथा आसाउरी)

श्रीमगसीपुरमण्डन ! शम्भो ! दय जयदायक ! नायक-शम्भो ।
**श्रीपार्श्वा**मयसञ्चयदम्भो गममपनय मदनाघमदम्भो ॥ १

**माता**राभवतो भुवि कस्यां **बाबा**रानुकृतिर्नहि कस्याम् ।
**काका**राद्भुतभूघनकान्ता **काकी**र्णाननुमति ते कान्ता ॥ २

**मामारः** परिभवतु नितान्तं **मामी**सुरभवता गमतान्तम् ।
**मासुख** शिति दशमी भव पोषे **मासी** हितकारक [सुखपोषे]॥

**भाई**भासुरभूघनकान्ते ! **बहनि**घनीव्रजततततमकान्ते ! ।
**ससरो**दयधारकहरिनूता **सासू**नृततनुभा भुवि नूता ॥ ४

**भा** भुजयामलमञ्जुलकाया **भाभी**रुचिर वितरतु काया ।
**देवर**णोज्झितसुखकरवाणी **देवराणी** अयि तरतनुबाणी ॥ ५

**दिकरो** निखिलकलागुणदाना **दिकरी**तिः परकुशलनिदाना ।
**भाणे जय** कारणजितमाना **भतरी**ज्येष्ठरुचे हसमाना ॥ ६

(कलश)

स्तोत्रेऽत्रास्ति कुटुम्बशब्दमिलनं दृग्दृष्टमात्रं यथा
विज्ञायाऽसफलं भवेऽपि निखिलं कौटुम्बिकं तत्तथा ।
श्रीमत्**पण्डितराजसागर** सुधीः शिष्यो महानन्दनं
**श्रीपार्श्वं रविसागर**स्त्व **मगसी**चूडामणी नौत्यलम् ॥ ७

(शार्दूलविक्रीडित)

पू. मु. पद्मसागरविजयविरचितम्

## ६७. ॥ श्रीअजारपार्श्वनाथस्तवनम् ॥

अजारपार्श्वस्तुतिमार्गमानये नयेन सेवाविशदेन भास्वता ।
तथा यथा जन्म निजं महोदयप्रभुत्वपूतं सुखसन्ततिश्रितम् ॥१
(वंशस्थ)

सौराष्ट्रदेशागमनश्रमो मे त्वद्दर्शनाद्देव ! बभूव सिद्ध्यै ।
शीतद्युतेः क्षीरसमुद्रसङ्गाद्
व्योमावगाहः किल कान्तिवृद्ध्यै ॥ (इन्द्रवज्रा) २

शत्रुञ्जयः पर्वत एष सिद्धिक्षेत्रं बभूवोत्तमकालजानाम् ।
दुःकालजानामपि नाथ ! सिद्धिक्षेत्रं त्वमेवास्यतुलप्रभावः ॥३
(इ.वज्रा)

श्रीनेमिनाथादिजिनेश्वराणां कल्याणमालापदमुज्जयन्तः ।
बभूव भूध्रः सकलाङ्गिनां तु त्वमेव कल्याणनिधिर्विभासि ॥४
(उपजाति)

अजारपार्श्व ! स्तुतिमार्गमित्थं नीतो विनीतेन मयाऽतिमोदात् ।
चेतःसरोमङ्गलपद्मसागरं करोतु सेवाकर ! लोकवत्सलः ॥ ५
(उपजाति)

पू.मु.श्री आनन्दवल्लभविजयविरचितम्

## ६८. ॥ लोद्रवमण्डनश्रीपार्श्वनाथाष्टकम् ॥

अश्वसेननरेन्द्रस्य, वामादेव्याश्च सत्सुतः ।
श्रीपार्श्वो जाग्रदैश्वर्यो, भूयान्मे भवभित्तये ॥ (अनुष्टुप्) १

(तोटकम्)

भविदुःखदवानलमेघसमो, जनसौख्यकरः शिवशर्मगतः ।
शुभभावविकासनसूर्यनिभो,
जय पार्श्वजिनश्वेरकामघटः ॥ २

अतिदुर्जयकामनिवारक हे, त्रिदशोत्तमसेवितपत्कज वै ।
गतमोहविनाशितकर्मदलो, जय पार्श्वजिनेश्वरकामघटः ॥ ३

वरकृष्णतनो शुभकल्पतरो, जगदीश्वर शोभननित्यसुधीः ।
वरकेवलबोधितभव्यजनो, जय पार्श्वजिनेश्वरकामघटः ॥ ४

गतकल्मष-साधितमोक्षसुखः फणिचिह्नगतः शिवसार्थपतिः ।
भवसन्ततिसञ्चितकर्महरो, जय पार्श्वजिनेश्वरकामघटः ॥ ५

निरुपाधिकसर्वकलासुनिधि-र्निजकान्तिविनिर्जितदेहिगणः ।
अघसन्ततिमात्रविभेदकरो, जय पार्श्वजिनेश्वरकामघटः ॥ ६

विजितान्तरवैरिगणो भगवान्, समतारसपूरगतः सततम् ।
नवरत्नितनुः सुविभुः सुखदो, जय पार्श्वजिनेश्वरकामघटः ॥७

अतिमन्त्रसुगर्भितरम्यतरं तव नाम जपन्ति नरा इह ये ।
परियान्ति सुखानि च ते हि कलौ,
जय पार्श्वजिनेश्वरकामघटः ॥ ८

वेदरस-सिद्धि-चन्द्रवर्षे ज्येष्ठे सिते दले ।
राकायां च तिथावेष संस्तुतः पार्श्वनायकः ॥ ९

विदुषो रामचन्द्रस्य, विनेयेन हितैषिणा ।
आनन्दवल्लभेनेति, सः श्रीलोद्रवपत्तने ॥ (अनुष्टुप्) १०

पू.मु.श्री सूरचन्द्रर्षिविरचितम्

## ६९. ॥ श्रीफलवर्ध्धिपार्श्वनाथस्तोत्रम् ॥

(इन्द्रवंशा)

श्रेयोमयं ही बलमालमालमा-
ह्लादावलीदं सकरङ्करं करम् ।
श्रेयोऽग्रलक्ष्म्याः प्रवरं वरं वरं,
पार्श्वं भजेऽहं सकलं कलङ्कलम् ॥ १

यः शर्मदं प्रष्ठतमस्तमस्तमः-
संस्फेटनांशुर्विदरं दरन्दरम् ।
विश्वस्य देवैर्महितं हितं हि तं,
पार्श्वं भजेऽहं सकलं कलङ्कलम् ॥ २

सभ्याब्जबोधे सुभगं भगं भगं-
युक्तं तपोऽर्चिर्व्रजिनं जिनं जिनम् ।
शंमारतौ वै विशदं शदं शदं,
पार्श्वं भजेऽहं सकलं कलङ्कलम् ॥ ३

तेजोनिशान्तं तरसा रसारसा-
लीलं शिवागे जलदं लदं लदम् ।

शिवाङ्गनाया ह्यपतिं पतिं पतिं,
पार्श्वं भजेऽहं सकलं कलङ्कलम् ॥ ४

अंहस्त्रियामोष्णकरं करङ्करं,
कल्पावदं सर्वविदं विदं विदम् ।
कैवल्यकारं सुकुलं कुलं कुलं,
पार्श्वं भजेऽहं सकलं कलङ्कलम् ॥ ५

चन्द्रेन्दुकीर्तिं सुमनोमनोमनो-
वाञ्छाप्रदं सद्विनयं नयन्नयम् ।
ज्ञानस्वदाने धनदं नदं नदं,
पार्श्वं भजेऽहं सकलं कलङ्कलम् ॥ ६

एवं पार्श्वजिनेश्वरः सुयमकैर्भक्त्या प्रशस्तः स्तुतः,
श्रीमच्छ्रीफलवर्द्धिराट् सुमनसामीशैः सतां वन्दितः ।
चारित्रोदयपादुपास्तिरसिकेन प्रातु सौख्यं मया,
सद्वामात्मभवो हि विश्वशिवकन्दः सूरचन्द्रर्षिणा ॥(शा.वि.)७

पू.आ.श्री रत्नशेखरसूरिशिष्यकृतम्

महीशानापुरालङ्कार-

## ७०. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(मन्दाक्रान्ता)

श्रीमान् पार्श्वः प्रभुरभिमतं भावभर्तुर्बिभर्तु
स्मर्तुः पुंसः पुरवरमहीशानकोर्वीवतंसः ।
रात्नं भास्वत्तिलकमलके भाति यस्य स्मरारे
स्तार्तीयीकं नयनमनिभं चित्रभान्वात्मकं तु ॥ १

श्रीवामाभूर्भवतु भवतुद् दृग्द्वयीपुण्ड्रदम्भात्
साक्षात्कृत्याद्रढयदिति यः सत्सुरत्नव्ययवस्थाम् ।
स्थित्या तुल्येऽकलयत किल ज्ञानशीले फलादौ
ताभ्यामत्राभ्यधिकमहिमामर्शनं दर्शनं तु ॥ २

विश्वाधीशः शमयतु सतामश्वसेनाङ्गजन्मा
जन्माद्यर्त्तीः प्रतिकृतिगतैर्नेत्रयुग्मोद्घ(च्च) पुण्ड्रैः ।
तुल्यावस्थौ विभवमदनौ ज्ञापयन् कार्यरूपौ
धर्मं प्रोच्चं न्यगददनयोः कारणं यस्त्रिवर्गे ॥ ३

सत्त्वानां स्यात् सुहृदसुहृदोस्तुल्यवृत्तिर्यदासौ
बुद्धिः शुद्धा सपदि घटते केवलश्रीस्तदैव ।
सव्यान्याक्ष्णोरिव समभृता पुण्डभङ्ग्या ममास्ये
मूर्तिर्यस्य ध्रुवमिति वदत्यस्तु पार्श्वः श्रियेऽसौ ॥ ४

पार्श्वः सोऽर्हन् सुरपरिवृढाभ्यर्हणीयाङ्घ्रिपद्मः
पद्माभोगं घटयतु गतच्छद्मसेवोद्यतानाम् ।

रत्नोद्भूता तिलककलिता यस्य भालाग्रभागे
भाति प्रौढोदयगिरिशिरस्यंशुमन्मण्डलीव ॥ ५

ईदृग् नान्यत् पदमुदयकृद् विद्यतेऽस्माकमुच्चै-
स्त्रैधेऽप्यस्मिञ् जगति बत सञ्चिन्त्यमानं किमेवम् ।
ध्यात्वा लोकत्रितयकमलाः संश्रियुर्यन्मुखाब्जं
दृग्द्वन्द्वोद्यत्तिलकतनवः पार्श्वदेवः स जीयात् ॥ ६

बिभ्रद् गर्भात् प्रभृति विमलज्ञानऋद्धीः समिद्धा-
स्तिस्रोऽजस्त्रं प्रभुरतिशयी कृत्स्ननृभ्यस्तदाभूत् ।
इत्यैतिह्यं स्मरति मतिमान् प्रेक्ष्य यस्याक्षिपुण्ड्रान्
सार्वः पार्श्वः स भवतु भवक्ष्मारुहे पार्श्ववन्मे ॥ ७

त्रय्यास्तेजश्चयशुचिवपुर्मार्गगैर्मार्ग्यमाणः
क्षिप्तोत्सर्पन्निबिडजडिमादृक्प्रपञ्चैकबीजम् ।
ईदक्षोऽपि श्रयति न तुला पङ्कजन्मर्द्धिकृत्वा -
यद्वक्त्रेणाम्बरमणिरसौ मां पृणात्वेष पार्श्वः ॥ ८

सप्तस्फूर्जत्फणमणिलसल्लोचनोद्यल्ललाम-
व्याजात् प्राभृत्यकृत किमिह स्वस्वमेकैकरत्नम् ।
दिक्पालौघो दशहरिदधीशस्य यस्य प्रसत्त्यै
शैवं शर्म प्रदिशतु सतामाश्वसेनिर्जिनोऽसौ ॥ ९

श्रीवामेयः प्रथयतु ममामेयमाहात्म्यगेयः
प्रेयः श्रेयस्तिलकनयनाद्यत्फणारत्नदम्भात् ।
धत्ते दातुं दश सुरमणीन् भास्वरांस्तुल्यकालं
चेतोऽभीष्टान्यधिदशहरित्तस्थुषां नेमुषां यः ॥ १०

पोपोषीति स्वयमविरतं पोषयेच्चापरैर्नः
स्वामी विश्वेऽप्ययमिति मुदा किन्त्वमान्तो यदङ्के ।
एतेऽभूवन् बहिरनिभृताः साधुधर्मप्रकाराः
प्रेङ्खत्पुण्ड्रेक्षणफणमणिव्याजतः पातु सोऽर्हन् ॥ ११

अष्टानां यः शुभमृगदृशां केलये सिद्धिनाम्नां
धत्ते रात्नान् प्रवरमुकुरान् स्वेन पाणौ कृतानाम् ।
प्रोद्यत्पुण्ड्रस्फुटमणितनून्नूनमन्यूनऋद्धयै
भूयाद् भूयोऽतिशयभवनं वः स वामाङ्गजोऽर्हन् ॥ १२

एकाग्रोऽष्टौ प्रवचनमताः पालयेद् यः किलाम्बाः ।
स स्यान्मद्वत् परमपदसम्प्राप्तिमात्रं किमेतत् ।
ज्ञीप्सुर्न्यस्ताः स्वशिरसि सतां दर्शयेद् यः स्फुटास्ताः
प्रोद्यत्पुण्ड्रस्फुटमणिनिभाद् भूतय स्तात् स पार्श्वः ॥ १३

त्रैलोक्येऽप्यद्भुतगुणवरं प्राप्य वेगाद् वरीतुं
प्रीत्योपेता किल नवनिधिश्रीवधूर्धूतभेदम् ।
सम्यक् सम्भावयितुमभवत् सङ्क्रमाद् योऽपि तावन्-
मूर्त्तिः पुण्ड्रस्फुटमणिगणे स श्रिये वोऽस्तु पार्श्वः ॥ १४

शङ्कैः काष्ठाष्टकगतनृणां मुक्तिमार्गप्रचारे
दृग्व्यालोऽपि प्रबलतमसश्छित्तये व्यक्तशक्तीन् ।
अष्टौ पुण्ड्रस्फुटमणिनिभाद् यो बिभर्त्ति प्रदीपान्
स श्रीवामात्मजजिनपतिः पातु नः पङ्कपातात् ॥ १५

अङ्गान्यष्टौ न जहति हिताभोगयोगस्य येना-
कालैकात्म्यार्जितदृढसुहृत्त्वानि मुक्तेऽपि यस्मिन् ।

अत्रस्थां यत्प्रतिकृतिमपि प्रेमनिर्बन्धतः किं
पुण्ड्रप्रेङ्खत्फणमणिमिषात् सैष देवो मुदे वः ॥ १६

शास्त्रेऽस्माकं मुनिभिरवमं द्रव्यतो मङ्गलत्वं
ख्यातं तन्नः प्रवितर शुभं भावतस्तत् स्वसंस्थम् ।
विज्ञप्त्यै यं किमिति समुपेतानि सान्द्राणि भद्रा-
ण्यष्टौ पुण्ड्रस्फुटमणिनिभाद् भद्रकृत् सोऽस्तु पार्श्वः ॥ १७

नन्द्याद् विद्याधरनरसुरारब्धपादाब्जसेवः
पार्श्वो देवः फणमणिलसत्पुण्ड्रसङ्क्रान्तियोगात् ।
दध्रे मूर्तिर्नव हितमनाः किं नु सत्त्वादितत्त्वा-
न्याख्यातुं यः कृतिजनततेर्विस्तरेणैककालम् ॥ १८

स्थास्नुर्यस्य प्रकटमहिमान्याननेकाननेऽस्मिन्
श्रीमान् शान्तः प्रविदितरसाधीशिताऽसाधयन्नु ।
लक्ष्यं पुण्ड्रच्छलमसिवरं सूर्यहासं द्विभेद-
द्वेषिश्रेणीमदभिदमसौ पार्श्वदेवो मुदे वः ॥ १९

प्रापत् कोटिं लवणिमरमा यस्य सद्देहगेहे
तेनासौ किं कनति निहितो रत्नपुण्ड्रच्छलेन ।
शृङ्गे तस्य प्रसृमररुचीश्चीनचीरध्वजः श्री-
पार्श्वः शश्वत् स भवतु भवभ्रान्तिभिद् भावभाजाम् ॥ २०

कुर्याद् धूर्यांश्चरणरथधूर्धारणे वारणेन्द्र-
प्रोन्निद्राङ्गच्छविरविरतं पार्श्वविश्वेश्वरो वः ।
भाले यस्य स्फुरति तिलकं कम्रकालेयकान्ति

प्राणप्राणां भुवि शिवपुरप्रापकः किं नु दण्डः ? ॥ २१

तन्याद् धन्यात्मकजनततौ नस्ततौजः प्रतिष्ठां
श्रीवामासूस्तिलकमलकालङ्कृतिर्भाति यस्य ।
मन्ये न्यञ्चत्कुगतिनगरद्वारसंरोधकारी
भक्तानामप्रतिघमरिघः सज्जवज्रात्मकोऽसौ ॥ २२

वक्त्राम्भोजेऽभिमुखमभितो बिम्बभृद्धिः फणोद्यद्-
रत्नैस्तारावलयमभवत् तस्य मध्ये दधौ च ।
सद्दृग्दृश्यं ध्रुववररमां यस्य दीव्यल्ललाम-
स्थाम स्थेयः स दिशतु जिनः कर्मवैरिच्छिदे नः ॥ २३

देयाद् गेयानणुगुणरमां पार्श्वनामा ममार्ह-
न्नैतद्रात्नं तिलकमनिभं यस्य बाभाति भाले ।
किन्त्वाक्रान्तं प्रकटमहिमामत्र मन्त्रप्रयोगै-
र्गोशीर्षोत्थं भुवनसुदृशां वश्यकृद् विष्वगेतत् ॥ २४

एवं श्रीगुरुरत्नशेखरतुलस्फूर्जत्फणामण्डलः
श्रीपार्श्वस्तिलकाङ्कितार्घरचनारुच्यः स्तवेन स्तुतः ।
दद्यान्मे निरवद्यमुद्यमगुणं स्वाज्ञापरिज्ञाविधौ
येन स्यां नवसोमसुन्दरपरब्रह्मैकलीलालयः ॥ २५

पू.आ.श्री हेमविमलसूरिशिष्य-

पू.मु.श्री आनन्दमाणिक्यविजयविरचितम्

## ७१. ॥ श्रीनवखण्डपार्श्वनाथस्तवनम् ॥

विपुलमङ्गलमण्डलदायकं जिनपतिं प्रभुपार्श्वसुनायकम् ।
सकलसम्पदवृद्धिविधायकं नमत रूपरमासुमसायकम् ॥ १

रासक-

कमठमहासुरमदभरभञ्जन ! भविकजनावलिमानसरञ्जन!।
खञ्जननयनविशाल ! तु जयु जयु ॥ २

श्रीअश्वसेनभूमीपतिनन्दन ! पापतापसन्तापनिकन्दन ! ।
चन्दन शीतलवाणि ! तु जयु जयु ॥ ३

असमसंसारपयोनिधितारण ! विषमगहनगतिवारण ! ।
चारणकर्ममहीन ! तु जयु जयु ॥ ४

निरुपमसकलमहागुणधारक ! सेवकलोकसमीहितकारक ! ।
तारकलाकलिताङ्ग ! तु जयु जयु ॥ ५

काव्यम् -

पातालधिपशेषनागवदलं जिह्वासहस्रद्वयं
वक्त्रे स्यादपि यस्य बुद्धिरतुला जीवस्य तुल्या तथा ।
सोऽपि श्रीजिनपार्श्वराज ! तव यान् स्तोतुं भवेन्नो क्षमः
सङ्ख्यातीतगुणानहो जडमतिः स्तोष्ये कथं तान् प्रभो ! ॥ ६

रासालुद्धउ-

रसनाविंशतिशतं यदि वदने वदने वचनविलासे रे ।
नागाधिप इव भवति निकामं कामं करसोल्लासे रे ॥ ७

देवसूरीश्वर इव यदि हृदये हृदयेश्वरसुविकाशे रे ।
विलसति विमलमतिर्जनजीवन ! पीवन तव गुणदासे रे ॥ ८

यदि बहुसागरजीवितमानं मानद ! भवति संसारे रे ।
अमरनायक इव घनघनसहितं हितकर ! भव दववारे रे ॥ ९

तदपि तवामलगुणगणराशिं वासितभुवनविचालं रे ।
नोतुमलं न भवामि हि जिनवर ! नवरससरसविशालं रे ॥१०

काव्यम् -

श्रीसर्वज्ञ ! जिनेश ! तावकलसत्पादारविन्दद्वयं
प्रातर्यो नमति प्रभो ! प्रमदतो लक्ष्मीविलासालयम् ।
प्रीतिप्रेमवशादवश्यमवशा सेवेत सेवापरा
पद्मा पुण्यपरंपरा परनरं तं सर्वकालं कलम् ॥ ११

आढेआ-

कमलाकेलिनिवास ! शमरसविहितोल्लास ! ।
वासवनिकरपते ! जय जय विमलमते !
रे जिन ! जय जय विमलमते ॥ (आंकणी) १२

वामादेवीजननीजात ! प्रभावतीवर ! गतितात ! ।
सुखकर ! विनतजने चरणपवित्र ! मुने ! जिन ! ॥ १३

मोहनवल्लीकन्द ! निर्मितनयनानन्द ! ।
सुन्दरसदयमते ! त्वयि मनो मे रमते जिन ! ॥ १४

उपशमरसभृङ्गार ! जगतीयुवतिशृङ्गार ! ।
शं कुरु मे भजते भवसागरविरते जिन ! ॥ १५

काव्यम् -

वाणी सैव मनोहरा ननु यया त्वं गीयसे नित्यशः
श्लाघ्या दृष्टिरियं यया च नितरां त्वं दृश्यसेऽहर्निशम् ।
हस्तः शस्ततरः स एव फलदो यः पूजयेत् त्वां जिनं
ध्यानं धन्यतमं तदेव सुखदं यस्मिन् प्रभो ! त्वं भवेः ॥ १६

फाग-

विषयमहारसपूरितदूरितधर्ममतिम् ।
शरणागतमथ मां जिन ! अवृजिनं कुरु सुमतिम् ॥ १७

मदनमहोरगसुविषमविषमलभरितहृदम् ।
त्वं जिननायक ! मां प्रति सम्प्रति दिश सुपदम् ॥ १८

क्रोधदवानलकोलितमीलितनयनयुगम् ।
कुरु वचनामृतपोषणतोषणतः सुभगम् ॥ १९

लोभप्रलोभकवञ्चितलुञ्चितधर्मधनम् ॥
मामथ जिनवर ! पालय लालय सर्वदिनम् ॥ २०

काव्यम्-

त्वां ये नाथ ! नुवन्ति सादरतया निन्दन्ति ये पापिन-
स्तेषां वाञ्छितसम्पदं च विपदं घोरां ददासि स्फुटम् ।
नीरागोऽपि गतस्पृहोऽपि विगतद्वेषोऽपि सङ्गीयसे

विज्ञैश्चित्रमदोऽथवा हि महतां माहात्म्यमीदृग्विधम् ॥ २१

त्रिपदी–

शृङ्गाररसकला नारी सौभाग्यसुन्दरी रे ।
जाने वरसुरी रे अभिनवयोवन हरिहरी रे ॥ २२

कुचभरनमदङ्गी सुरङ्गनिरङ्गी रे ।
प्रेमपुष्पभृङ्गी रे विरचितमृगमदभङ्गी रे ॥ २३

शीलशालि सदाचार सततमुदारा रे ।
सुधर्मविचारा रे जिनगुणगानसुतारा रे ॥ २४

आनन्दपूरितबाला तव सुममालाभिः ।
विविधविशालाभी रचयति पूजां वरकला रे ॥ २५

एवं संस्तुतिगोचरं जिनवरं नीत्वा गुणैर्भासुरं
त्वां श्रीमन्नवखण्डपार्श्व ! सुतरामेकं तु याचे वरम् ।
देया मे गुरुराजहेमविमलं त्वं सर्वसौख्यास्पदं
ज्ञानं मान्यतमं महोदयमना आनन्दमाणिक्यदम् ॥ २६

पू.मु.श्री लक्ष्मीलाभविजयप्रणीतम्

## ७२. ॥ श्रीनवपल्लवपार्श्वनाथस्तोत्रम् ॥

(वसन्ततिलका)

उद्यत्फणामुकुटभूषितमस्तकान्त !
त्रैलोक्यलोकनयनामृतपूर्णचन्द्र ! ।
विख्यातमङ्गलपुरस्थित ! वीतराग !
मां पाहि पाहि नवपल्लवपार्श्वनाथ ! ॥ १

कन्दर्पराजघनमानतमोवितानं
प्रद्योतनामलकलानिलयाब्जनेत्र ! ।
शुद्धेन्द्रनीलमणिनीलतमालनील !
मां पाहि पाहि नवपल्लवपार्श्वनाथ ! ॥ २

काश्मीरसम्मिलितचन्दनचर्चिताङ्ग !
सद्गाङ्गवारिभृतकुम्भकृताभिषेक ! ।
श्रीमालतीबकुलचम्पकपुष्पपूज्य !
मां पाहि पाहि नवपल्लवपार्श्वनाथ ! ॥ ३

कादम्बिनीपतिहठद्रुमसत्कुठार !
नीहारगौरजिनशासनपद्मभानो ! ।
काकोदरेन्द्रवरिवस्यितपादयुग्म !
मां पाहि पाहि नवपल्लवपार्श्वनाथ ! ॥ ४

ह्रीँकारसारविहिताश्रयसिद्धिलक्ष्मी-
लाभेन कोमलगिरः स्तवनीयमूर्त्ते ! ।
वामेय ! गेय ! सुरकिन्नरकामिनीभिः
मां पाहि पाहि नवपल्लवपार्श्वनाथ ! ॥ ५

पू.मु. श्री रविसागरविजयविरचितम्

यमकाङ्कितम्

## ७३. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(उपजाति)

श्रीअश्वसेनस्तनयो नयो नयोत्-
पत्तिर्विनूतो विधुनाऽधुना धुनाः ।
दुःखान्यवद्यै रहितो हितोऽहितो-
ज्झितः प्रभो ! श्याममहा महा महाः ॥ १

कैवल्यचञ्चत्कमला मला मला-
नालिङ्गित ! ध्वस्तबलाबलाबलाम् ।
जगत्प्रभो ! भाजि महोमहो महो-
दयः पुनानो जगतां गतागताम् ॥ २

भेजे भवन्तं सकलाः कलाः कलाः
स्वामिन् ! मुनीनामचलाचलाचला ।
मृगाङ्कवन्नात्र कलं कलं कलं
मर्त्यस्य मोक्षे सदनं दनं दनम् ॥ ३

ध्याने गते वल्वलिके लिके लिके
स्थाणुः सरोजे त्वयि मायि मायिमा ।
दूरेऽस्ति किं त्वद्गरिमारिमारि-
मातन्वत्यमूलं तरसा रसा रसा ॥ ४

सम्मोहितोर्वीवलया लया लया
मर्त्यप्रभास्वत्प्रमदा मदामदा ।

ध्यानं न जह्रे भवतोऽवतो वतो-
दारा मरीचीः किरणे रणे रणे ॥ ५

विभो ! भवन्तं जनता नता नता
मसावलीवैंपदरा दरा दराः ।
चिक्षेप किं भक्तिमती मती मती
सम्बिभ्रती सद्विरती रतीः रती ॥ ६

भवत्प्रभावाच्छमधामधामधा
पुनर्भवे सद्वगरं गरं गरम् ।
बिभ्रद् गुणौघं कमितामितामिता
क्षयं न किं मुक्तिजिनाजिनाजिनाः ॥ ७

सर्वे नराः शर्मधरा धरा धरा
इवासभीजन्त्वसुरासुराः सुराः ।
स्पष्टीकृता पुण्यमया मया मया
युक्तं त्वया कामनया नया नयाः ॥ ८

श्रीराजसागरमनीषिभुजिष्यशिष्यः
श्रीमत्सुधीसहजसागरसुप्रभावात् ।
भक्ताशयः शिवमुदे रविसागराह्व-
स्तुष्टाव पार्श्वमधिपं यमकाष्टकेण ॥ (वसन्ततिलका) ९

पू.मु. श्री विद्याविमलविजयशिष्यप्रणीतम्

## ७४. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(द्रुतविलम्बित)

निजगुरोरभिनम्य पदाम्बुजं स्तुतिपथं जिनपार्श्वमहं नये ।
भविकलोकचकोरनिशाकरं भजत पार्श्वजिनं जनशङ्करम् ॥ १

विततसाधुगुणास्पदसातदं सुकृतकाननपद्मवनाम्बुदम् ।
निजगभीरगुणैर्जितसागरं भजत पार्श्वजिनं जनशङ्करम् ॥ २

निजसुरूपविनिर्जितमन्मथं विनतमानवदर्शितसत्पथम् ।
सकलसिद्धिकरं करुणापरं भजत पार्श्वजिनं जनशङ्करम् ॥ ३

कठिनकल्कवितानिवारकं विकटसङ्कटकोटिविनाशकम् ।
निखिलविघ्नहरं श्रमणेश्वरं भजत पार्श्वजिनं जनशङ्करम् ॥ ४

सकलसेवकनिर्मलबुद्धिदं कुमुदबान्धवकान्तगुणास्पदम् ।
धरणनाकिनतं परमेश्वरं भजत पार्श्वजिनं जनशङ्करम् ॥ ५

दुरितमानकदाग्रहखण्डनं कुमतिमोहमहारिपुभञ्जनम् ।
विगतदोषभरं सुखसागरं भजत पार्श्वजिनं जनशङ्करम् ॥ ६

विजितदुर्जयदर्पकदर्पकं प्रवरनिर्वृतिसत्पथदायकम् ।
रुचिरभक्तिविनम्रसुरासुरं भजत पार्श्वजिनं जनशङ्करम् ॥ ७

नलिनपुष्पविकस्वरलोचनं सकलमङ्गलवल्लिघनाघनम् ।
प्रवरलक्षणलक्षितसंवरं भजत पार्श्वजिनं जनशङ्करम् ॥ ८

प्रवरमङ्गलमण्डलसन्मुखं विमलकीर्तिविकाशितदिङ्मुखम् ।
विमलकेवलचारुदिवाकरं भजत पार्श्वजिनं जनशङ्करम् ॥ ९

इत्थं पार्श्वजिनेश्वरः स्तुतिपथं नीतो मया भक्तितः
श्रेयःसद्म सदश्वसेननृपतेर्वंशैकचूडामणिः ।
श्रीविद्याविमलाभिधेयसुकवेः शिष्याणुना श्रेयसे
सर्वारिष्टविनाशकस्तनुमतां देयात् सदा मङ्गलम् ॥(शा.वि.)१०

पू.मु.श्री जिनचन्द्रराजविजयकृतः

## ७५. ॥ श्रीपार्श्वनाथस्तवः ॥

(द्रुतविलम्बित)

भुजगलक्षणलक्षणलक्षितं, लवणिमादि गुणालिभिरिक्षितम् ।
प्रमदपुष्करपर्वतगापित, प्रणत पार्श्वपतिं परमोन्नतिम् ॥ १

नतसुरासुरदानवमानवं, कमठमानहरं रमया नवम् ।
करणकान्तिजितारुणभानवं, विहितकल्मषकार्मणता नवम् ॥२

जिनवरः शुभसंततिकारको, भवतु मे भवदुःखनिवारकः ।
करणवारणसंयमनाङ्कुशः, कुशलकाननवर्द्धनवाङ्कुशः ॥ ३

जिनवरो जयताज्जनतालयो, गुणमणीरमणीयकलालयः ।
अ(वृ)जिनवारिजभञ्जनसद्गजो, निखिलवासवसंस्तुतपङ्कजः॥४

अनन्तसद्बोधसमस्तवेदी, पार्श्वस्वयम्भू र्भवभीतिभेदी ।
पायादपायाद् भविनो विशेषात् विध्वस्त मोहावनिर्निमेषात् ॥५

(उपजाति)

भवन्तं सुपार्श्वं भवद्भूतिगेहं, कलाकेलिशं यद् लसन्नीलदेहम्।
महानन्दवल्लीव सदा मोददक्षं, परार्थप्रदं पार्श्वनाथं भजेऽहम् ॥६

(भुजङ्गप्रयात)

एवं स्तुतः श्रीजिनचन्द्रराजः, हर्षप्रकर्षै विमलो विराजः ।
विघ्नोरगे सन्नतनागराज, श्री सुंदरत्वं च ददत् समाजः ॥ ७

(उपजाति)

पू.मु. श्री पार्श्वचन्द्रविजयप्रणीतम्

जीरापल्लीमण्डन-

## ७६. ॥ श्रीपार्श्वनाथ-अष्टकम् ॥

(अनुष्टुप्)

प्रणम्य परमात्मानं, श्रीपार्श्व तव दर्शनात् ।
पवित्रं विशदं चाहं, म्लानवासोज्जलादिव ॥ १

चरीकर्ति न चासारं बालधीवृद्धिसिद्धये ।
श्रीमत्पार्श्वजिनेन्द्राय तेषां जन्मफले ग्रहि ॥ २

उत्थितस्तव धाताय श्रीवामानन्दनोज्जितः ।
सारस्वती मृज्जुं कुर्वे गतित्रस्तेसतां न सां ॥ ३

श्री आश्वसेने सिद्धान्ताराधनन्तावकं विना ।
विदधानोपि नो सिद्ध्येत्, प्रक्रियां नातिविस्तराम् ॥ ४

इन्द्रादयोपि यस्यान्तं फणिनां त्वमनुग्रहात् ।
कृतवानुत्तमं तस्य, युक्तं क्रमचणोऽभवः ॥ ५

पारदृश्वा शुभो... तर्क्यो, न ययुः शब्दवारिधेः ।
ऋद्धिर्वृद्धिर्निधिःसिद्धिः भवेत् पार्श्वसेवकः ॥ ६

पादप्रसादपार्श्वस्य, श्रीमतो हिममैनसः ।
प्रक्रियान्तस्य कृत्स्नस्य युक्तं क्लेशो भवे भवे ॥ ७

सुधान्धसां गुरुः पारं, येषां नाप समायुषा ।
तान् गुणान् पार्श्वदेवस्य, क्षमो वक्तुं नरः कथम् ॥ ८

इतिश्रीमान् जिनः पार्श्वो, जीरापल्लिपुरी प्रभुः ।
प्रणीतः पाश्वचन्द्रेण, भूयाद् भूरिविभूतये ॥ ९

पू.मु. श्री लक्ष्मीवल्लभविजयरचितः

## ७७. ॥ श्रीपार्श्वनाथस्तुतिः ॥

(भुजङ्गप्रयात)

सदा नीलगात्रं, लसद्ज्ञानपात्रं
कृतारातिभङ्गं परित्यक्तसंगम् ।
विशुद्धस्वरूपं स्फुरद्रोमकूपं,
विमोहं प्रमाथं भजे पार्श्वनाथम् ॥ १

नमन्नाकिकोटीमहारत्नकोटी,
रदीप्तप्रपादं प्रणष्टप्रमादम् ।
प्रसन्नस्वभावं सुगम्भीररावं,
विमोहं प्रमाथं भजे पार्श्वनाथम् ॥ २

सुरामाभिरामा स्फुरत् कान्तिवामा-
ऽश्वसेनाङ्गजेशं गदद्रौ गजेशम् ।
जगज्जीवबन्धुं कृपागाधसिन्धुं,
विमोहं प्रमाथं भजे पार्श्वनाथम् ॥ ३

भयध्वान्तहेलिं महानन्दकेलिं,
भुवि ख्यातवीरं सुवर्णाद्रिधीरम् ।

सुपद्मानिवासं सुकीर्तिप्रकाशं
विमोहं प्रमाथं भजे पार्श्वनाथम् ॥ ४

सुरारातिदर्प्पप्रचण्डोग्रसर्प्पं,
प्रमाथे सुपर्णं मनोहारिवर्णम् ।
स्फुटाशीर्षशोभं सुपर्यस्तलोभं
विमोहं प्रमाथं भजे पार्श्वनाथम् ॥ ५

गुणानामगारं परिप्राप्तवारं,
विशुद्धान्ववायं पराभूतमायम् ।
जयार्हज्जिनेन्द्रं विनम्रो रुकेन्द्रं
विमोहं प्रमाथं भजे पार्श्वनाथम् ॥ ६

इति सुललितवृत्तैः, सदभुजङ्गप्रयातै,
र्विलसदमलभक्त्या स्तोत्रमेतत् पतेद् यः ।
रचितमिदमुदारं सर्वकल्याणकारं,
सकलविमललक्ष्मीवल्लभं सर्वदा स्यात् ॥ (मालिनी) ७

पू.मु. श्री सिद्धान्तराजविजयकृतम्

## ७८. ॥ श्रीफलवर्द्धिकापार्श्वनाथस्तोत्रम् ॥

(पादाकुलक)

कुशलकमलनिर्मल सारंगं, केवलकुवलयकलसारंगं
स्वरधिक्कृतसारंगं पार्श्वजिनं भज कृतसारंगं ।
रागपरागमहासारंगं जनमधुकरसारंगं ॥ १

वामोदरमानससारंगं, कुमतमतङ्गघटासारंगं
मुक्तवधूसारंगं, शिवमाकन्दरुचिरसारंगं ।
क्रोधधराधरनवसारंगं छिन्नसबलसारंगं ॥ २

शालिनयनशोभासारंगं, नक्रशिखानिर्जितसारंगं
गतदूषणसारंगं अधर सुरक्तिमजितसारंगं ।
सिद्धिपुरी गति तति सारंगं, नष्टकुमतिसारंगं ॥ ३

घोरमानविषधरसारंगं, मायाचूरुहभिदिसारंगं
पापपङ्कनाशकसारंगं कीर्त्तिविभिन्नधवलसारंगं ।
लोककन्ददारणसारंगं त्यक्तगदासारंगं ॥ ४

सुमतिकलादृतयति सारंगं, मदतृणदहनसहनसारंगं
कठं श्री सारंगं, श्वासोच्छ्वाससरससारंगं ।
वचनजलदरतभविसारंगं, शुष्ककपटसारंगं ॥ ५

कान्तिघनाघनसारंगं, जिनपदपङ्कजजनसारंगं
ध्वस्ततमःसारंगं, पार्श्वजिनं विगतरसारंगं ।
वन्दे धृतलाञ्छनसारंगं, शोभतयशसारंगं ॥ ६

एवं पार्श्वजिनेश्वरं क्षितिजगत्कार्येन्दुमानाब्दके
मासे फाल्गुनिके विशुद्ध नवमी भास्वत् तिथौ भावतः ।
रम्य श्रीफलवर्द्धिका पुरपतिं, लावण्यपुण्यापणं
सेवे श्री जिनचन्द्रसूरिविनयी सिद्धान्तराजः सदा ॥(शा.वि.)७

पू.मु.श्री सोमसेनविजयविरचितम्

## ७९. ॥ श्रीचिन्तामणिपार्श्वनाथ-स्तवनम् ॥

(उपजाति)

श्रीशारदाऽऽधारमुखारविन्दं सदाऽनवद्यं नतमौलिपादम् ।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभं नौमि निरस्तपापम् ॥१

निराकृताराातिकृतान्तसङ्गं सन्मण्डलीमण्डितसुन्दराङ्गम् ।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥२

शशिप्रभा-रीतियशोनिवासं समाधिसाम्राज्यसुखावभासम् ।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥३

अनल्पकल्याणसुधाब्धिचन्द्रं सभावलीसून-सुभाव-केन्द्रम् ।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥४

करालकल्पान्तनिवारकारं कारुण्यपुण्याकर-शान्तिसारम् ।
चिन्तामणिं चिन्ततकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥५

वाणीरसोल्लासकरीरभूतं निरञ्जनाऽलङ्कृतमुक्तिकान्तम् ।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥६

क्रूरोपसर्गं परिहर्तुमेकं वाञ्छाविधानं विगताऽपसङ्गम् ।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥७

निरामयं निर्जितवीरमारं जगद्धितं कृष्णपुरावतारम् ।
चिन्तामणिं चिन्तितकामरूपं पार्श्वप्रभुं नौमि निरस्तपापम् ॥८

अविरलकविलक्ष्मीसेनशिष्येन लक्ष्मी-
विभरणगुणपूतं सोमसेनेन गीतम् ।

पठति विगतकामः पार्श्वनाथस्तवं यः
सुकृतपदनिधानं स प्रयाति प्रधानम् ॥ (मालिनी) ९

पू.मु.श्री समयराजविजयविरचितः

## ८०. ॥ श्रीपार्श्वनाथसमसंस्कृतस्तवः ॥

विमलकुलकमलरविकिरणनरपुंगवं
देवदेवं सुसेवामि वामाभवं ।
नीरकणहीरहरहारमहिमारवं
मलयमंदरमहासारधीरं नवं ॥ १

भिन्नसंसारसंसरणबहुकारणं
छिन्नछलबंधभवभोगजलतारणं ।
भीमभयभूमिरुहमत्तवरवारणं
कलहकलिकालभावारिगणवारणं ॥ २

कमलकोमलमहाकायगुणपरिमलं
मोहहरमिंदुदलभालनिस्समबलं ।
मंगमंगलमहावल्लिसुंदरजलं
मूलमायारसादारदारुणहलं ॥ ३

सिद्धिरमणीवरं सिद्धनरकुंजरं
नीरमणरोगसंभोगगुणसुंदरं ।
जीवसंदेहसंदोहदवसंवरं
नंदिकरनीलमणितालदलसंचरं ॥ ४

चारुवंदारुवासवसुरासुरनरं
गरिमगंभीरसागरनिरामयगरं ।
मारिघोरारिचोरावलीभयहरं
नीरमणिरंगबहुभंगमायावरं ॥ ५

भंदवरवारिरुहखरकिरणबंधुरं
रागहिंसामहातरुतरुणसिंधुरं ।
कुनयकरिकेसरिणर्मिंदिरामंदिरं
बुद्धिसुसमिद्धमंचामि दमिचंदिरं ॥ ६

इति भावसुंदर नतपुरंदर ! पार्श्वजिन ! तव वर्णना
समसंस्कृताचलवचनरचनैर्व्यरचि रुचिराकर्णना ।
गणधारिश्रीजिनचंद्रसूरीश्वरपदाम्बुजसेविना
मुनिसमयराजविनेयकेनाऽऽनन्ददा बहुभाविना ॥(हरिगीत) ९

पू.मु.श्री कीर्तिमेरुविजयविरचिताः

## ८१. ॥ श्रीपार्श्व-वीरजिनसाधारणस्तुतयः ॥

(मालिनी)

अहिपतिधृतपार्श्वं छिन्नसम्मोहपार्श्वं,
दुरितहरणपार्श्वं सन्नमद्यक्षपार्श्वम् ।
अशुभतमउपार्श्वं न्यक्कृतामं सुपार्श्वं,
वृजिनविपिनपार्श्वं श्रीजिनं नौमि पार्श्वम् ॥ १

त्रिदि(द ?)शविहितमानं सप्तहस्ताङ्गमानं,
दलितमदनमानं सद्गुणैर्वर्धमानम् ।

अनवरतममानं क्रोधमत्यस्यमानं,
जिनवरमसमानं संस्तुवे वर्धमानम् ॥ २

जिन ! तव गुणकीर्तेः विश्वविघ्नस्तकीर्तेः,
विगलदपरकीर्तेः यद्गिरा (?)धर्मकीर्तेः ।
सितकरसितकीर्तेः शुद्धधर्मैककीर्तैः,
स्तुतिमहमचिकीर्ते नाङ्कतानङ्गकीर्तेः ॥ ३

विगलितवृजिनानां नौमि राजीं जिनानां,
सरसिजनयनानां पूर्णचन्द्राननानाम् ।
गजवरगमनानां वारिवाहस्वनानां,
हतमदमदनानां मुक्तजीवासनानाम् ॥ ४

अविकलकलतारा प्राणनाथांशुतारा,
भवजलनिधितारा सर्वदा विप्रतारा ।
सुर-नर-रवितारा त्वार्हती गीर्वतारा-
दनवरतमितारा ज्ञानलक्ष्मीं सुतारा ॥ ५

नयनजितकुरङ्गी कांसुधारोचिरङ्गी-
मिह किल मुहुरङ्गीकृत्य चित्तान्तरङ्गी ।
स्मरति हि शुचिरङ्गी देवतां यस्तरङ्गी,
कुरुत इममरङ्गीत्यादिकृद् बन्धुरङ्गी ॥ ६

पू.मु.श्री सकलकीर्तिविजयविरचिता

## ८२. ॥ श्रीपार्श्वजिनस्तुतिः ॥

(अनुष्टुप्)

श्रीमान्निर्ग्रन्थराट् स्वामी, गणेशो विश्वनायकः ।
स्वयंभूर्वृषभो भर्त्ता, विश्वात्माप्यपुनर्भव ॥ १

सर्वदर्शी जगन्नाथो, धर्मात्मा धर्मबान्धवः ।
धर्ममूर्ति र्महाधर्मकर्ता धर्मप्रदो विभुः ॥ २

अमूर्तोऽत्यन्तपुण्यात्माप्यनन्तोऽनन्तशक्तिमान् ।
शरण्यो विश्वलोकेशो, दयामूर्ति र्महाव्रती ॥ ३

वाग्मी चतुर्मुखो ब्रह्मा, निःकर्मा निर्जितेन्द्रियः ।
मारजिज्जितमिथ्यात्वः, कर्मघ्नोऽपि ययान्तकः ॥ ४

दिगम्बरो जगद्व्यापी, भव्यबन्धु र्जगद्गुरुः ।
कामदः कामहन्ता सुन्दरोऽप्यानन्ददायकः ॥ ५

जिनेन्द्रो जिनराड् विष्णुः परमेष्ठी पुरातनः ।
ज्ञानज्योतिश्च पूतात्मा, महान् सूक्ष्मोजगत्पतिः ॥ ६

धर्मचक्री प्रशान्तात्मा, निर्लेपो निष्कलोऽमरः ।
सिद्धो बुद्धः प्रसिद्धात्मा, श्रीपतिः पुरुषोत्तमः ॥ ७

दिव्यभाषापति र्दिव्योऽप्यच्युतः परमेश्वरः ।
महातपा महातेजा, महाध्यानी निरञ्जनः ॥ ८

तीर्थकर्ता विचारज्ञो, विवेकी शीलभूषणः ।
अनन्तमहिमा दक्षो, निर्भूषो विगतायुधः ॥ ९

सर्वज्ञः सर्वदृक् सार्वः, सुसौम्यात्मा जिनाग्रणी ।
मन्त्रमूर्ति र्महादेवो, देवदेवोऽतिनिर्मलः ॥ १०

कृतकृत्योऽतिनिर्दोषः, परब्रह्मा महागुणी ।
दिव्यदेहो महारूपो, नित्यो मृत्युञ्जयो कृती ॥ ११

यमी यतीश्वरः स्त्रष्टा, स्तुत्यः पूतो ऽमरार्चितः ।
विधेशो निःक्रियो धर्मी, जातरूपो विदांवरः ॥ १२

एतेषामपि मध्ये यो, नाम्नैकेन विभो ! तव ।
करोति स्तवनं सोऽपि, लभते त्रिजगच्छ्रियम् ॥ १३

समस्तैर्नामभिर्यस्त्वां, सार्थैः स्तौति जिनाधिपः ।
सद्दृष्टिः सोऽचिरात् किं, न जायते भवत्समः ॥ १४

अतो देव ! नमस्तुभ्यं, नमस्ते ज्ञानमूर्तये ।
जगद्धिताय तीर्थेश !, नमस्तेऽनन्तशर्मणे ॥ १५

नमस्ते वीतमोहाय, नमस्ते बन्धवे सताम् ।
नमस्ते विश्वनाथाय नमस्ते कर्मशंभवे ॥ १६

जितेन्द्रिय ! नमस्तुभ्यं चानन्तगुणशालिने ।
शरण्याय नमस्तुभ्यं, क(ध)र्मतीर्थप्रवर्तिने ॥ १७

पू.मु.श्रीलब्धिविजयविरचितम्

नानाविधोत्प्रेक्षाऽलङ्कृतम्

## ८३. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(शार्दुलविक्रीडितम्)

स्वस्तिश्रीसुरपत्तनं प्रभुरलङ्कुर्वश्चिरं नन्दतात्
श्रीदादाऽभिधपार्श्वनाथजिनपोऽवन् विघ्नतः प्राणिनः ।
वक्तुं यस्य किमागतस्फणिमिषाच्छेषाऽहिराडित्यहो !
पृथ्वीभारभरं विभो मम कतं शीघ्रं समुत्तारय ॥ १

स्वस्तिश्रीपार्श्वनाथः शुचिकमलदलश्यामलः पुण्डरीकाऽ-
क्षो नो हन्ता स्वपृष्ठस्थितवरफणिना राजमानो मुदेऽस्तु ।
श्यामामुत्तम्भितां वै सजलजलदरुग् नागशय्यां श्रिया युक्
कृष्णोऽवष्टभ्य देवः स्थित इव सततं किं परब्रह्मलीनः ॥ २

(स्रग्धरा)

श्रीपार्श्वः प्रबलप्रतापतपनाभाभिर्निषिद्धा भिय-
स्ससप्ताऽपीह जने गता तव भयात् त्रस्ता न जाने कुतः ! ।
नाथ ! त्वच्छरणं प्रपद्य विषभृद् भीष्मस्फटादम्भत-
स्त्वत् पृष्ठे किमु हि स्थिताः किल नताः कृत्वा तृणं चाऽऽनने॥३

श्रीमद् बोधितरोस्तले फणिमिषादीशोपविष्टस्त्विषाऽ-
त्यन्तं नाथ ! विराजसे सतडिदम्भोभृत् समस्तुल्यया ।
प्रस्फूर्जन्नरकाऽरिरद्भुतबलः श्रीसंयुतस्सर्वदा
स्वच्छे बन्धुरशाखिनीव शिवकृद् गोपालनूतो हरिः ॥ ४

श्रीपार्श्व ! प्रणताऽमराऽसुरनरश्रेणे ! स्फटैर्भोगिनः
स्निग्धश्यामसुकज्जलोपधृतिभिः स्फारैरुदारैरहो ! ।
प्रस्फूर्ज्जन् मणिभिस्समं परिवृतं देदीप्यते ते मुखं
नूनं रात्रिसमुद्गतैर्विधुरिव ज्योतिर्मयैस्सदग्रहैः ॥ ५

(स्रग्धरा)

श्रीमंस्ते पार्श्वदेव ! प्रकटतनुतटस्पष्टनिर्य्यन्मयूखै-
र्वर्षन् पीयूषसिक्तैर्नयनघनवनश्रेणिषु प्राणभाजाम् ।
कालव्यालस्फटानां मणिकिरणघटाघाठसङ्घट्टनैस्त्वं
विद्युल्लीलाविलासैर्घन इव सततं शोभसे श्यामशोचिः ॥ ६

श्रीपार्श्व ! पाहि नस्त्वं त्रिजगदधिपते ! यस्य पीयूषकुण्डं
वक्त्रं वा राजते ते मधुमधुरवचःपीनपीयूषपूर्णम् ।
शङ्केऽतोऽहं स्वपृष्ठस्थितभुजगमिषात् किं तमः केतुयुक्तः
पातुं सन्धातुमागादिति च निजतनुं स्वीयवाचःसुधांशान् ॥ ७

स त्वं देहीप्सिताऽर्थाञ्जिन ! मम मनसे ते सिताऽऽभेति यस्य
यत् त्वद्देहेऽतिरम्ये शुचितररुचिरस्फाटिकाऽश्माऽवदाते ।
त्वत् पृष्ठस्थोरुभामण्डलविमलरुचः कुण्डलीशच्छलात् किं
सङ्क्रान्ताः पार्श्वनाथ ! प्रणतसुरनराऽधीश ! दृश्यन्त एव ॥८

किं कालिन्दीप्रवाहस्सदृशमिव विभो ! सौरिणा तेऽवगत्यो-
स्त्रैणाऽगात् पृष्ठितो वोरगपतिमिषतः किं स्वतः केशपाशः ।
किं वा यस्य प्रतापज्वलनसलिलभूस्ते तनुर्मूलतोऽग्रे
वृद्धिं गच्छन्नपायादिव कविजनमित्यर्थ जल्पाकमुच्चैः ॥ ९

पार्श्वः पायादपायादशरणशरणं सौम्यतेजाः ससत्त्वान्
श्यामा यत् पृष्ठिदेशे विधुतसुतनु नो किंवदन्ती विवेश ।
सन्मां पाहीति पाहि त्रिभुवनभयभिन्नाथ ! चाऽस्मत्सु रोचि-
स्तुल्यस्त्वं स्वीय एवोरगपतिमिषतस्संस्तुता मर्त्यलोकैः ॥१०

एकाऽग्रध्याननिष्ठः परमशमरसाऽऽस्वादसंलीनचेता
नासाऽग्रन्यस्तनेत्रस्त्रिजगदधिगुरो ! पार्श्व ! पद्माऽऽसनस्थः ।
तालस्याऽधस्तरोः किं तपसि वरतपःशस्यसप्तच्छदस्याऽ-
गस्याऽधो वोरुसप्तस्फटमणिरुचिरोर्ध्वं दमव्यालदम्भात् ॥११

श्रीमन्पार्श्वप्रभो ! त्वं दिशसि जनमनःकामितानि प्रकामं
भक्तैराऽऽराधितोन्तःकरणमलमुचांऽहः स्वभावेन लुम्पन् ।
मन्येऽतोऽहं तदित्थं विषधरमिषतस्त्वां सुरद्रुं हि मत्वा
त्वन्मौलौ मण्डपं चाऽसकलफटदलैश्चित्रवल्लिर्विधाय ॥ १२

देव ! स्वर्नाथनाथप्रकटितमहिमा धर्मचक्रीत्वमेवे-
त्यारादाराधयत्युद्यतशुचिमनसाऽयं त्रिलोकीशितस्त्वाम् ।
त्वच्छीर्षोर्ध्वं विधाता व्यरचयदुरु यत् छत्रमेवैकदण्डं
त्वत्पृष्ठस्थोरगेन्द्रप्रकटकपटतः पार्श्वनाथ ! प्रतापिन् ॥ १३

धन्यस्त्वं पार्श्वनाथ ! सकलजिनवरेन्द्रेष्वनुक्रोशबुद्ध्या
यो व्यालस्योपकारं सकरुणमकृथा भीषणस्याऽपि नेतः ! ।
धन्यः सोऽपीह नित्यं यदुपकृतिमथो संस्मरन् सेवते यं
यावज्जीवं स्वबिम्बेन च धरणफणी प्राप्तवान् पूज्यपूजाम् ॥१४

श्रीशङ्खेश्वरपार्श्वनाथमनघं चिन्तामणिं स्तम्भनं
श्रीअब्भारक चौरपाटिकबलाझेत्याख्यया सङ्गतम् ।

गौडीशं फलवर्द्धिपार्श्वमगसीनारङ्गपूर्नामकं
श्रीमद्रावणकुल्पाककलिकुण्डं कुर्कुटेशं तथा ॥ (शा.वि.)१५

पश्यामीश ! फणीन्द्रमूर्त्तिकलिताऽर्हद्बिम्बसन्दोहके
त्वामेव प्रतिबिम्बितं दिशिदिशीत्युक्तादिनामाऽन्तरैः ।
नाथाऽतः परमेक एव हि विभुस्त्वं यस्य मे तस्य तत्
त्वद् भक्तौ निरतस्य लब्धिविजयस्याऽऽनन्ददायी भव ॥१६
(शा.वि.)

पू.मु. पद्मप्रभदेवविरचितम्

## ८४. ॥ श्रीपार्श्वजिनाष्टकम् ॥

(उपजाति)

लक्ष्मीर्महस्तुत्यसती सती सती
प्रवृद्धकालो विरतोऽरतोरतो ।
जरारुजापन्महताऽहता हता
पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥ १

अर्चेयमाद्यं भुवि नाविना विना
यत्सर्वदेशे सुमना मनामना ।
समस्तविज्ञानमयो मयोमयो
पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥ २

अज्ञानसत्कामलता लता लता
यदीयसद्भावनता नता नता ।
निर्वाणसौख्यं सुगता गता गता
पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥ ३

व्यनेष्ट जन्तोः शरणं रणं रणं
क्षमादितो यः कमठं मठं मठम् ।
नरामराऽऽरामक्रमं क्रमं क्रमं
पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥ ४

यद्विश्वलोकैकगुरुं गुरुं गुरुं
विराजिताऽयेन वरं वरं वरम् ।
तमालनीलाङ्गभरं भरं भरं
पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥ ५

विवादिसाशेषविधिर्विधिर्विधि-
र्बभूव सर्पावहरीहरीहरी ।
त्रिज्ञानसञ्ज्ञानमयोमयोमयो
पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥ ६

संरक्षतो दिग्भुवनं वनं वनं
विराजिता येषु दिवैर्दिवैर्दिवैः ।
पादद्वये नूतसुरासुराऽऽसुराः
पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥ ७

रंराज नित्यं सकलाकलाऽकला
ममार कृष्णोऽवृजिनो जिनो जिनः(नोः) ।
सहारपूज्यं वृषभासभासभा
पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥ ८

तर्के व्याकरणे च नाटकचये काव्याकुले कौशले
विख्यातो भुवि पद्मनन्दिमुनिपस्तत्त्वस्य कोशं निधिः ।

गम्भीरं यमकाष्टकं भणति यः शं भूयसा लभ्यते
श्रीपद्मप्रभदेवनिर्मितमिदं स्तोत्रं जगन्मङ्गलम् ॥ (शा.वि.) ९

पू.मु.श्री मणिविजयविरचिता

## ८५. ॥ श्रीपार्श्वनाथस्तुतिः ॥

(अनुष्टुप्)

पार्श्वनाथप्रभो ! नित्यं, ध्यायामि त्वां मनोहरम् ।
त्रैलोक्यनतपादाब्जं, विघ्नव्रातविनाशकम् ॥ १

अश्वसेनावनिपाल-कुलनभोनभोमणे ! ।
वामाकुक्षिसरोहंस ! जय त्वं धीमहोदधे ! ॥ २

त्वन्नाम च स्मरेत्(द्) यस्तु, प्रातःकाले सदा विभो !
तस्य जन्म-जरा-मृत्यु-र्भयं नास्ति कदाचन ॥ ३

पू.मुनिश्री ऋद्धिचन्द्रशिष्यकृतः

## ८६. ॥ श्रीलोडणपार्श्वनाथ-जिनस्तवः ॥

(तोटक)

प्रभुलोडणपार्श्वजिनं सुकरं, भवपापतमोभरदूरकरम् ।
सततं जनसन्ततिशान्तिकरं, जनतार्चितसुन्दरपादधरम् ॥ १

भविकाम्बुजवारविबोधकरं, नमतां नरनिर्जरदुःखहरम् ।
भवतां गुणकाननवारिभरं, भववारिधिपोतसमं सुचिरम् ॥ २

जगतां जनसन्ततिजन्महरं, सकलं शिवदं सुखवारकरम् ।
यशसा किल निर्जितशीतकरं, जितमन्मथमानमनन्तकरम् ॥३

जयकारीयशोधनधीप्रवरं, भवभीममहोदधिभीतिहरम् ।
दशनच्छवितर्जितपद्मवरं, मनुजेप्सितकार्यविधानपरम् ॥ ४

जनकिल्बिषपादपपर्शुतरं, सुरनाथनतं जगदर्त्तिहरम् ।
घनकर्मकृशानुपयोनिकरं, विशदाऽङ्घ्रियुगं किल पद्मवरम् ॥५

क्षितिमेरुमहीधरधैर्यधरं, प्रणतासुरकिन्नरदेवनरम् ।
सुकृतव्रजनिर्जरसत्शिखरं, तनुदीप्तिपरिहृतसूर्यमरम् ॥ ६

जनताम्बुजकाननसत्भ्रमरं, मदनोद्धतवारणसिंहपरम् ।
भवकर्दमनाशननीरधरं, सुयशःसुकृतैकगुणप्रकरम् ॥ ७

अवनीतलविश्रुतकीर्त्तिभरं, कमलापतिसेवितसाधुवरम् ।
जितमारमुद्गतशेषदरं, गुणनीरधिमानतदेवनरम् ॥ ८

इत्थं पार्श्वजिनोत्तमं शिवकरं भक्त्या नुतं सज्जिनं,
दुःपापाम्बुधिशोषणे घटभवं, भास्वत्कलाभाजनम् ।
श्रीमद्वाचकभानुचन्द्रचरणद्वन्द्वैकसेवावशात्
सद्यस्कंवरऋद्धिचन्द्रशिशुना सत्पद्यबन्धेन वै ॥ ९

पू.मु.श्री मलूकचन्द्रकृता

## ८७. ॥ श्रीपार्श्वनाथस्तुतिः ॥

(इन्द्रवज्रा)

यो मुक्तिलक्ष्मीं सकलां ववार, निस्तारयन् भावुकजीववृन्दम् ।
संसारधीराशयमज्जमानम्, श्रीपार्श्वनाथं तमहं नमामि ॥ १

यं पूजयन्ति प्रवराः सुरेन्द्राः, सद्भक्तिनम्राः खलु नम्रचित्ताः ।
संसेवते प्राप्य च काद्रवेयः श्रीपार्श्वनाथं तमहं नमामि ॥ २

येनाहता दुस्सहकर्मपक्षाः प्रज्वालिता मन्मथकामकक्षाः ।
दानैर्जिता येन च कल्पवृक्षाः श्रीपार्श्वनाथं तमहं नमामि ॥ ३

यस्मै नमस्यन्ति सुरासुरेन्द्रा, नाकच्युतौ जन्मयमत्वकाले ।
ज्ञानोद्भवे मोक्षपदस्य प्राप्तौ श्रीपार्श्वनाथं तमहं नमामि ॥ ४

यस्माद् वृषोऽयं प्रकटीवभूव, चतुर्विधो दुर्गतिनाशहेतुः ।
स्वर्गापवर्गप्रद आशु जन्तोः, श्रीपार्श्वनाथं तमहं नमामि ॥ ५

यस्याऽऽननं वीक्ष्य सुधाभिपूर्णं, जैवातृको लज्जितवद्ययौ द्याम्।
नित्यप्रसन्नं सततं कलङ्की श्रीपार्श्वनाथं तमहं नमामि ॥ ६

यस्मिन् गृहे श्रीः सदनं चकार, यदीयमातुर्निधिभिः पितुश्च ।
गर्भस्थिते शिष्टमतिः प्रजाते श्रीपार्श्वनाथं तमहं नमामि ॥ ७

इत्थं स्तुतः श्रीजिनपार्श्वनाथः, श्री पार्श्वसंसेवितपादपद्मः ।
श्रीवीरचन्द्रस्य विनेयकेन, मलूकचन्द्रेण सतां श्रिये स्तात् ॥८
श्रीपार्श्वनाथं तमहं नमामि

पू.मु.श्री मूलकचन्द्रविजयविरचितम्

## ८८. ॥ श्रीपार्श्वनाथस्तवनाष्टकम् ॥

(भुजङ्गप्रयातम्)

श्रियः सन्ततेः कारकं श्रीजिनेशं
महामोहभूच्छायनाशे दिनेशम् ।
नतं नाकिभिर्भक्तिभिर्जीवनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ १

महानागपारीन्द्रवैश्वानरा हि-
प्रवाताम्बुधीरोगसन्दानदाहम् ।
जितानेकपक्षं त्रिविश्वैकनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ २

क्षमापार्श्वसेनस्य वंशेऽवतंसं
हतक्रोधशत्रुं च लक्ष्मीनिवासम् ।
जनाम्भोजखण्डस्फुटे घस्रनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ३

सतां मोक्षपद्मा(ऋद्धि?)प्रदानैकहेतुं
महाकृच्छ्रविच्छेदने धूमकेतुम् ।
क्रमेन्दीवरालीननागाङ्कनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ४

सनीराम्बुदश्यामशिष्टाङ्गकान्तिं
सुविस्तारिताविष्टपाशेषशान्तिम् ।
गतान्यूनदोषं वरं मुक्तिनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ५

नरेन्द्रादिवन्द्यं सदालब्धयोगं
निशारत्नकम्रानन‌ं त्यक्तशोकम् ।
कृपाभाजनं विश्वदेवाधिनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ६

जगत्तारकं दायकं सज्जनानां
श्रियं वाञ्छितार्थप्रदं निर्धनानाम्

सुरम्यस्वरुङ्निर्ज्जितनाकिनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ७

कषायाग्निसन्तर्पणे वारिदानं
जराभीरुमातङ्गपञ्चास्यशोभम् ।
विदुष्टाष्टकर्म्मोरगे पत्रिनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ८

इत्येवं श्रीमद्वीरचन्द्रशिशुना मलूकचन्द्रेण ।
जयतु चिरं नूतः पार्श्वजिनवरो विजितमदरागः ॥ (आर्या) ९

पू.मु.श्री प्रतिष्ठासोमगणिकृतम्

घोघापुरमण्डन–

## ८९. ॥ श्रीनवखण्डापार्श्वनाथस्तवनम् ॥

(शार्दूलविक्रीडित)

श्रीइक्ष्वाकुकुलप्रदीपमखिल–त्रैलोक्यकुक्षिम्भरि,
प्रोत्सर्पन्महिमानमानतमनः संकल्पकल्पद्रुमम् ।
श्रीघोघापुरमण्डनं तमसमं श्रेयः श्रियामाश्रयम्,
श्रीपार्श्वं नवखण्डमण्डिततनुं स्तोष्ये जिनस्वामिनम् ॥ १

बाहुभ्यां किल यस्तितीर्षति पुमान् श्रीतस्विनी स्वामिनम्
पद्भ्यां तुङ्गसुपर्वपर्वतमिहारोढुं च यो वाञ्छति ।
सोऽपि श्रीनवखण्डपार्श्वमहिम–व्रातं त्रिलोक्यद्भुतम्,
भास्वन्मण्डलभास्वरं वरमतिः शक्नोति वक्तुं न हि ॥ २

स श्रेयांसि यशांसि चाद्भुतयशाः श्री पार्श्वतीर्थङ्करः,
कार्याद्वस्त्रिजगत्पतिः सुरपतिस्तुत्यक्रमाम्भोरुहः ।
यः खण्डेषु नवस्वपि प्रकटित-प्रोद्दामधामश्रिया-
खण्डश्रीनवखण्डनाम सुभगो जागर्ति विश्वार्तिहृत् ॥ ३

श्रीमान्पार्श्वजिनो निरस्तवृजिनो नीलोत्पलश्यामल-
ज्योतिर्द्योतितनुर्विभुः स तनुतां श्रेयांसि भूयांसि वः ।
यन्नामस्मरणात्प्रयान्ति विलयं सर्वापदः सम्पदः,
स्युर्वश्याश्च सुरासुराः श्रयति सा निश्रेयसश्रीरपि ॥ ४

श्रीवामाप्रभवो भवोदधितरिर्देवाधिदेवः परा-
जिह्मब्रह्मरमासतां वितनुतां श्रीपार्श्वदेवः सताम् ।
एतान्मूर्द्धिर्न बिभर्ति यः फणिफणा व्याजात्प्रचण्डानयो,
दण्डान् खण्डयितुं विपद्घटघटा विश्वस्य विश्वस्य किम् ॥५

दुष्टारिष्टघटाविपाटनपटु-प्रोद्दण्डदोर्दण्डभृद्,
देवः सेवकवत्सलः कुशलकृत्पार्श्वः स पार्श्वश्रिये ।
यस्याद्याप्यरिपोः सरीत्युपकृपा प्रोद्भूतविश्वाद्भुता,
स्तोकश्लोकगभीरडिण्डिमडमत्करो न विश्राम्यति ॥ ६

यन्नामाङ्कितमन्त्रयन्त्रनिवहाः सर्वेप्यखवैजि सः,
कालेष्णोस्मिन्नपि विस्मयं विदधति प्रौढप्रभां वा भुवि ।
देवो तं गुरजागरूकमहिम-प्राग्भारविश्रामभूः,
श्रीवामातनयः श्रियं श्रितनयस्तन्यात् स धन्यात्मनाम् ॥ ७

आस्यं सौगन्ध्यशस्यं शठकमठहठेत्सृष्टवारिप्रवाहा,
कण्ठामग्नस्य फुल्लामलकमलमिव स्वामिनस्ते बभासे ।

सर्पत्सौरभ्य लुभ्यन्मधुकरपटलीविभ्रमं बिभ्रतिश्री-
पार्श्वस्निग्धाञ्जनाभा भुजगपतिफणाः सप्त तस्योपरिष्टात् ॥ ८
(स्रग्धरा)

भाभिर्भास्वतिभास्वति त्वयि सतां चित्तोदयक्ष्माभृति,
स्वामिन्नभ्युदिते समग्रकमलोल्लासः स सद्योजनि ।
तत्प्रत्यूहसमूहदुस्तमतमः काण्डं प्रचण्डं जवा-
द्देवासी छ्तखण्डमेव सुदिनं चाविर्बभूवाभितः ॥ ९

पद्मद्युच्चरणद्वयीरणरणन् मञ्जीरमञ्जुस्वना,
दीव्यन्मौक्तिकहारहारिहृदया पाणिक्वणत्कङ्कणा ।
सा पद्महृदवासिनी भगवती श्रीः क्रीडति प्रश्रया,
साक्षात्तस्य गृहे मुखेन जगृहे त्वन्नाम येन प्रभो ! ॥ १०

निःश्रूकै र्दन्दश्रूकै र्न भयकरतनूत्रालवेतालवृन्दै-
र्नोवाभूतैर्प्रभूतैरपि स किल परा भूयते शक्तिभि र्वा ।
कन्दः कल्याणवल्याः सकलजयरमायोषिदाह्वानमन्त्रः,
स्वामिं स्वन्नाममन्त्रः स्फुरति सुमनसो मानसे यस्य शस्यः ॥११
(स्रग्धरा)

नृत्यत्केकिकलाप काम्यकबरी दण्डप्रचण्डाः श्रव-
श्चञ्चत्काञ्चनकुण्डलाः शशिलसल्लावण्यपुण्याननाः ।
मुग्धस्निग्धकटाक्षलक्षरुचिर-स्मेराम्बुजोल्लासिदृग्-
व्यापाराः सुरसुन्दरीवरवपुः सौन्दर्यलक्ष्मीमुखः ॥ १२

काश्मीरारुणपत्रभङ्गिसुभग स्वः कुम्भिकुम्भस्थल-
स्पर्द्धिस्फारलसत् घनस्तनतटी मुक्तालतालं क्षताः ।

रम्भास्तम्भनिभोरवः पिकरव प्रोल्लासिवाग्वैभवा
लभ्यन्ते नवयौवनामृगदृशो विस्फूर्जितात्वदृशोः ॥ १३

रुद्रो रौद्रपराक्रमः क्रमनमद्देवासुरो भासुरो,
विश्वोत्पत्तिविपत्तिकारिकलया विश्वप्रभु र्न प्रभुः ।
वैकुण्ठोखिल दानवक्षयकरौ वैकुण्ठ एवाभवत्,
ब्रह्माजिह्मभुजोप्यजिह्मपरमब्रह्मस्वरूपः किल ॥ १४

स्कन्दो मन्दतमस्तमः प्रमथनो भास्वान्नभास्वान् क्षमो,
रक्षः कन्दनिकन्दनः समतिमान्नो वा हनूमान् विभुः ।
हेरंबोऽपि न बाहुदण्डतरसा विघ्नानि निघ्नन् बली,
नो शूरः परमासमांसलरुचिर्मुक्तत्रपः क्षेत्रपः ॥ १५

शक्तिः शक्तिविवर्जितानहिभुजादण्डप्रचण्डाप्यलं,
चामुण्डारिपुमुण्डखण्डनपरात्तसा न यान् यान् प्रति- ।
म्लेच्छांस्तानपि लीलया विदलयन् लीलापतिर्वर्ण्णिकां,
स्वस्थाम्नः प्रकटीचकार भुवनालङ्कारनेतर्भवान् ॥(त्रिभि.)१६

फूत्कारैः फणिनां च घुर्घुररवैर्व्याघ्रोद्भवैः फेरवी,
फेत्कारैर्गजराजिगर्जितरवैः पारीन्द्रगुञ्जारवैः ।
घूकानामपि घूकृतैर्भयकृतं भिल्लैर्भृतं दुस्तरं,
कान्तारं तरसोत्तरन्ति भविनः श्रेयस्विनस्त्वस्मृतैः ॥ १७

निस्वानव्रजनिस्वनैर्घनतरैर्घोरे धनुर्भृद्धनु-
ष्टङ्कारैर्द्विपबृंहितैर्हयमहाहेषारवैर्भैरवैः ।
हुङ्कारैरसिषाह्य(द्द)तैरपि भुजः स्फोटैः स्फुटैर्दोष्मतां,
भीष्मे ते स्मरणे कृते सति रणे स्वामिन् ! जयः स्यान्नृणाम् ॥१८

श्यामास्योन्नतवारिवाहनिवहोद्यद्वर्जितैरूर्जितै-
र्विद्युत्झाकृतिभिः प्रचण्डपवनै र्भीष्माकृतिं बिभ्यति ।
क्षुभ्यत् भीषणनक्रचक्रपटले रङ्गत्तरङ्गव्रजे,
पारं वारिनिधौ विधौतकलुषत्वद्व्यानतः प्राप्यते ॥ १९

कुष्टं दुष्टमपि प्रयाति विलयं सर्वेक्षरास्तत्क्षणात्,
क्षीयन्ते स भगन्दरः कृतदरः श्यामच्छवे शाम्यति ।
स्वामिन् किं बहुना तव त्रिजगती ध्येयक्रमस्यक्रम-
ध्यानाद्भक्त नरो न रोगनिकरैरापीड्यते जातुचित् ॥ २०

नानालङ्कृतिभासुरः सुरपति र्दम्भालिपाणिः सना-
वृत्तान्नाटकपेटकप्रकटितप्रौढाधिपत्यस्थितिः ।
बिभ्राणोप्यरजोम्बराणि सुमनोमालां च दिव्यां दिवि,
प्राज्यं राज्यमसौ भुनक्ति यदि यं स्वामिन् ! प्रसत्तिस्तव ॥२१

आरूढः प्रौढसिंहासनिनिजशिरसि स्वर्णदण्डातपत्रं,
बिभ्राणः शुभ्रवर्णं सितरुचिरुचिरैश्चामरैर्वीज्यमानः ।
षट्खण्डानामखण्डां यदवनिमघवान् प्राज्यसाम्राज्यलक्ष्मीः,
भुङ्क्ते श्रीसार्वभौमो जिनललितमिदं त्वत्प्रसादस्य सर्वम् ॥२२

(स्रग्धरा)

श्रुण्वन्मन्त्राधिराजं ततदुरिततमः काण्डचण्डांशुबिम्बं,
भीष्मज्वालावलीभृत्कमठहुतभुजिव्याकुलाङ्गो भुजङ्गः ।
मृत्वासौ सौमनस्यादजनिरजनि कृत्कान्तकीर्त्तिर्यदिन्द्र-
पातालस्य प्रशस्यः स जयति सकल स्वावकीनः प्रसादः ॥२३

(स्रग्धरा)

श्रीचारूपपुरेथमङ्गलपुरे श्रीस्तम्भनाख्ये पुरे,
जीरापल्लिपुरे च रावणपुरे नागह्रदे श्रीपुरे ।
त्वं तीर्थेष्वपरेष्वपि स्फुटनिज-स्थानस्थमूर्तिर्विभो !,
जाग्रत्प्रौढतमप्रतापललितैः श्रीपार्श्व गर्जन्नसि ॥ २४

एवं भूमिभृदश्वसेनतनय श्रीपार्श्वविश्वेश्वर,
स्तुत्वा त्वां नवखण्डरूपवसुधा खण्डप्रतापोदयम् ।
याचे देव न राजपदवीं नो चक्रवर्त्तिश्रियं,
किन्तु श्रीजिन देहि देहि हितकृत्त्वं बोधिलाभं मम ॥ २५

श्रीआल्हादमन्त्रिप्रणीतम्

## १०. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥

(वसन्ततिलका)

श्रीपार्श्वनाथ ! भवतो भवतोयराशि-
कुम्भोद्भवस्य चरितं किमु वर्णयामि ? ।
यः शङ्करप्रभृतयो भृतयोगमुद्रा-
दोधूयिताः कुविषयैर्मु(र्भु)वि तज्जिगीषोः ॥ १

जाने जिनेश ! नहि वक्तुमलं प्रसिद्धा
सिद्धान्तवागपि तवागणितं प्रभावम् ।
भक्तप्रसक्तहृदयस्तदपि स्तवीमि
त्वां भूतलेशसुकृतादिह भूतलेषः (शः) ॥ २

पापोदयादिह दयाविभवं भवन्तं
ये स्तोतुमेव भविनो भुवि नोत्सहन्ते ।

दारिद्र्यदारुणविषाधिजुषां तु तेषां
जाने जगन्ति भुजगन्ति जिनाधिनाथः ॥ ३

ध्यातः क्षणं दुरितराशिविनाशकर्त्ता
श्रीपार्श्वनाथ ! हतमोह ! तमोऽपहर्त्ता ।
दुःकर्ममार्गपथिकीभवतोऽपि जन्तोः
सन्तोषपूर्णनभवानभवाय कस्य ? ॥ ४

सङ्कोचमञ्चति न चन्द्ररुचा न पङ्क-
पृक्तं न कण्टकचितं न परागराजि ।
दत्ते पदाम्बुजयुतं तव पार्श्वनाथ ।
ध्यानैकतानमनसा घनसान्द्रमोदम् ॥ ५

भूपा बभूवुरवनौ शतशः सुरूपा
दध्रेऽपि यैर्भुजगतो जगतोऽपि भारः ।
पापापगापतितले पतयालु विश्वं
विश्वम्भरावलयभूषण ! रक्षसि त्वम् ॥ ६

ये जन्तवः स्तवपरास्तव विश्वनाथ !
शङ्खेश्वरे सुखमयं समयं नयन्ति ।
ते मातुरातुररवं नहि गर्भवास-
क्लेशं दिशन्ति मनुजा ननु जातमोक्षाः ॥ ७

पापैर्बलेन तिलतन्दुलितेऽत्र विश्वे
विश्वेश ! केशवशिवादिषु दूषितेषु ।
अद्यापि ते कलियुगेऽप्यनुभावभेरी
सेरीसके सुकृतिनां श्रुतिमूलमेति ॥ ८

अम्भोदरूपिणि रुषा कमठे हठेन
वृष्ट्या विकुर्वति भवन्तमवन्तमूर्वीम् ।
लीलातपत्रधरणे धरणेन्द्रनाग-
स्त्वत्पर्युपासिषु विभो ! न परमार्गमाप ॥ ९

श्रीपार्श्वनाथस्य नवस्तवार्चा
चकार कारुण्यनिधेर्जिनस्य ।
आल्हादमन्त्री परमप्रमोद-
क्रमोदयद्भक्तिभृतान्तरङ्गः ॥ (उपजाति) १०

कविश्रीशिवनागविरचितम्

## ९१. ॥ श्रीपार्श्वनाथस्तोत्रम् ।

(आर्या)

धरणोरगेन्द्रसुरपतिविद्याधरपूजितं जिनं नत्वा ।
क्षुद्रोपद्रवशमनं तस्यैव हि महास्तवं वक्ष्ये ॥ १

सुरलोकनाथपूजित ! हर हर हरहाररोषजुष्टमपि ।
पन्नगविषं महाबल ! शुक्लध्यानानलाक्षेपात् ॥ २

विद्यासहस्रषोडशगणनायकवीरवर्धितानन्द ! ।
पन्नगकुलं कुलोत्तम ! निर्विषतां नय नयाभिगमात् ॥ ३

सर्वेऽपि महानागा नागाधिपकृतफणा तपच्छाय ! ।
कलिकुण्डदण्डनिहता नश्यन्ति विषापहारेण ॥ ४

ॐकारसम्पुटगतं वामकरे दण्डरूपकं ध्यातम् ।
ज्वालालिपरिस्फुरन्तं कलिकुण्डाज्ञामिवामोघम् ॥ ५

नाशयति सर्वनागान् भूतान् व्यालग्रहांश्च विस्फोटान् ।
ज्वालागर्दभशाकिनिविषवेगांश्चापि रोगांश्च ॥ ६

दैत्यामरेन्द्रपूजित ! निर्नाशितदुष्टकर्ममलपटल ! ।
क्षिपय जिन ! हुं फट् त्वं पन्नगकुलविषमविषदर्पम् ॥ ७

निर्मथितभवभयोल्बण ! षोडशविद्याधिपत्वमुपपन्न ! ।
श्रीपार्श्वनाथ ! विषहर ! हिलि हिलि मातङ्गिनी स्वाहा ॥ ८

ॐ हर हर हुतभुक् पवनेरितज्वलितमङ्कुशं ध्यायेत् ।
उत्थापयति सरोषं पुनरुक्तैर्भोगहस्तोऽयम् ॥ ९

आगच्छन्तु महानागाः पन्नगाश्च महाविषाः ।
गरुडस्येनां विद्यां हिलि हिलि मातङ्गिनी स्वाहा ॥ १०

ॐ पार्श्वनाथ ! सुरपतिमुकुटतटोद्घृष्टपादनलिनयुग ! ।
नागाष्टकुलविषापह ! हा है हे हौ हु हू हं हः ॥ ११

सकलभुवनाभिवन्दित ! गरुडस्त्वं पन्नगेन्द्रकृतपूज ! ।
विषमविषानलशमनो जलद इव जलप्लुतालोकः ॥ १२

दैत्योपसर्गभीषणजलधरधाराविधौतकर्ममल ! ।
सर्वज्ञ ! नागवन्दित ! सर्वविषाक्षेपण ! नमस्ते ॥ १३

ॐ हन हन दह दह पच पच
संहर संहर क्षिप हुं चचाल कलिकुण्ड ! ।
धम धम पूरय पूरय विषोल्वणं हुं फट् स्वाहा ॥ १४

ॐ चुरु चुरु मुरु मुरु फुरु फुरु
फर फर फार फार फलदस्त्वम् ।

किलि किलि कलकल कलितैः
कलिकुण्ड ! कलाकलापज्ञ ! ॥ १५

ॐ यः यः यः सः सः हः हः वः वः
उरुरिल्लय रुह (हु) रुहान्त ! शान्त ! त्वम् ।
विषवह्नेर्विध्यपनं कुरु शीघ्रमुरुप्लवाख्यानात् ॥ १६

दंष्ट्राकरालभीषणकुपितासुरजलदजलधरापातैः ।
अभ्यस्ततपोऽनलजाज्वलन्त ! दह दुष्टनागविषम् ॥ १७

कमलदलस्थितदिक्पतिमध्ये भुजगावृतं जिनं नत्वा ।
षोडशदेवी सहितं बीजाक्षरसंयुतं तद्धि ॥ १८

वन्ध्यानां सुतजननं म्रियमाणापत्यरक्षणं परमम् ।
पद्ममिदं रोगहरं ग्रहशाकिनिभूतनिर्नाशम् ॥ १९

दष्टकसर्वाङ्गगतं पद्ममिदं ध्यायतोऽमृतप्लवहम् ।
कुर्याद् विषापहारं प्रणवाद्यैः पञ्चभिर्वर्णैः ॥ २०

व्यस्तसमस्तं विपत्तिं बहुधा परिकल्प्य पञ्चभिर्वर्णैः ।
जिननामाक्षरसहितैः पदं पदं सर्वविषमथनम् ॥ २१

क्षिप ॐ स्वाहा पञ्चकमनिन्दितं पञ्चभूतपरिकल्पम् ।
नागाष्टककुलोपेतं सत्त्वरजस्तमःकलानुगतम् ॥ २२

रेफसम्पुटमध्यस्थः ककारो वह्निमण्डले ।
आक्रान्तदीप्तवर्णाभः स्तोभयेत् त्रिदशानपि ॥ २३

नीलोत्पलदलश्यामः ककारोपरि संस्थितः ।
यकारवेष्टितः शुद्धः पर्वतानपि चालयेत् ॥ २४

लसद्वज्रद्वयाक्रान्तमिन्द्रगोपुरमध्यगम् ।
पद्मकिञ्जल्कसङ्काशं स्तम्भयेत् त्रिपुरान्तकम् ॥ २५

कुन्देन्दुशङ्खवर्णाभं निर्वाहं यस्तु चिन्तयेत् ।
निर्विषं कुरुते क्षिप्रं विषं स्थावरजङ्गमम् ॥ २६

हरहारशङ्खगौरं वकारं कलशाकृतिम् ।
ठ(ह)कारवेष्टितं सुद्धं प्लवन्तं विष नाशनम् ॥ २७

हस्ताङ्गुलीषु विन्यस्तं वामकरे भूतपञ्चकं सकलम् ।
अपहरति समस्तविषं साधकमुष्टिक्रमाबन्धात् ॥ २८

धरणोरगेन्द्रसुरपतिविद्याधरदैत्यदेवताभिनुतम् ।
जिनगरुडमप्रमेयं चतुर्वर्णविभूषितं स्मरयेत् ॥ २९

आजानुकनकगौरं आनाभेः शङ्खकुन्दहरधवलम् ।
आकण्ठतो नवदिवाकरकान्तितुल्य-
मामूर्धतोऽञ्जननिभं गरुडस्य रुपम् ॥ ३०

सुवर्णपक्षं वैनतेयं पक्षिराजं महाबलम् ।
नागान्तकं जितारिं च अजितं विश्वरूपिणम् ॥ ३१

विनतायाः सुतं दैत्यं विहङ्गं पन्नगोत्तमम् ।
गरुन्मन्तं खगेशं च ताक्ष्यं काश्यपनन्दनम् ॥ ३२

द्वादशैतानि नामानि गरुडस्य महात्मनः ।
यः स्मरेत् प्रातरुत्थाय स्नातो वा यदि वाशुचिः ॥ ३३

विषं न क्रमते तस्य न च हिंसन्ति पन्नगाः ।
न दुष्टा द्रावयन्त्येनं सर्वकार्याणि साधयेत् ॥ ३४

एवंभूतैस्तु यो नामैः श्रीपार्श्वं स्मरयेज्जिनम् ।
तस्य रोगाः प्रणश्यन्ति विषं च प्रलयं व्रजेत् ॥ ३५

ग्रहदुःस्थसुस्थजननं सर्वविषोच्छेदनं प्रशान्तिकरम् ।
प्रध्वस्तदुरितनिचयं पार्श्वं योगीश्वरं वन्दे ॥ ३६

इति मालामन्त्रपदैरभिष्टुतं यः स्मरेत् त्रिसन्ध्यमपि ।
स करोति नागक्रीडां शिव इव विषवेदनातीतः ॥ ३७

भक्तिर्जिनेश्वरे यस्य गन्धमाल्यानुलेपनैः ।
सम्पूजयति यश्चैनं तस्यैतत् सफलं भवेत् ॥ (अनुष्टुप्) ३८

श्रीबिल्हणकविकृतः

## १२. ॥ श्रीपार्श्वजिनस्तवः ॥

(मालिनी)

जयति भुजगराजप्राज्यफुल्लत्फणाली-
मणिकिरणकदम्बाडम्बरी पार्श्वनाथः ।
भुवनभवनगर्भादभ्रमोहान्धकार-
च्छिदुरतरुणदीपोद्दीपने कौतुकीव ॥ १

दिशतु सुकृतिलोकप्रस्तुतश्लाघ्यपूजा-
विलसितगुरुधूमस्तोमसङ्गादिवाङ्गम् ।
दधदभिनवमेघश्यामलं मङ्गलं व-
स्त्रिजगदभयदीक्षादीक्षितः पार्श्वनाथः ॥ २

कमपि कमठदैत्याकालकालाम्बुवाह-
व्यतिकरबधिरोऽपि श्रीविशेषं दधानः ।

मदनमदविकाराम्भोरुहम्लानहेतुं
जनयति स जिनेन्दुर्युष्मदाशाप्रकाशम् ॥ ३

जयति भवदवाग्निव्याप्तिनिर्दह्यमान-
त्रिभुवनवनरेखादेशकः पार्श्वनाथः ।
घनमयमिव देहं पन्नगश्यामचूडा-
मणिविरचितचञ्चन्नाकिचापं दधानः ॥ ४

कलितगरलशोभा भोगिभर्तुः शरीरे
निजकरकमलाग्रे भृङ्गिमालायमानाः ।
दिशि दिशि मृगनाभीपत्रभङ्गाभिरामा
ददतु शुभगतिं वः पार्श्वनाथस्य भासः ॥ ५

तरलतरललामानङ्गहाराङ्गहारा-
मरसमरसरामारङ्गसारङ्गसारम् ।
नवननवनवोक्तिर्दीप्रसिद्धं प्रसिद्धं
नमति न मतिमास्त्वां कोऽञ्जनाभं चनाभम् ॥ ६

कुवलयवननीलश्चारु बिभ्रत्स्वभावं
नवनयघनशैलं पौरुषाद् भ्रष्टभावम् ।
वितरतु मम तानि श्रीजिनेन्दुः सुखानि
श्रितचतुरमितानि श्रीजिनेन्दुः सुखानि ॥ ७

फणपतिफणरत्नोद्द्योतविद्योतितश्री-
र्ददतु शुभगतिं वः पार्श्वनाथस्य मूर्तिः ।
रणरणकविशेषक्षोभवन्मोक्षलक्ष्मी-
सरभसपरिरम्भात्कुङ्कुमेनारुणेव ॥ ८

इति जिनपतेः स्तोत्रं चित्रं महाकविबिल्हण-
ग्रथितमखिलत्रैलोक्यैकप्रकाशनभास्वतः ।
पठति सततं यः श्रद्धावान्न मज्जति सज्जनो
भवजलनिधौ स प्रद्युम्नस्थितिं चिरमाश्रितः ॥ (हरिणी) ९

श्रीब्रह्मर्षि-रचितम्

## १३. ॥ श्रीस्तम्भन-पार्श्वनाथ-स्तवनम् ॥

श्रीवामेयं विधु-सम-वदनं, वन्दे मङ्गल-कमला-सदनं,
निर्जित-दुर्मद-मदनम् ।
अश्वसेन-कुल-पङ्कज-सूरं, दुःख-महा-रिपु-परिभव-शूरं,
विश्वद-सकल-गुण-पूरम् ॥ १

अतुल-बल-सुरगिरि-सम-धीरं, पाप-रजो-भर-हरण-समीरं,
प्राप्त-भवोदधि - तीरम् ।
कर्म-धरा-दारण-शुभ-सीरं, दशन-पङ्क्ति-जित-निर्मल-हीरं,
क्रोध-दवानल-नीरम् ॥ २

मान-करटि-विघटन-पञ्चास्यं, दूरोत्सारित-मोहन-हास्यं,
अमर-वधू-कृत-लास्यम् ।
नित्यं सुर-नर-पूजित-चरणं, रक्तोत्पल-कोमल-कर-चरणं,
पालित-निर्मल-चरणम् ॥ ३

दुःखित-जगती-जन-गण-शरणं, वारित-जन्म-जरा-भय-मरणं,
मन-ईहित -सुख-करणम् ।
विदित-निखिल-भुवन-त्रय-सारं, प्रभावती-हृदय-स्थल-हारं,
बोधि-बीज-दातारम् ॥ ४

नित्यं धरण-नाग-पति-महितं, निज-शंसा-पर-निन्दा-रहितं,
केवल-दर्शन-सहितम् ।
सुरतरु-चिन्तामण्यवतारं, कामगवीव समीहितकारं,
सेवक-जनता-धारम् ॥ ५

निज-तनु-रूप-कान्ति-जित-मारं, सुख-भूरुह-सेचन-जलधारं,
स्तम्भनपुर-शृङ्गारम् ।
निःकृन्तित-माया-वन-गहनं, दुःकृत-दारु-महा-भर-दहनं,
समता-गुण-शुभ-भवनम् ॥ ६

दूरीकृत-विकट-प्रत्यूहं, विधुरित-बहु-भव-तृष्णा-व्यूहं,
रक्षित-सत्त्व-समूहम् ।
प्रकटित-धर्मं सत्त्व-हितार्थं, ज्ञान-कला-विदिता-नन्तार्थं,
साधित-तुर्य-महार्थम् ॥ ७

दहन-वदन-निःकासित-नागं, दर्शित-पञ्च-नमस्तू(स्कृ?)त-रागं,
लम्भित-सुर-गति-भागम् ।
निज-गति-जित-मानसिक-मरालं, सततं योग-पराजित-कालं,
महिमा-मोद-विशालम् ॥ ८

त्रिभुवन-वत्सल-ममल-ममोहं, लोकोत्तर-शोभा-सन्दोहं,
त्यक्त-सदा-व्यामोहम् ।
मदन-महा-भट-भङ्ग-त्र्यक्षं, परमानन्द-सुखावह-दक्षं,
प्रत्यक्षीकृत-लक्षम् ॥ ९

नील-कमल-कज्जल-सम-देहं, निःकन्दित-पृच्छक-सन्देहं,
सल्लक्षण-गुण-गेहम् ।

अणिमाद्यष्टसिद्धि-विस्तारं, तीर्थ-विभु-श्रीपार्श्वमुदारं,
सेवे वारंवारम् ॥ १०

इत्थं श्रीस्तम्भनः पार्श्वः, स्तम्भतीर्थाधिपः सदा ।
संस्तुतो ब्रह्मणा भूयात्, भव्यानां भव्यसौख्यदः ॥ ११
(अनुष्टुप्)

## १४. ॥ समस्यामयश्रीपार्श्वनाथस्तोत्रम् ॥

(उपजाति)

श्रीपार्श्वनाथं तमहं स्तवीमि, त्रैलोक्यलोकम्पृणधामधाम ।
सामोदमुद्भासियदीयकीर्ति-रामामुखं चुम्बति कार्तिकेयः ॥ १

तैरश्वयोगेन विवेकसेक-मुक्तास्ति या सापि जिनावतंस ! ।
विलोकिते कान्तिकलत्ववदास्य-चन्द्रोदये नृत्यति चक्रवाकी ॥२

पुरः प्रकीर्णानि कपोलपाली-तले तवाच्छे प्रतिबिम्बितानि ।
निभाल्य संदिग्धि बुधो जनः
किं चन्द्रस्य मध्ये कदलीफलानि ॥ ३

यो निर्जितैः पञ्चशरेण चक्रे कण्ठे कुठारः कमठे ठकारः ।
अकीर्तिनाट्यस्य च वाद्य(दि)तोऽलं
साम्यं क्व तेषां द्युसदां त्वयास्तु ॥ ४

अभव्यदौर्भव्यतयाऽङ्गभाजां येषां त्वदास्ये सुभगेऽपि दृष्टे ।
सन्तापसम्पत्तिरुदैति तेषां अयं शशी वह्निकणान् प्रसूते ॥ ५

त्वद्दानलीलादलितप्रतापे देव ! द्युकुम्भस्तव शक्तिमाप्तुं ।
भृगोः पतन्नादमिमं तनोति ठंठं ठठंठं ठठठं ठठंठः ॥ ६
(द्रुतविलम्बित)

जनिमहे जिन ! ते सवनोदकैः प्रसृमरैरमरेश्वरभूधरे ।
विदलितेषु नगेषु किलाभवन्नुपरि मौलमधस्तरुपल्लवाः ॥ ७
(द्रुतविलम्बित)

रसना स्तवने नयनं वदने श्रवणं वचने [च] करा(रो) महने ।
तव देव ! विशां कृतिनां सततं रमते रमते रमते रमते ॥ ८
(तोटक)

विश्वैकनायक ! कला नहि या त्वदर्हा-
कार्ये न या च कविता भवतः स्तवाय ।
लग्नो न यस्तु विभवो विभवश्च सा किं,
सा किं स किं स किमिति प्रवदन्ति धीराः ॥(वसन्ततिलका)९

अहीशोऽधस्तात्त्वामुपनमति जेतुं दितिसुतं
समादाय क्रोधान्मणिमधुपकान्तं किल धनुः ।
अधोऽधो मैनाकं चरति जगतीनाथ समभूद्
धनुःकोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः ॥(शिखरिणी)१०

जगच्चक्रं चक्रे चरणपरिचर्यैकरुचिना-
मुना त्वद्दासेन स्वमनसि समन्तान्निगमनम् ।
त्वदन्यो देवस्त्वां तुलयतु विभो ! चेद् भुवि भवेत्
धनुःकोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः ॥(शिखरिणी)११

प्रीतां रूपवतीं सतीं जिनपतेऽर्हल्लक्ष्मिलीलावतीं
हित्वा रूपरसोज्झितां रमयसे यन्मुक्तिसीमन्तिनीम् ।
तन्नूनं भवतापि तीर्थपतिना न्वेतत् स्फुटं निर्ममे
युक्तायुक्तविचारणा यदि भवेत् स्नेहाय दत्तं जलम् ॥ १२
(शा.वि.)

इत्थं योगीन्द्रचेतःकमलकमलभूमुक्तिकासारहंसः
कल्याणाङ्कूरकन्दः सममहिमरमामञ्जरीवल्लरीश्रीः ।
मन्त्रद्रून्मेषबीजं भुवनजनमनोल्लासलीलावसन्तः
श्रीपार्श्वः स्यात् समस्यास्तवकुसुमकृताभ्यर्चनोऽभीष्टलब्ध्यै ॥१३

(स्रग्धरा)

## ९५. ॥ श्रीपार्श्वनाथस्तुतयः ॥

अभिमतफललाभकरं चिन्तामणिपार्श्वनाथतीर्थकरम् ।
यरलवशषसहवर्णैः किञ्चिदहं वर्णयिष्यामि ॥ १

(वसन्ततिलका)

श्रीवल्लिराशिसुरसालरसालवाल !
श्वः श्रेयसाय स विहासरसोऽसहायः ।
अंहो विहाय सहसैव विशालबाहुः
श्रेयःश्रियं सह वृषैरिह शिश्रिये यः ॥ २

यो विश्वसंशयबिलेशयरैशरीरो
यः संवरारिसबलाहववारवीरः ।
यो हर्षवासररविर्विषयारिरंसु-
र्योवेह संवरसरोवरशालिहंसः ॥ ३

शेषाहिवावहिशरा बहुहावहेला-
लीलाविलासविवशासु वशास्ववश्यः ।
सेव्योऽसि वासवविशां सविशेषवीर्य-
शौर्याश्रयोस्यविरलं सरलाशयोऽसि ॥ ४

अर्हन् यशःसलिलराशिशशी रसायाः
सार्वः शिवालयविलासरसाय सोऽयम् ।
सर्व्वे सुरासुरसुरेश्वरसूरिसिंहाः
संसारवासविरहाय सिषेविरे यम् ॥ ५

यः स्वैरिवैरिविलयाय सहः सहस्वी
स्वीयस्ववंशबहुलाम्बरशर्व्वरीशः ।
शश्वलल्लौ वशविहाररसीह शीलं
श्रेयोरहस्यसरसीरुहसूर एषः ॥ (चतुरर्थमिदं ।) ६

ये पञ्चवर्गपरिहारसमेतमेतत्
पञ्चाक्षनिग्रहपराः स्तवनं पठन्ति ।
ते ही चतुर्थपुरुषार्थसुखं लभन्ते
तद्बोधिलाभसुभगास्तु ममापि बुद्धिः ॥ ७

## १६. ॥ श्रीजीरावलापार्श्वनाथस्तोत्रम् ॥

जीरावल्लि प्रभुपार्श्वं, पार्श्वयक्षेण सेवितम् ।
अर्चितं धरणेन्द्रेण पद्मावत्या प्रपूजितम् ॥ १

सर्वमन्त्रमयं सर्व-कार्य-सिद्धिकरं परम् ।
ध्यायामि हृदयाम्भोजे, भूतप्रेत-प्रणाशकम् ॥ २

श्रीमेरुतुङ्गसूरीन्द्रः श्रीमत् पार्श्वप्रभोः पुरः ।
ध्यानस्थितं हृदि ध्यायन्, सर्व-सिद्धिं लभेद् ध्रुवम् ॥ ३

श्रीपार्श्व-शोभा-विशाली, लक्ष्मी राज्य-जयप्रदः ।
जगद्गुरु जयत्येक-जीरापल्लि-विभूषणम् ॥ ४

जीरापल्लिपुरे फलर्धिनगरे वाणारसी स्वामिनी
श्रीशङ्खेश्वरनामकेषु, मथुरा-सेरिसके स्थम्भने ।
श्रीमद्वाहटपल्लिभिं पटतयो र्नागे, द्रहे श्रीपुरे,
भालज्जे करहेटके जिनपतिं श्रीपार्श्वनाथं स्तुवे ॥ ५

जीरापल्लिविभूषणं जिनपतिं श्रीपार्श्वनाथं मुदा;
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्ट-सुखोऽव्ययैरविरतं स्फूर्जत्प्रमोदद्वयैः
मोहद्वेषी जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ ६

## १७. ॥ श्रीजीरावलापार्श्वनाथस्तुतिः ॥

(उपजाति)

सुरासुराधीश्वरसेव्यपादं, विश्वत्रयीनेत्रसुधाप्रवाहम् ।
जिराउलीमण्डनपार्श्वनाथं, वामासुतं सर्वहितं स्तवीमि ॥ १

यो वन्दते पादयुगं त्वदीयं, दिनोदये वन्दितविश्वलोकम् ।
स शोकसंतापजरावियोगं, मुक्तेः पदं संलभते शुभात्मा ॥ २

दुःशाकिनीभूतपिशाचसर्प-विषादिदोषप्रणिनाशहेतुः ।
जिराउलीपार्श्वजिनेशनाम, स्मराम्यहं नित्यपवित्रगात्रः ॥ ३

पित्तप्रकोपज्वरवातपीडा-श्लेष्मादिरोगप्रसरप्रणाशम् ।
करोति जीराउलिमण्डनश्री-पार्श्वप्रभुः सेवकलोकसौख्यम् ॥४

स्फुरन्मृगेन्द्रानलवारिपूर-व्यालादिभीभञ्जन ! पार्श्वदेव ! ।
त्वत्पादपद्मं शरणं प्रपन्ना जनाः सुखं त्वत्पथि संचरन्ति ॥ ५

चौरादिदुष्टग्रहदुर्गकष्ट-निःशेषदोषादिहराय तुभ्यम् ।
जीराउलीवल्लिनवाम्बुदाय, नमो नमः पार्श्वजिनेश्वराय ॥ ६

लक्ष्मीयशःकीर्तिसमस्तविद्याऽ-नवद्यसौभाग्यरमानिवासः ।
श्रीपार्श्वनाथः किल कल्पवृक्षः, श्रेयःश्रियं यच्छतु वाञ्छितं च॥७

इत्थं स्तुतो विशदजीरकपल्लिदेवः,
पद्मावतीधरणराजकृतांह्रिसेवः।
विश्वातिशायिमहिमा मम शाश्वताय,
वामासुतो भवतु सर्वहितः सुखाय ॥ (वसन्ततिलका) ८

## ९८. ॥ श्रीजीरावलापार्श्वनाथस्तवः ॥

अमेय-वामेय-चरित्रचित्रं नो शिश्रयव्यञ्जनताभिरामम् ।
प्रशान्तिमूर्तिं गतकल्मषं तं नमामि जीराउलिपार्श्वनाथम् ॥ १

कामेय-नाराच-गणैरगण्यै-र्दुसद्दशाद्दृष्टिसरित्तरङ्गैः ।
विचित्रभङ्गैरिव यो न भिन्नस्तन्नौमि जीराउलिपार्श्वनाथम् ॥२

सहस्रधा वाग्विभवा यदीया अस्मादृशां संशयसम्भवाश्च ।
न्यच्चक्रुरन्तोविकृतीन् जिनं तं
नमामि जीराउलिपार्श्वनाथम् ॥ ३

ध्याने कुतोऽभूद्वपुषः सितोतः
कुन्दाद्ध्वेन्नो कुसुमः सितः किम् ।
दिदेव नीलादृहृदिति प्रवीक्ष्य
नृणां स्तुवे तं जिनपार्श्वनाथम् ॥ ४

नीला सुजाताश्चरणांशुभिर्ये सौवर्णिका वारिरुहा यदीयैः ।
भेद्याऽपि नोज्झन्ति सुनीलवत्त्वं
तं नौमि जीराउलिपार्श्वनाथम् ॥ ५

यद् दर्शनं दर्शनवन्नृणां किं सुवर्णमाणिक्यमिवातिरेजे ।
सद्भक्तियुक्ते हृदि पुण्यलभ्यं
तं नौमि जीराउलिपार्श्वनाथम् ॥ ६

नृपाधिकत्त्वं च सुरेन्द्रवत्त्वं न दुर्लभं यत्प्रणतेर्नराणाम् ।
सौभाग्यमानन्दमनन्तलक्ष्मीस्तं नौमि जीराउलिपार्श्वनाथम् ॥७

इत्थं श्रीजिनराज ! पार्श्व ! भवतः पादाम्बुज-संस्तवा-
द्यत्पुण्यं समुपार्जितं खलु मया देवर्द्धिसिद्धिप्रदम् ।
तच्छ्रीमच्छ्रिवपुः प्रमोदितहृदां भूमिस्पृशां सिद्धये
भूयान्नित्यमनिन्दितं शिवपुरीचैत्ये स्थितस्यांह्रिणः ॥ ८

## १९. ॥ श्रीजीरावलापार्श्वनाथस्तोत्रम् ॥

श्रीजीरापल्लिपुरी मेरुदरी धरणि भूषणाभरणम् ।
दारिद्र्योदयहरणं श्रीपार्श्वसुरद्रुमं नौमि ॥ १

मेघोपमानमऽमानदाननिदानपुण्यसुकानने
सारम्भशारभसम्भवाभमऽमन्दमदपञ्चानने ।
कलिकालकालकरालचञ्चललेलिहानसुधाहृतं
प्रभुपार्श्वमेव नमामि कामितपूरणैकमहोभृतम् ॥ २

रुचिररुचिपूरिताशं, जीरापल्लीपुरीविहितवासम् ।
पार्श्वं भज कृतभेदं चिन्तामणिमिव महानन्दम् ॥ ३

नन्दन्तमङ्गसुरङ्गचङ्गिमभङ्गिराङ्गिगुणोज्जवलं
जलदाऽलजालविशालतालतमालकोकिलभाकलम् ।
धरणीधुरन्धरधीरवीरगभीरराजसभाजितं
वामेयमाशुभजामिकामिव कामठप्रसभाऽजितम् ॥ ४

दशदिशिविलसितमहिमं दुरिततितिव्रततिमथनमाघहिमम् ।
अहिपतिसेवितमेनं नमत जिनं निधिमिव समेनम् ॥ ५

नमदऽमरनरवरकिन्नरासुरमौलिमौलिनतक्रमं
क्रमचूर्णितातिविचारचञ्चुरचतुरचित्तचरभ्रमम् ।
भवसागरोदरचारिमानवतारणैकतरण्डकं
जिनमाश्वसेनिमऽहं महेयमिह प्रभावकरण्डकम् ॥ ६

यशसा वासितभुवनं, यौवनवनवासिमदनदहनवनम् ।
फणिफणमणिगणकान्तं मनःप्रशान्तं स्तुवेऽर्हन्तम् ॥ ७

तिलकायमानमिलामहेलाभालभुवि भयभञ्जनं
जनरोगयोगवियोगकुग्रहभौतिकग्रहगञ्जनम् ।
पथि घोरचोरकठोरभूपतिमानमर्द्दनपण्डितं
हृदि धारयामि धुरीण जीरापल्लिपार्श्वमखण्डितम् ॥ ८

नानादेशनिवेशसङ्घसमुदायमहावन
पद्मोल्लासवसन्तमाससन्निभजनपावन ।
विश्वव्यापकयशः प्रतापशशिसूरनभस्थल ।
सकलमहिमहरिदलितसबलकलियुगदन्ताबल ।
कविताद्यवर्णकविना विनुत जीरापल्लिपुरीमुकुट ।
जय पार्श्वजिनेश्वर मेरुगुरुकामितकामित कामकूट ॥ ९

## १००. ॥ श्रीजीरावलापार्श्वनाथस्तोत्रम् ॥

(पादाकुलकम्)

तरुवरभूषितभूमिमहेलः, स जयति सिन्धवनामा शैलः ।
दूरागतजनदलितक्लेशः, स जयति जीरापल्लिनिवेशः ॥ १

त्रिभुवनपावनमहिमामेयः, स जयति देवः श्रीवामेयः ।.आंचली॥
अश्वसेननृपवंशवतंसः, वामाकुक्षिसरोवरहंसः ।
सेवागतधरणोरगराजः सुवचनोषितभव्यसमाजः ॥ २

भवभीतागतजनताशरणः, सुरसुराधिपवन्दितचरणः ।
विविधव्याधिविनाशनधीरः, सङ्कटधूलीहरणसमीरः ॥ ३

निपतति सकलसुरालयराजि-र्यस्मिन्नहनितसोभरभाजि ।
तव भवने तस्मिन्न विवादः,
स्फुरति सदा निःस्वाननिनादः ॥ ४

सुररिपुमिहिरहरादिकदेवः, व्रातोऽनेशद्यस्य भियेव ।
काले तस्मिन् विहितव्यापः,
प्रसरति पार्श्वजिनस्य प्रतापः ॥ ५

मासि मधौ मुक्त्वा निजमोक-स्तत्रागच्छति सुकृतीलोकः ।
इतरकुसुममिव निरुपमरङ्गः,
कमलं परिमललुब्धो भृङ्गः ॥ ६

अथ सुकृतपथा ध्वन्या, अन्यान्यपास्य कर्वाणि ।
वर्णनमाकर्णयतावसरायातं वसन्तस्यः ॥ ७

अथ रासाबन्धः

अपर ऋतु पुराजेव, वसन्तः सरसि जवासितजलवसन्तः
क्षितितलमलञ्चकार बहुमत इति गीताकुलवनितम् ।
पट्टबन्धमलभत बुधजनितं रसजातौ शृङ्गारः ॥ ८

कोकिलकुलकृतकलकलचकितः पथिकपथितो
गृहमभिचरिततः स्ववधूनयनविनोद ।
कलिकाभिर्विरहिषु कलिकारं
दृष्ट्वा पुरतः पथि सहकारं गाढतरं स रुरोद ॥ ९

चन्दनघनपरिमलवाहीकाः प्रीणितरङ्गदनङ्गानीका-
श्चेलुर्मलयसमीराः वक्रविलोकनविधुरिततरुणा
बाहूबाहविवरण निष्करणातुष्टः प्रमदा वीरा ॥ १०

विरहीकृतजीवितप्रत्यूहं, विकसितकिंशुककुसुमसमूहम् ।
ज्वलितदवानलमाह, मधुकरगणमिषतः सविषादम्
विरहविनाशनमयमपवादं, बकुलतरुः समुवाहम् ॥ ११

चञ्चच्चम्पक ? कोरकमाला मधुदीपस्य शिखेव विशाला
भाति पिशङ्गविरोका, चलदृक्चरणाभिहताः
लोकं सकलं प्राहुर्जगति सशोकं मुदिता रक्ताशोकाः ॥ १२

कोमलकिशलयकरचालनया
मधुकरमधुररवैः पाटलया कारितमिव सानन्दम् ।
अभिसरति स्म सविस्मयचित्तम् ।
सममादाय नयागतवित्तं, वनभुविकां(कौ?) तुकवृन्दम् ॥ १३

केचन विविशुः सरसी सलिले, चन्दनमृगमदपरिमलबहुले ।
निजदयिताभिः साकान्ताभिः कण्ठेन नलिनीनालम् ।
निहितं निरसितुमभवन्नालं, पश्य प्रेमविपाकम् ॥ १४

न्यासविलासकलारसचतुरः,
स्वयमवचितकुसुमस्रजमपरः कण्ठे ।
निजकामिन्याः सापि च मुक्त्वा मुक्ताहारं,
भक्त्या दधती तमलङ्कारम् ॥ १५

मुमुदे धन्यंमन्या वापीवारिविगाहनलोला,
विरचितदोला रसकल्लोला ।
अभुवनमखिलयुवानः, गीतं शुश्रुवुरमृतसमानं
नृत्यं ददृशुरनर्गलदानं, प्रकटितधनमहिमानः ॥ १६

(शार्दूलविक्रीडित)
काचित्कुन्दवती कुरङ्गनयना बिम्बाधराब्जानना
सद्वक्त्रोरसिजालसद्भुजलतारम्भोरूरल्पोदरी ।
जीरापल्लिमितामहर्द्धिवनितायानं विहाय प्रभो
प्रासादं प्रविविक्षुरित्यलमलञ्चक्रे स्वकीयं वपुः ॥ १७

चिकुरनिकरं कुरङ्गेक्षणावासयद् गन्धराजेन
व्यथितसीमन्तमन्तर्हितं नागरीनागरक्तेन ।
कुसुमकलिताकृतं शेखरं शिरसि सा धारयामास
लाभमक्षोभशोभालयं मृगमवै(दै)स्तिलकयामास ॥ १८

कनकताडङ्कयुगमङ्कगं श्रवणयोः साधुसाधना
नलिनलीनालिसन्देहदं कज्जलं लोचनेऽदत्त ।

नागोदरसनागोदरी कण्ठपीठे विशश्राम
उरसिहारं मनोहारिणं, सा दधो दीधितेर्धाम ॥ १९

रङ्गढ्यै बाह्यो रङ्गदौ नोदितौ नेत्रयोर्कस्य
कटं कङ्कणभववैभवं जीवनं तरुणलोकस्य ।
किङ्किणी क्वणितकौतूहलं कटितटे
रसनयाकारि नूपुरद्वैतमद्वैतभं तत्पदाभ्यां तदाधारि ॥ २०

चारुचीराङ्गराहगादिना, भीतदङ्गेन सा भाजि
वीक्ष्य यां विगतसंरम्भया रम्भया ।
श्रीमदो त्याजि हंसगत्याचरन्ती ततो भाविनी भवनमावश्य
निर्ममे स्नात्रमघवारिणा वारिणा विश्वनाथस्य ॥ २१

चन्दनेनाङ्गमालिप्य सा मिलितघनसारसारेण ।
हेमभूषाभिरभ्यर्च्चयामास तं कुसुमभारेण ॥ २२

कोरकाकारकरपल्लवांपल्लवस्यापि शमनाय ।
भावविज्ञेऽपि विज्ञापना विनयकर्मेत्यधीयाय ॥ २३

जय जय त्रिभुवनवनकृपाकन्दकन्दलनजीमूत ।
नमदमर्त्येश ! निजसाधनानिश्चलीकृतमनः
सूत इहमयक्रम्य भूयो भवान् ।
भेजुषाकष्टकूटानि कथमपीशो भवानधिगतः
परदैवतधिया मानि ॥ २४

त्वं देवं गुरुर्दैवतं त्वं विभुस्त्वेषिता त्वं च मातेव
वसति सततं कृपासागरस्त्वदपरो न हृदि मे देव ! ।

अव्यमे संपदः प्रतिपदं मङ्गलावरलिरभीयेते
पुण्यकोशोऽकृशो मे भव यत्त्वयि मे चेतः ॥ २५

एवं कृत्वा स्तुतिमभिनवां प्रेमसम्पूर्णदृष्ट्या
निध्यायन्ती पतिमतुवरं सञ्चरन्ती सलीलम् ।
देवस्याग्रे निजपरिजनः स्त्रीगणान्तः समेतः
रङ्गं तेने प्रमुदितमना गीतिहल्ली स काव्यम् ॥ २६

(मन्दाक्रान्ता)

यशोवादवर्णनरूपम्

## १०१. ॥ श्रीजीरावलापार्श्वस्तोत्रम् ॥

(भुजङ्गप्रयातम्)

पुरी जीरिकापल्लिका पारिजातं
घनच्छाय कायं कृताभीष्टजातम् ।
सदासार सेवा परावार देवं
पणाये मुदा पार्श्वदेवाधिदेवम् ॥ १

गुणानां स्तवः श्रावकानां क्व तेषा-
मधीशातीमूढ क्व मे बुद्धेरै(द्धरे)षा ।
क्व भो भोजनं चक्रिणां... णस्य
क्व तुच्छा समृद्धिश्च भिक्षाचरस्य ॥ २

तथापि प्रभो ! भूरिभूभवैनवाढं
समुत्साहितो नैथमौनं विगाढं ।

समर्थ सूतोहावृथागी प्रयाणं ।
दधानो गमिष्यामि हास्यावकाशम् ॥ ३

निपीयाथा(थ)वानाथते स्वातिधारा,
...तिप्यान.......पानीयधाराः ।
जडापूरिताप्या सुसंचित्ति भुक्ता
मदीया सवित्रीसुवृतोक्तिमुक्ताः ॥ ४

ततस्तात ताभिर्मुदागुम्फिताभिः
विधास्यसपर्या(सु) नेतुर्वराभिः ।
फलं जन्मिनो जन्मिनामेतदेवा
निशंयइविधाद्यसे पूज्यसेवा ॥ ५

जगत्याः समग्रं सा(स)मादाय सारं
स्तुवन्धेवसा तेयसो कारितारम् ।
यतो नाथ ! लोकत्रये तत्समानं
परं दृश्यते नैवं किञ्चित् प्रधानम् ॥ ६

जगन्नाथ ! जाने यशस्तावकीनं,
घनं पातुकामोरसोल्लासपीम(न)म् ।
सहस्रं मुखानीव तत्रापि लोलासहस्रद्वयीमिमेषशेयश्चकार ॥ ७

गुणेनावदातिष्ट मिष्टेन साम्यं प्रभार सुवर्णस्यदघ्नश्चकास्यम् ।
परं किन्त्वसौ सेवितो जाड्यदोषं
लुनीते विद्यते(धत्ते) यदस्यैव पोषम् ॥ ८

यशस्ताविभितेपयसाधुमयो यदास्वादितं तृप्तिदानायजशो-
ये किमायनभूयोपि य रुपीयमानं
न बोभोति संतोष पोषे निदानम् ॥ ९

यशोव्याज तोसौ जिनः किन्तु सारं
वङ्कारन्तरङ्ग सरशुद्धिकारम् ।
चकारान्तरङ्गंसयदत्रातरात्भा(त्मा)न एते
रमन्तो विशुद्धिं ततश्चान्तरङ्गां लभन्ते ॥ १०

त्रिलोकसु गङ्गात्रयी किर्ते भङ्ग्या-
तवाधीश ! जानामि जिग्ये सिताङ्ग्या ।
त्रिदेवीशिरः कुण्डिकापादलीता
पलाव्येवजातायतः सातिहीना ॥ ११

स कैलाशशैलेऽपि सौवैर्महोभि
र्धनं नेतु तस्य जिग्ये यशोभिः ।
यतस्तस्य दुर्वर्णभावो महिष्टः ।
क्षमामण्डले श्रूयते द्यापि पुष्टः ॥ १२

निजे ध्वाल्यवादेविधः सन्निधानाजिनश्लोकचण्डीशयो जीयमाने।
किमेकस्य तेन स्वलोकावकाशः
परश्चार्ध्धचन्द्रेणवाक्रनिराशः ॥ १३

लावण्य पुण्यमवलोक्य यशोदसीयं
दृग्दोष-वारण-कृते विधिरौचितीज्ञः ।
मन्ये तु रुपलवणोदकमस्यकर्तृ
पीयूषयूषघणसारयुगञ्चकार ॥ (वसन्ततिलका) १४

स्पृध्व किरं किलमग्रेतिरुषाऽपद्वय
लक्ष्मीमकारिविधुमण्डलमासुश्रूयम् ।

नूनं प्रचण्डयशसास्ये जिणस्य
तेण मुग्धो मृगौ वसति वनभ्रमेण ॥ १५

जाने न सम्भवति निर्मलपूर्णमासी
चन्द्रोयमन्तरकलङ्ककलावभासी ।
किन्तु प्रभो ! तवसमुज्वलकीर्तिरामा
रामाननं मृगमदाहितपत्ररेषा ॥ १६

श्वेतार्थमार्थजयिनो यशसस्तवास्य
पट्टाभिषेकमिव कर्तुमये शुभास्य ।
शङ्के विचारचतुरोश्चतुराननेऽसौ
योग्यान्यमूनि विदधे नवसाधनानि ॥ १७

सिंह(हा)समं(नं) ? किल विशालहिमालयाद्रिः
सूक्षीरनीरधि पयांसि महापयांसि ।
मर्तण्ड सोमयमलङ्कलाद्यौ कुम्भौ
शुभ्राभ्रकाणि शरदस्तानुशोधिवासः ॥ १८

कीर्तिर्विभो शुभति नूतननर्त्तकीव
या भव्यभव्यजन संहतिमध्यगापि ।
वाचंयमैरपि चिरं परितुष्यमाना
लोकापवादजननी नहि बोभवीति ॥ १९

पञ्चेन्द्रियेषु जिननायकवर्णनीये
द्वे एव ते किल तयोः सफलं च जन्म ।
ये शर्करामधुसुधासुरशाषि(खि) शस्य (सारदूपानो मम ?)
कुशलविलासश्रिये-मधुरं पिबतो यशस्ते ॥ २०

इत्येवं नम्रकम्रासुरसुरनिकरोतुङ्गभूसङ्गमौलि
श्रीमत्कोटीरहीर-घसृमरकरसनीरा(र)धौतन्दि मूलः ।
श्रीजीरापल्लिनेता प्रणत जनमनः कामित(ते)कल्पवृक्षः
स्यान्नित्यं श्रूयमानो मम कुशलविलासश्रियेऽसौसमक्षः ॥ २१
(स्रग्धरा)

(अशुद्धं सम्भवति)

## १०२. ॥ श्रीशङ्खेश्वरपार्श्वजिनस्तवनम् ॥

(शार्दुलविक्रीडितम्)

ऐंकारस्मृतिसावधानमनसा स्तोतुं प्रवर्त्ते महा-
मोहापोहपरायणं जनमनोऽभीष्टार्थसार्थप्रदम् ।
श्रीशङ्खेश्वरभूषणं भगवतामग्रेसरं वासव-
श्रेणीवेणिमिलत्प्रसूनपटलीमाध्वीकधौतक्रमम् ॥ १

मूर्त्तिस्ते जिनराज ! राजति जगद्दारिद्र्यविद्राविणी
स्वर्योषिन्नयनोन्मदालिपटलीपेपीयमानप्रभा ।
शारीरान्तरदुःखतापजनितं खेदं नयन्ती व्ययं
वल्लिः कल्पतरोरिव त्रिभुवनप्रख्यातसौरभ्यभूः ॥ २

कामं दर्शनतोऽपि मन्नयनयोरुल्लासमातन्वती
मच्चेतःकुमुदं विकाशयितुमप्यह्नाय बद्धादरा ।
मद्ध्यानार्णवपूरपूरणपटुः स्वामिंस्तवोल्लासिनी
मूर्त्तिः किञ्चन चन्द्रकान्तलहरीप्रागल्भ्यमभ्यस्यति ॥ ३

मूर्त्तिस्ते महनीयमोहमदिरोद्गारावघूर्णद्दृशां
व्याक्षेपं परमौषधीव नियतं निर्नाशयन्त्यञ्जसा ।
येषां लोचनगोचराश्चिरमभूद्रोमाञ्चपुष्पाञ्चिताः
ते किंनाम न नाम(?) वामनयनालावण्यलक्ष्मीजुषः ॥ ४

मूर्त्तिस्ते स्नपनैर्न विभ्रमभरैः सांवर्त्तिकैश्चुक्षुभे
पौलोमीचललोचनाञ्चलमिलद्भ्रूभङ्गसंसर्गिभिः ।
आबिभ्रत्कमठोपसर्गसहनीं धैर्यप्रधानक्षमां
स्वामिंस्तत्किममन्दमन्दरगिरिस्पद्र्धासमृद्धादरा ॥ ५

धाम ध्यायसि यत् पुरा त्रिजगतीधामातिशाधि स्फुरन्
तत्सङ्क्रान्तिवशादिवेयमनिशं मूर्त्तिस्तवोद्योतिनी ।
अङ्गुष्ठात् पुरतस्तव क्रमभवादिङ्गाललीलावहं
नो चेत् सर्वसुरासुरैः कथमहो शक्त्या जितं रूपकम् ॥ ६

अद्यावद्यकलापतापदलनक्रीडामिवातन्वती
मूर्त्तिः स्फूर्त्तिमती लता सुरतरोर्मूर्त्ता मयोद्वीक्षिता ।
ब्रह्मज्ञानकलाविलासकुशलव्यापारपारङ्गतै-
र्योगीन्द्रैरनुभूतवैभव विभो ! तेनाऽनुमन्ये जनः ॥ ७

मूर्त्तिस्ते प्रविभाति मोहतिमिरप्रध्वंसभानुप्रभा
मूर्त्तिस्ते भवसिन्धुमध्यनिपतद्भव्योद्धृतौ नौर्दृढा ।
मूर्त्तिस्ते सकलैर्हितार्थपटलीसम्पूरणेकामगौ-
मूर्त्तिस्ते मम तीर्थनाथ ! सततं श्रेयः श्रिये कल्पताम् ॥ ८

प्रातर्योऽष्टकमेतत् प्रमुदितचेताः प्रभोः पुरः पठति ।
कष्टसहस्रं तीर्त्वा लभतेऽसौ परममानन्दम् ॥ (गाथा) ९

# १०३. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥

(उपजाति)

सौभाग्यभाग्यातिशयाभिरामं, सदाचिदानन्दरसैककामम् ।
योगिन्द्रचित्ताम्बुजराजहंसं, पार्श्वं स्तुवे शङ्खपुराभिधानम् ॥ १

प्रतिप्रभातं जगदेकतातं, वामाङ्गजातं, गतदोषजातम् ।
अनन्तसातं मदरेणुवातं, पार्श्वं स्तुवे शङ्खपुराभिधानम् ॥ २

अपारसंसारपयोधिपारं, गतं विपद्वल्लिभिदा कुठारम् ।
त्रैलोक्यलक्ष्मीहृदयैकहारं, पार्श्वं स्तुवे शङ्खपुरावतारम् ॥ ३

कदा गमी सिद्धिमतीव प्रज्ञे, कृते तदाख्यां जिनराजमुख्याम् ।
आगामि पार्श्वाभिध तीर्थकर्त्तुः,
सदार्यघोषो भविता गणी त्वम् ॥ ४

श्रुत्वेति दामोदरतीर्थवाचम्, अषाढनामास्तिकमुख्यदक्षः ।
निर्म्माय बिम्बं प्रभुपार्श्वसत्कं,
सम्पूज्य मुक्तं प्रथमेऽथ कल्पे ॥ ५

अपुपूजत्त्वं विनमिर्नमिश्च, वैताढ्यशैले वृषभेशकाले ।
सौधर्मकल्पे सुरनायकेन, त्वं पूजितो भूरितरं च कालम् ॥ ६

आराधितस्त्वं समयं कियन्तं, चान्द्रविमाने किल भानवेपि ।
पद्मावती देवी तथा च नागा-धिपेन देवावसरेप्सितस्त्वम् ॥७

यदा जरासङ्घप्रयुक्तविद्या-बलेन जातं सबलं जरार्त्तम् ।
तदा मुदा नेमिगिरा मुरारि, पातालतस्त्वां तपसा निनाय ॥ ८

तव प्रभो ! स्नात्रजलेन सिक्तं रोगैर्विमुक्तं कटकं बभूव ।
संस्थापितं तीर्थमिदं तदानीं, शङ्खेश्वराख्यं यदुपुङ्गवेन ॥ ९

इहापि जातःषडशीति वर्ष, सहस्र सङ्ख्यस्तव देव ! कालः,
सहस्रजिह्वोऽपि ततस्तवाद्यम्, वक्तुं समर्थं किमु बोभवीति ॥१०

तथा कथं चैत्यविचित्रमत्र, श्रीकृष्णराजो रचयाञ्चकार ।
सद्द्वारकस्थोपि यथा भवन्तं ननाम नित्यं किल सप्रभावम्॥११

श्रीविक्रमान्मन्मथ–बाण मेरू–महेश तुल्ये समये व्यतीते ।
त्वं श्रेष्ठीनां सज्जननामकेन, निवेशितः सर्वसमृद्धिदोऽभूः ॥१२

झञ्झुपुरे सूर्यपुरेऽनवाप्तं, ततो धिगम्याङ्गमनङ्गरुपम् ।
अचीकरत् दुर्जन–शल्य–भूपो,
विमान–तुल्यं तव देव ! चैत्यम् ॥ १३

काले कलौ कल्पतरुः किमेषः,
किं कामधेनुः किमु कामकुम्भः ।
यथाभिलाषं सुखदायकत्वं,
त्वं सेवकैरीश ! विकल्पितोसि ॥ १४

स्वर्गेपि राज्येपि धनेपि वाञ्छा, काचिन् न मे चेतसि वर्तमाना।
विश्वैकबन्धो ! गुणरत्नसिन्धो ! देयाः देव ! सदा स्वसेवा ॥१५

## १०४. ॥ श्रीशङ्खेश्वरपार्श्वजिनस्तवः ॥

(अनुष्टुप्)

यस्य ज्ञानदयासिन्धो–र्दर्शनं श्रेयसे ध्रुवम् ।
स श्रीमान् पार्श्वतीर्थेशो, निषेव्यः सततं सताम् ॥ १

वामासूनोर्यशःपुञ्जै–रगाधस्यानघा गुणाः ।
स्मर्यन्ते येन स स्मार्यो, भवेत्प्राचीनबर्हिषाम् ॥ २

विहाय विषयासक्तान्, सांसारिकसुरासुरान् ।
सेव्यतामक्षयो धीराः, पार्श्वदेवोऽपरप्रभुः ॥ ३

जिताः सर्वार्थदानेन, येन कल्पद्रुमा अपि ।
भवेदभ्यर्चिता लोके, स श्रिये चामृताय च ॥ ४

संस्तुतो मधुरश्लोकै-र्जैनलाभप्रदायकः ।
कल्याणकारको भूया-च्छ्रीमान् श(मच्छ)ङ्खेश्वरप्रभुः ॥ ५

## १०५. ॥ श्रीशङ्खेश्वरपार्श्वजिनस्तवः ॥

(उपेन्द्रवज्रा)

यदीयपादाम्बुरुहि प्रसक्ता भवन्ति ते पूरितकामिताशाः ।
सुधाशनैस्सेवितपादपार्श्वं, नवीमि तं शङ्खपुरीशपार्श्वम् ॥ १

सुमालनीलोत्पलशालिदेहं, विशालसौभाग्यगुणैकगेहम् ।
कुवादिवल्लीनिकरैकपर्शं, नवीमि तं शङ्खपुरीशपार्श्वम् ॥ २

मनोज्ञकैवल्यकृतानुरागं, विनिद्र-पुष्पोच्चयपूजिताङ्गम् ।
अनेकशान्तादिगुणाधिवासं, नवीमि तं शङ्खपुरीशपार्श्वम् ॥ ३

यदीयभालेन विनिर्जितेन्दुर्विहायसि भ्राम्यति लज्जितः सन् ।
कुवादिसारङ्गसुरज्जुपाशं, नवीमि तं शङ्खपुरीशपार्श्वम् ॥ ४

इत्थं स्तुतो जिनवरो भवकर्मवेदी,
पीयूषपायिपतिभिः कृतपूजिताङ्गः ।
शङ्खाऽऽह्वपत्तननिवासनिवासरागी,
सौख्याय मे भवतु सज्जयसारशाली ॥ (वसन्ततिलका) ५

## १०६. ॥ श्रीशङ्खेश्वरजिनस्तवः ॥

(शालिनीः)

गौडीग्रामे स्तम्भने चारुतीर्थे
जीरापल्यां पत्तने लोद्रवाख्ये ।
वाणारस्यां चापि विख्यातकीर्तिं
श्रीपार्श्वेशं नौमि शङ्खेश्वरस्थम् ॥ १

इष्टार्थानां स्पर्शने पारिजातं
वामादेव्या नन्दनं देववन्द्यम् ।
स्वर्गे भूमौ नागलोके प्रसिद्धं
श्रीपार्श्वेशं नौमि शङ्खेश्वरस्थम् ॥ २

भित्वाऽभेद्यं कर्मजालं विशालं
प्राप्यानन्तं ज्ञानरत्नं चिरत्नम् ।
लब्धामन्दानन्दनिर्वाणसोख्यं
श्रीपार्श्वेशं नौमि शङ्खेश्वरस्थम् ॥ ३

विश्वाधीशं विश्वलोके पवित्रं
पापगम्यं मोक्षलक्ष्मीकलत्रम् ।
अम्भोजाक्षं सर्वदा सुप्रसन्नं
श्रीपार्श्वेशं नौमि शङ्खेश्वरस्थम् ॥ ४

वर्षे रम्ये स्वर्गदोन्निमिचन्द्र-
सङ्ख्ये मासे माधवे कृष्णपक्षे ।
प्राप्तं पुण्यैर्दर्शनं यस्य तं च
श्रीपार्श्वेशं नौमि शङ्खेश्वरस्थम् ॥ ५

## १०७. ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तुतिः ॥

(त्रिभङ्गी)

शिवसुखदातारं विश्वाधारं सौख्याकारं नेतारं
जितमदनविकारं करुणागारं हतरिपुवारं जेतारम् ।
कृतभवनिस्तारं परमोदारं स्तवनापारं त्रातारं,
गुणपारावारं कीर्तिस्फारं केवलधारं धातारम् ॥ १

आनन्दासक्तं तोषितभक्तं छद्मवियुक्तं सुव्यक्तं,
मदमत्सरमुक्तं तारणसक्तं विषयविरक्तं शिवरक्तम् ।
अव्याहतभद्रं धैर्यगिरीन्द्रं क्षमासमुद्रं सन्मुद्रं,
मुखनिर्जितचन्द्रं प्रणतसुरेन्द्रं महामुनीन्द्रं निस्तन्द्रम् ॥ २

सुखदायिस्मरणं दुःखितशरणं वन्दितचरणं विगतरणं,
कृतदानोद्धरणं कलिमलहरणं विमलीकरणं प्रवरपदम् ।
प्रकटीकृतविनयं दर्शितसुनयं प्रवचननिलयं सुगुणमयं
ह्यगणितगुणनिचयं मुनिजनहृदयं पार्श्वजिनं जय क्षपितभयम्॥३

महामन्त्रगर्भितम्

## १०८. ॥ श्रीकलिकुण्डपार्श्वजिनस्तवनम् ॥

(स्रग्धरा)

श्रीमद्देवेन्द्रवृन्दामलमुकुटमणिज्योतिषां चक्रवालै-
र्व्यालीढं पादपीठं शठकमठकृतोपद्रवाऽबाधितस्य ।
लोकालोकावभासिस्फुरदुरुविमलज्ञानसद्दीप्रदीपः
प्रध्वस्तध्वान्तजालः स वितरतु सुखं पार्श्वनाथोऽत्र नित्यम् ॥१

ह्राँ ह्रीँ ह्रूँ ह्रौँ विभास्वन्मरकतमणिभाकान्तमूर्त्ते ! हि बं मों
हँ सँ तँ बीजमन्त्रैः कृतसकलजगत्क्षेमरक्षोरुवक्षाः ।
क्षाँ क्षीँ क्षूँ क्षौँ समस्तक्षितितलमहित ! ज्योतिरुद्योतिताशः
क्षँ क्षौँ क्षँः क्षिप्तबीजात्मकसकलतनुः सत्पदः पार्श्वनाथः ॥ २

ह्रौँकारे रेफयुक्तं रररररररां देव ! संसँ सयुक्तं
ह्रौँ क्लीँ ब्लूँ द्रां(द्रीं) समेतं वियदमलकला क्रोञ्चकोद्भासि हुँ हूँ।
धुं धुं धुं धूम्रवर्णैरखिलमिह जगन्मे विधेयानुकृष्णं
वौषड्मन्त्रं पठन्तस्त्रिजगदधिपते ! पार्श्व ! मां रक्ष नित्यम् ॥३

आँ क्राँ ह्राँ सर्ववश्यं कुरु कुरु सरसं कार्मणं तिष्ठ तिष्ठ
क्षं क्षं हं रक्ष रक्ष प्रबलबलमहाभैरवारातिभीतेः ।
द्रां द्रीं द्रीं द्रावयन्ती द्रव हन हन तं फट् वषट् बन्ध बन्ध
स्वाहा मन्त्रं पठन्तस्त्रिजगदधिपते ! पार्श्व ! मां रक्ष नित्यम् ॥४

हँ हँ झाँ झाँ क्षहंसः कुवलयकलितैरञ्चिताङ्ग ! प्रमत्तै-
र्झां झां हं यक्ष हंसं हर हर हरहूं पक्षि वः सत्क्षिकोपं ।
वं झं हं सः सहंसः वससरसरसं सः सुधाबीजमन्त्रै-
स्त्रायस्व स्थावरादेः प्रबलविषमुखं हारिभिः पार्श्वनाथ ! ॥ ५

क्ष्माँ क्ष्मीँ क्ष्मूँ क्ष्मौँ क्ष्मरेतैरहपतिवितनुर्मन्त्रबीजैश्च नित्यं
हाहाकारोग्रनादैर्ज्वलदनलशिखाकल्पदीर्घोर्ध्वकेशः ।
पिङ्गाक्षैर्लोलजिह्वैर्विषमविषधरालङ्कृतैस्तीक्ष्णदण्डै-
र्भूतैः प्रेतैः पिशाचैर्घनदकृतमहोपद्रवाद् रक्ष रक्ष ॥ ६

झ्रौँ झ्रौँ झ्रँः शाकिनीनां सपदहरसदं भिन्द्धि शुद्धेद्धबुद्धे !
ग्लौँ क्ष्मँ ठँ दिव्यजिह्वागतिमतिकुपितः स्तम्भनं संविधेहि ।

फट् फट् सर्वाधिरोगग्रहमरणभयोच्चाटनं चैव पार्श्व !
त्रायस्वाशेषदोषादमरनरवरैमौंत्तिपादारविन्दः ॥ ७

इत्थं मन्त्राक्षरोत्थं वचनमनुपमं पार्श्वनाथस्य नित्यं
विद्वेषोच्चाटनं स्तम्भन वन(?) जय वशं पापरोगापनोदैः ।
प्रोत्सर्पज्जङ्गमादिस्थविरविषमुखध्वंसनं स्थायुदीर्घ-
मारोग्यैश्वर्ययुक्तो भवति पठति यः स्तौति तस्येष्टसिद्धिः ॥ ८

## १०९. ॥ श्रीकलिकुण्डयन्त्रस्तवनम् ॥

(स्रग्धरा)

ह्रींकारं ब्रह्मरुद्धं स्वरपरिकलितं वज्ररेखाष्टभिन्नं
वज्रस्थागन्तराले प्रणवमनुपमानाहतं सां सणी च ।
कर्णोतीर्थात्सपिण्डान् हभमरथउसखात् वेष्टयेतद् वदन्ते
वज्राणां यन्त्रमेतत् क्षरकृते दुष्टविद्या विनाशप्रयुक्तम् ॥ १

पिण्डान् स्थापापनोदक्षहभमरथसात् युक्तादिस्यु ।
शाकिन्यो यान्ति नाशं वरलकयहसैत्रैनयुक्तेर्महोग्राः ।
यन्त्र श्रीखण्डलिप्तौ लिखितशुचिवसे कांशपात्रे सुमन्त्री
लेखिन्या दर्भजातं निखिल-जनहितं तस्य सौख्यं विभक्ती ॥२

प्रणम्य देवेन्द्रनुतं जिनेन्द्रं, सर्वज्ञसुज्ञप्रतिबोध सुज्ञम् ।
स्तोतुं सदाहं कलिकुण्डयन्त्रं सर्वत्र विघ्नौघ-विनाशदक्षम् ॥३

(उपजाति)

नित्यं स्मरन्तोऽपि हि येऽपि भक्त्या
शक्त्या स्तुवन्तोऽपि जपन् सुमन्त्रम् ।
पूजां प्रकुर्वन् हृदये दधाना, सर्वेप्सितं यच्छति मन्त्रराजम् ॥४
(इन्द्रवज्रा)

(उपजाति)

गृहाङ्गणे कल्पतरु प्रसूतः, चिन्तामणि तस्य करे लूलोट ।
गावश्च तुल्यास्ति च कामधेनो-,
र्यस्यास्ति भक्तिः कलिकुण्ड-यन्त्रे ॥ ५

नमामि नित्यं कलिकुण्डयन्त्रं, सदा पवित्रं कृत-रत्नपात्रम् ।
रत्नत्रयाराधन-भाव-लभ्यं, सुरासुरैर्वन्दितमाद्यमिदम् ॥ ६

सिंहेभ सर्प्पाग्निजलाब्धिचोर-,
विषादयोऽन्येऽपि सदापि विघ्नाः ।
व्याध्यादयो राजकुलोद्भवं भयं,
नश्यन्त्यवश्यं कलिकुण्ड-पूजया ॥ ७

सुदुष्टबन्धैर्निगडनियन्त्रीतैः, तुट्यन्ति शीघ्रं प्रजपत् सुमन्त्रम् ।
ज्वरातिसारग्रहणी विकाराः, प्रयान्ति नाशं कलिकुण्ड-पूजया॥८

वन्ध्यापि नारी बहुपुत्रयुक्ताः संसारसक्ताः प्रियचित्तरक्ता ।
यस्यास्ति चित्ते कलिकुण्डचिन्ता, नमाम्यहं सततं त्रिकालम्॥९

अनर्थसर्व-प्रतिघात-दक्षं, सौख्यं यशःशान्तिकपौष्टिकाभ्याम्।
नमाम्यहं तं कलिकुण्डयन्त्रं, विनिर्गतं यं जिनराजवक्त्रात् ॥१०

भुवनमिदमनिद्यं (मिदं मुनीद्रं) देवराजाभिवन्द्यं,
पठति च वरभक्त्या सर्वदा योऽपि शान्त्यै ।

सकलसुखमनल्पं कल्पयावत्प्रपद्ये,
मन्त्रविनिहितविषं (विनिहितविघनौघं) यन्त्रराजप्रसादात् ॥११

## ११०. ॥ श्रीअन्तरिक्षपार्श्वनाथस्तवः ॥

(उपजाति)

श्रीश्रीपुरे निर्मितसन्निवासं दोषद्विषद्दत्तमहाप्रवासम् ।
श्रीअन्तरिक्षाधिपपार्श्वनाथं स्तवीम्यहं ज्ञानरमासनाथम् ॥ १

देव ! त्वदीयपदपद्मयुग्मं कल्पद्रुमादप्यतिशायि नूनम् ।
नो चेत्तदातः सकलाङ्गिनोऽमी
मनोतिगं वस्तु कथं लभन्ते ? ॥ २

तावन् महाविघ्नतमःसमूहः सङ्केऽनघेऽस्मिन्प्रसरिसरीति ।
यावत्त्वदीयप्रकटप्रभाव-भानुः प्रकाशं न चरीकरीति ॥ ३

योगीन्द्र ऊर्ध्वं पवनप्रयोगात् स्थितोऽथवाऽयं मघवा नभस्थः ।
मूर्त्तिर्जगन्नाथ ! तवान्तरिक्षे निरीक्ष्य दक्षा इति तर्कयन्ति ॥ ४

जगत्त्रयीपावकतावकीन-स्नात्रोदकेनापि दृशोः पुरस्ते ।
देदीप्यमानः प्रसभं प्रदीपश्चित्रं न केषां विदधाति सद्यः ? ॥५

सुरासुरेन्द्रास्तव पादपद्म-
सेवातिहेवाकिन एव देव !
तथापि यद्दुश्च्यनाश्रितस्त्वं
कदापि नो भासि तदेव चित्रम् ॥ ६

वामेय ! मेयत्रिजगत्प्रमेय !
दोषैरजेय ! त्रिदशैश्च गेय ! ।

स्नात्राम्भसा ते भुवि दुष्टकुष्ठ-
कुव्याधिबाधाः क्षणतः क्षयन्ति ॥ ७

यस्या विधानाज्जिन ! किञ्चिदूना
अबोभवत् द्वादश वर्षलक्षाः ।
सम्पूज्यमानाऽखिलदेवदेवैः
सा तावकीना प्रतिमाऽत्र जीयात् ॥ ८

एवं स्तवं तव विधाय विशुद्धभावात्
श्रीअन्तरिक्षजिनपुङ्गवपार्श्वनाथ ! ।
अभ्यर्थये प्रथितमानसवासनात-
स्त्वत्पादपद्मसमुपासनमेव देव ! ॥ (वसन्ततिलका) ९

## १११. ॥ श्रीशिरपुर-पार्श्वनाथस्तवः ॥

(शार्दुलविक्रीडितम्)

श्रीवामेयविभुं जगज्जनमनःसङ्कल्पकल्पद्रुमं
निस्सीमप्रथितप्रभावविभवप्राप्तप्रतिष्ठोदयम् ।
आनम्राऽमरराजराजिमुकुटोद्घृष्टक्रमाम्भोरुहं
भास्वद्भक्तिरहं स्तुवे जिनवरं श्रीश्रीपुराधीश्वरम् ॥ १

यः क्षीरोदमहोदधौ निरवधौ कल्लोलमालाकुलं
साकल्येन जलं मिमासति पलैर्लोकं तथा स्वाङ्गुलैः ।
गङ्गोत्तुङ्गतरङ्गभङ्गगणनां यद्वा विनिर्मित्सते
मानातीतगुणान् स एव भवतस्तुष्टूषति व्यक्तितः ॥ २

श्रीमन्मालिसुमालिखेचरवरौ प्राञ्चद्विमानस्थितौ
यातौ क्वापि पवित्रसैकतकणैर्निर्माप्य मूर्तिं तव ।

अर्चित्वाथ सरोवरे व्यमुचतामाशातनाया भयात्
तत्राऽप्यक्षतविग्रहाऽजनि पुनर्दिव्यानुभावेन सा ॥ ३

भूमीमण्डलमण्डनेऽथ च महाराष्ट्राह्वये मण्डले
कैलासाचलतुङ्गशृङ्गगरिमप्रस्पर्द्धिसौधव्रजे ।
श्रीमानेलपुरेऽजनिष्ट विगलत् कुष्ठाभिभूताङ्गकः
श्रीश्रीपालनृपः समग्रजगतीजाग्रत्प्रतापोन्नतः ॥ ४

शून्यारण्यमथाऽन्यदा नु मृगयाऽऽसङ्गी जगन्वानयं
भ्रान्ति-श्रान्तितया च तत्र सरसि स्नानादिकं निर्ममे ।
तस्मात्तस्य सुवर्णवर्णमभवद्देहं विहीनामयं
तत्रस्थां स विवेद दैव्यवचनान्मूर्तिं ततस्ते पुनः ॥ ५

स्वप्नोपागतदेवतोक्तविधिना साप्ताहिकौ तर्णकौ
संयुज्य स्वरथेऽथ सारथितया भूत्वा स्वयं भूपतिः ।
संस्थाप्य प्रतिमामिमां तव निजस्थानं प्रति प्रस्थितः
पश्चाद्यावदवेक्षते नभसि सा तस्थौ स्थिरा तावता ॥ ६

तत्र श्रीपुरनामनव्यनगरं न्यस्य प्रशस्यं ततः
प्रत्यक्षं किल धर्मलक्ष्मिललनालीलाविलासालयम् ।
प्रासादं तव देव ! विस्मयकरं निर्माप्य चाभ्रंलिहं
श्रीश्रीपालनृपश्चिराय भगवंस्तां मूर्तिमापूपुजत् ॥ ७

रे रे तापन ! तीक्ष्णतां त्यज भज त्वं दूरदेशान्तरं
त्रैलोक्येऽभिनवो रविर्यदुदयांचक्राण एष प्रभुः ।
उद्दण्डध्वजदण्डदम्भत इति प्रस्फूर्जयंस्तर्जनीं
सूर्यं तर्जयतीव देव ! भवतः प्रासाद उच्चैस्तराम् ॥ ८

हृद्गम्भीरिमगर्जि(र्ज)निर्जिततमैरम्भोधिभिः सप्तभि-
र्दत्तानां विजयश्रियां प्रणयतः पानौ(णौ) कृतानां त्वया ।
सप्तानामपि वासवेश्म किमिदं सप्तक्षणं प्रेङ्खति
स्वामिंस्तत्पुरतः स्वकीयकमलाकैलाशवैहासिकम् ॥ ९

विश्वोद्दीपक दीप्यते तव पुरः स्नात्राम्बुना रात्रिकं
स्नानाम्बुस्नपनाज्जनाः पुनरित श्रीपार्श्व ! विश्वप्रभो ! ।
दुष्टाष्टादशभेदकुष्ठविकटश्वासातिकासज्वराऽ-
पस्मारादिसमग्ररोगरहिताः सर्वे भवेयुः क्षणात् ॥ १०

प्रातस्त्वत्प्रतिमां फणीश्वरफणश्रेणीमणीमण्डल-
प्रोद्यद्दीप्तिभरेण रञ्जितरुचं प्रेक्ष्यान्तरिक्षे प्रभो ! ।
प्रत्यक्षे मयि नाम कोऽयमपरश्चण्डांशुरित्युल्लसत्-
क्रोधाद् ध्मात इवाभ्युदेति सविता ताम्रद्युतिः प्रत्यहम् ॥ ११

स्वामिन् सप्तनयश्रियां निजमुखा प्रेक्षाकृतेऽत्यद्भुता
आदर्शा इव भूरि भास्वरविभा प्रोद्भासिताशामुखाः ।
एते ते शिरसि स्फुरत्फणिपतिस्फारस्फटाकोटिगा
बाभ्रास्यन्ति सुदीप्तसप्तमणयस्त्रैलोक्यचूडामणे ! ॥ १२

लक्षा द्वादश वत्सरा जिनवर ! न्यूना कियद्वत्सरै-
र्यस्याः सज्जननादजज्ञनिषित प्रेङ्खत्प्रभूतत्विषः ।
सैषा त्वत्प्रतिमा पचेलिमतमप्राचीनपुण्योदयात्
सान्द्रानन्दमयी मयाद्य ददृशे दृष्ट्योः सुधास्यन्दिनी ॥ १३

आनन्दादिव जातपत्रपुलकस्त्वद्भक्तिरागादिवाऽऽ-
ताम्रः कम्रकृतोर्ध्वकन्धर इव श्रोतुं लसद्देशनाम् ।

लोकम्पृणभवद्गुणानिव भुवन् भृङ्गारवैस्ते पुरः
शाखाकम्प्रकरैर्नरीनृतदिवाबाभाति चैत्यद्रुमः ॥ १४

राजत्वं त्वयि वस्तु सत्त्रिजगतां संस्तूयमानं बुधैः
स्वस्मिन् काल्पनिकं त्ववेक्ष्य शशभृत् तत्प्रार्थनार्थी ध्रुवम् ।
ताराररत्नसमुच्चयं जिनपते ! ते प्राहिणोत्प्राभृतं
गीर्वाणसृतसारसौरभलसत्पुष्पावलिव्याजतः ॥ १५

चेतः सांशयिकार्थसार्थमथनव्याख्यावचोगर्जितै-
र्जीमूतान् भगवन्यजे जिन ! भवांस्तस्मादमी व्योमगाः ।
सर्वत्र प्रतिवर्षवर्षणकृतस्तल्लिप्सयेव प्रभो !
लोकानामुपकारपुण्यनिवहं निर्मामिति प्रत्यलम् ॥ १६

चञ्चच्चन्द्रकरानुकारिरुचिरस्फारस्फुरच्चामर-
श्रेणीभिः सुरवीजिताभिरभितो वेल्लद्बलाकालिभिः ।
वर्षत् वागमृतं जगत्त्रयपते ! भव्याङ्गिचित्तावनौ
मध्ये व्योमसमुन्नतेऽम्बुद इव त्वं देव ! विभ्राजसे ॥ १७

देवं श्रीधरणेन्द्र एनमनिशं छत्रीकृतोद्यत्फणः
सेवेत्यद्भुतभोगलालसतया नाहं तु शक्तस्तथा ।
इत्येवोरसिकृत्य सत्यसुदृढा भक्तिः सहस्त्रेक्षणः
प्राहैषीत् किमिदं त्वदासनकृते रात्नं स्वर्सिहासनम् ॥ १८

प्राञ्चन्निष्प्रतिमप्रतापतपनप्रोल्लासितेजः श्रिया
विश्वेषु प्रतिभासितेषु भवता भ्रष्टाधिकारं प्रभो ! ।
सेवाकृत्सकलार्कमण्डलमिवैतन्मार्गणायागतं
त्वत्पृष्ठे प्रतिभासतेऽद्भुतविभाप्रोद्भासिभामण्डलम् ॥ १९

उद्वाहे वरवैदिकध्वनिरिव श्रीसर्ववेदिश्रिया-
स्तूर्योद्घोष इवैष निर्वृतिपुरीयात्राप्रयाणोत्सवैः ।
साम्राज्यं भुवनत्रयेऽपि भवतः साक्षादिव ख्यापयन्
विश्वद्र्यङ् दिवि देवदुन्दुभिरयं दन्ध्वन्यते ते पुरः ॥ २०

विष्णुब्रह्ममहेश्वरान्निरुपमैश्वर्यश्रिया स्वीयया
देवांस्त्रीन् भगवन् ! जिगेऽथ जगति प्राज्ञत्प्रतापानपि ।
तत्किं मौक्तिकवर्णपङ्क्तिकलितास्तिस्त्रः सुरैःपट्टिका
न्यस्ताः शस्तजयप्रशस्तिरचनाश्छत्रत्रयच्छद्मना ॥ २१

भूतप्रेतविपक्षराक्षसमुखा रक्षाकरन्ति क्षणान्
मा लान्ति प्रबलस्फुटालफणिनः श्रीसम्पदन्त्यापदः ।
दुष्टा इष्टकरन्ति केसरगणा अग्रेसरेयुः सताम्
सत्यन्तर्मनसं प्रसिद्धमहिमे त्वन्नाममन्त्राक्षरे ॥ २२

अन्तःसंसृति दुर्घटाटविमहामर्माविधा कर्मणा
भ्रामं भ्राममनेकधा निरवधि श्रीपार्श्वनाथप्रभो ! ।
श्रान्तः सम्प्रति तात ! तावकमहं श्रीशासनं पावनम्
पीयूषद्रवसेकिमं तरुमिमं स्वामिन् ! समासादयम् ॥ २३

किं पीयूषमयूखमण्डलगलत्पीयूषरेखामयी
किं वा श्रीसुषमामयी किमथवाकैवल्यलक्ष्मीमयी ।
किंवानन्दमहोत्सवोदयमयीत्येवं विभो ! तावकीम्
मूर्त्तिं स्फूर्त्तिमतीमवेक्ष्य भविनः संशेरतेऽनारतम् ॥ २४

इत्थं श्रीगुरुसोमसुन्दरगुणैः पार्श्वप्रभो ! श्रीपुर-
स्वामिन् ! मन्दधिया मया विरचितां वर्णस्फुरन्मौक्तिकाम् ।

धत्ते ते स्तुतिसारहारलतिकां यः कण्ठपीठे निजे
तं वृण्वन्ति वशंवदाः प्रतिदिनं विश्वाऽद्भुताः सम्पदः ॥ २५

अज्ञातकर्तृकम्

## ११२. ॥ श्रीस्तम्भनाधिपपार्श्वनाथस्तोत्रम् ॥

(वसन्ततिलका)

गीवार्णचक्र-नरनायकवृन्दवन्द्यं
भव्यावलीकमलबोधनसूरराजम् ।
कल्याणकल्पतरुसेचनवारिवाहं
श्रीस्तम्भनाधिपमहं प्रणमामि पार्श्वम् ॥ १

देवाधिदेव ! तव पादपयोजयुग्मं
सम्प्राप्य साधुजनलोचनषट्पदाली ।
प्राप्य प्रमोदमकरन्दरसं सुहृद्यं
संवेदयत्यतितरां सुखपङ्कमग्ना ॥ २

आनन्दपूरकलिताऽमल एष घस्रो
यस्मिँस्त्वदीयवदनाम्बुजदर्शनं मे ।
पक्षोऽतिदक्षजनवर्ण्य इहातिजज्ञे
स्वान्तं त्वदीयगुणसङ्गरतं च यत्र ॥ ३

मासोऽयमत्र सुखराशिनिवासभूतो
वर्षं सहर्षमिति नाथ ! विचारयामि ।
एतद्युगं सुगममत्र विवेकपूर्णं
त्वद्पादपङ्कजमहं च यदा महेयम् ॥ ४

देवाद्रिरेष जिनराज ! न कोमलाङ्गो
रत्नाकरोऽपि लवणत्वरसो न रम्यः ।
पक्षद्वयेऽपि दिनमेकमयं विहाय
चन्द्रः कलापरिकराऽपरिपूर्णभावः ॥ ५

युक्तो महाविषधरैः किल चन्दनद्रुः
प्रत्यग्रतापजनकस्तरणिः प्रतीतः ।
कल्पद्रुमोऽपि तरुजातिरयं विचेताः
केनोपमा तव ततो मयका विधेया ॥ (युग्मम्) ६

त्वं नाथ ! देवतरुतोऽभ्यधिकं वदान्य
आमुष्मिकैहिकसुखौघविधानदक्षः ।
ये त्वां विहाय परदेवकृतांह्रिसेवा-
स्तेभ्यो परो भुवि नरो न जडोऽस्ति कश्चित् ॥ ७

जानन्ति केऽपि किल लक्षणतर्कविद्यां
ज्योतिष्क-वैद्यक-कलासु विवेकिनोऽन्ये ।
मन्त्रादिभावनिपुणाः कतिचिज्जगत्सु
सन्तीह नो तव निरूपणभावदक्षाः ॥ ८

आस्तां तवाऽनघ ! गुणौघरसः परेषु
मुद्राऽपि नैव तव नाथ ! हि तैरवाप्ता ।
काम-क्रुधादिविगुणैरनिशं भृतास्ते
शान्तादिभावकलितो भगवंस्त्वमेव ॥ ९

रामारसाऽऽविलतया कलितो हि रागो
द्वेषस्तु शत्रुघनघातनहेतिलक्षः ।

मोहः परेष्वबुधताऽऽचरणेन गम्यो
नाऽमी मया त्वयि विभो ! ऽपगुणास्तु दृष्टाः ॥ १०

त्वद्वीक्षणाज्जिनवरेन्द्र ! शरीरभाजां
मोदातिशेषकलितं हृदयं क्षणात् स्यात् ।
धाराधराऽमलजलाद् भवति प्ररोहः
पृथ्व्यां यथा सफलभूरुहजातियोग्यः ॥ ११

कण्ठीरवा-ऽनल-करीन्द्र-गदा-ऽहि-नीर-
चौरा-ऽरि-सङ्गर-महोदर-बन्धनाद्याः ।
भीता व्रजन्ति च भया(याद् ?) रवितस्तमांसि(स्तमिश्र?)-
वन्नाथ ! नामजपतस्तव नास्ति शङ्का ॥ १२

येषां जिनेन्द्र ! तव नाम हृदि प्रशस्तं
नित्यं स्थितं भवति देव ! सुखानि तेषाम् ।
स्युः शाश्वतानि सुरराज-नरेन्द्रसम्पद्-
युक्तानि मङ्गलरमावरदानि मन्ये ॥ १३

नागाधिपोऽनलदवानलविह्वलास्यः
पीयूषपूरतुलितं वचनं त्वदीयम् ।
श्रुत्वा विभो !ऽजनि स नागपदाधिकारी
सर्वोऽपि(प्ययं?)जिनवरेन्द्र ! तव प्रभावः ॥ १४

इत्थं सदा भुवनसङ्ख्यमितैः सुवृत्तैः
प्रातः स्तुतिं विदधते मनुजाः सदा ये ।
सद्ब्रह्म-निर्जर-नरेशसुखानि नित्यं
ते प्राप्नुवन्ति कमलाकलितानि देव ॥ १५

अज्ञातकर्तृकम्

## ११३. ॥ श्रीस्तम्भनकपार्श्वजिनस्तोत्रम् ॥

१ (भुजङ्गप्रयात)

जनानन्दमाकन्दसच्चैत्रमासं,
श्रित-श्रीमहानन्दलक्ष्मीविलासम् ।
तमस्तोमसम्भारहिंसादिनेशं
मुदा स्तौमि पार्श्वं जिनं स्तम्भनेशम् ॥ १

पुराऽऽराधि राजराजेन्द्रदेवै(राजेन्द्रदेवेन्द्रराजै)-
र्गृहीत्वा निजस्थानके क्लृप्तसेवैः ।
हृदि स्वे विधायाऽविभक्तेः प्रवेशं,
मुदा स्तौमि पार्श्वं जिनं स्तम्भनेशम् ॥ २

सदा प्रातिहार्यैः शुभैः शोभमानं,
जितोदारदुर्वारभावारिमानम् ।
फणाश्रेणिसंशोभिमौलिप्रदेशं,
मुदा स्तौमि पार्श्वं जिनं स्तम्भनेशम् ॥ ३

निशाकान्तवच्चारुचारित्रपात्रं,
लसद्वर्यवैडूर्यरोचिष्णुगात्रम् ।
शुभध्यानविध्वस्तकर्मप्रदेशं,
मुदा स्तौमि पार्श्वं जिनं स्तम्भनेशनम् ॥ ४

नवाऽऽषाढपर्जन्यगम्भीररावं,
भवाम्भोधिमज्जज्जनोत्तारनावम् ।
स्वसद्देशनाबोधिताशेषदेशं,
मुदा स्तौमि पार्श्वं जिनं स्तम्भनेशम् ॥ ५

सदा पन्नागाधीशसंसेव्यपादं,
निजज्ञाननिर्धूतदुर्वारिवादम् ।
व्रताऽऽदानकालेप्सितश्रीनिवेशं,
मुदा स्तौमि पार्श्वं जिनं स्तम्भनेशम् ॥ ६

परिच्छिन्नसंसारवासैकपाशं,
यशःपूरकर्पूरसम्पूरिताऽऽशम् ।
मुखश्रीपराभूतसम्पूर्णभेशं,
मुदा स्तौमि पार्श्वं जिनं स्तम्भनेशम् ॥ ७

प्रभूतप्रभावं प्रचण्डप्रतापं,
रमामन्दिरं त्यक्ततृष्णादितापम् ।
कदाचित् कथञ्चिन्न लब्धाऽघलेशं,
मुदा स्तौमि पार्श्वं जिनं स्तम्भनेशम् ॥ ८

ज्वर-श्वास-कासादिनिर्नाशहेतुं,
वधच्छेद-बन्धादिदुःखाब्धिसेतुम् ।
स्मरावेगविध्वंसने व्योमकेशं,
मुदा स्तौमि पार्श्वं जिनं स्तम्भनेशम् ॥ ९

एवं प्रभुं स्तम्भनकावतंसं,
वामातनूजं कृतविश्वशंसम् ।
स्तवीति यः स्वस्य भवेऽत्र भक्तिः,
क्रमाच्च जायेत (भवाद्धि)मुक्तिः ॥ १०

श्रृङ्खलालङ्कारमयम्

## ११४. ॥ श्रीस्तम्भनपार्श्वजिनस्तवनम् ॥

(वंशस्थ)

स्तवीमि तं पार्श्वजिनं सदैव तं वतंसकं स्तम्भनपत्तनावनेः ।
वनेचरा मत्तमतङ्गजादयो दयोदधिं नाभिभवन्ति यं श्रितान् ॥१

श्रितामराधीशमधीशमागता गता महासङ्गरगोचरं नराः ।
न राजिभिर्जेयवपुःपराक्रमाः क्रमानमन्मल्लमतल्लिकोत्कराः ॥२

करा न किं राजभरस्य दुःखदाः
खदारण ! त्वां श्रयतां शमाश्रयम् ।
श्रयन्ति सिंहेन किमङ्कितं वनं वनान्त उच्चैर्मृगधूर्तसञ्चयाः ॥३

चयाय लक्ष्मीर्यतते प्रमेदुरा दुरायतिर्नश्यति तस्य सुप्रिया ।
प्रिया च पुत्राः सुजनाः स्युराश्रवाः
श्रवाय यः पार्श्वगिरः प्रमोदवान् ॥ ४

दवानलः शाम्यति वारिधिर्धरा धराधरो मन्दिरमिन्दिराकुलम् ।
कुलं पिशाचादि कुलन्तमर्हतोऽ-
र्हतो नमस्यां जगतोऽपि यः स्मरेत् ॥ ५

स्मरेषुलक्षं न तवेश ! मानसं न सङ्गतं मानमहीभृताऽनिभम् ।
निभं त्यजंल्लोभपयोधिरोधनं धनञ्जयं क्रोधरिपुं जयन्नुमः ॥ ६

नु मह्यमेनं जगतामधीश्वरं स्वरं ब्रुवन्तं ससितं सुधारसम् ।
रसं त्रिलोकाद्भुतमङ्गमिश्रितं
श्रितं न कैः कैः प्रवदन्ति कोविदाः ॥ ७

विदालोकैर्लोकप्रकटनपटुः स्तम्भनपतिः
पतित्वादावङ्घ्रयोर्विनुत इति भावेन भगवान् ।
गवा भव्यश्रोत्राण्यवटकुहराणीक्षुशिरया
रयात् प्रीणन् मह्यं तरुणकरुणं रातु चरणम् ॥(शिखरिणी) ८

चारूपमण्डन-

## ११५. ॥ श्रीपार्श्वजिनस्तवनम् ॥

श्रीचारूपपुरप्रधानवसुधालङ्कारचूडामणि-
प्रायं स्फारफणामणिद्युतिभरैराभासिताशामुखम् ।
कल्पक्षोणिरुहातिशैशववयःपत्रालिवित्रासकृत् -
कायच्छायमहं स्तवीमि मुदितः श्रीपार्श्वविश्वेश्वरम् ॥ १
(शार्दूलविक्रीडित)

(उपजाति)

अतुल्यकल्याणलसल्लतानामारोढुमूर्ध्वं तव मूर्धसंस्थाः ।
जगत्प्रभो ! स्फारफणाः श्रयन्ते
श्रियं सदा माण्डपिकीमखण्डाम् ॥ २

अङ्के शिरोऽग्रे च भुजङ्गधारी दृष्टोऽपि दुर्दोषविषापहारी ।
एकातपत्रो भुवने नरेन्द्रस्त्वमेव नम्रामरमानवेन्द्रः ॥ ३

धर्मोपदेशे फणनिःसपत्नरत्नोस्रमिश्रीकृतकृष्णकान्तिः ।
गर्जंस्तडित्वानिव देव ! दत्से मुदं न केषाममृतार्थिनां त्वम् ॥४

फणामणीनां तव देव ! दीप्रतरा द्युतो व्योमनि विस्फुरन्त्यः ।
राजन्ति रेखा इव काञ्चनस्य कषोपले जात्यतरस्य दत्ताः ॥ ५

तव प्रभो ! स्फारफणा भुजङ्गाः स्फुरन्मणिश्रेणिरुचारुणाङ्गाः ।
तथा दशन्त्यान्तरवैरिवारं यथा प्रतीकारकथा पुनर्न ॥ ६

सत्कज्जलश्यामलतां वहन्ती फणामणी यो मणिभिर्विभान्ती ।
दीपालिकारात्रिरिव प्रदीप्रदीपाऽस्तु मूर्त्तिस्तव हर्षहेतुः ॥ ७

फणाग्रजाग्रन्मणिराजिराजमानेन्द्रनीलामलनीलकायः ।
सत्पुष्पभृत् पत्रलहेमपुष्पमहीरुहौपम्यमशिश्रियस्त्वम् ॥ ८

विभिद्य माद्यद्दुरपोहमोहमहान्धकारं प्रकटानि कुर्युः ।
सप्तापि तत्त्वानि विभो ! फणाग्रजाग्रत्तमास्ते मणिदीप्रदीपाः ॥९

सदर्पसर्पा अपि सर्पशत्रुकदर्थनाभीतिमिवावहन्तः ।
त्वामाश्रयन्तीश ! फणामिषेण त्रैलोक्यरक्षाविहितैकदीक्षाम् ॥१०

फणोरगाणां प्रणताङ्घ्रिपाप-भेकास्त्वमाहारपदे प्रयच्छन् ।
स्वां देव ! सर्वाभयदानदीक्षां
यन्नात्यचारीस्तदिहाति चित्रम् ॥ ११

अद्यापि मूर्ध्ना धरणोगेन्द्रसेव्योऽस्ति पिद्धाम्बुमहोपसर्गम् ।
वहन् यमानां विपदेशतत्त्वं नेतः ! कृतज्ञेषु धुरि स्थितोऽसि॥१२

स्फुरत्फणानां तव निःसपत्नप्रभा व्योमनि विस्तरन्त्यः ।
लोकत्रयी लोचनदत्तचित्रं विनापि भित्तिं रचयन्ति चित्रम् ॥१३

प्रभो ! गभीरप्रकृतेर्विनीलदलोत्पलश्यामलभूरिभासः ।
फणास्तवाब्धेरिव भान्ति रत्नमिश्रोत्पतत्तुङ्गतरङ्गतुल्याः ॥ १४

स्फुरन्मणिस्फारफणान् दधाना अपि प्रदर्पास्तव देव ! सर्पाः ।
हर्षं प्रवर्षन्ति जनस्य दृष्टाः स्पृष्टाश्च सङ्गो हि सतां शमाय ॥१५

श्रिताः फणास्त्वां मणिराजिभाजो रेजुः कृतार्थीकृतभव्यसार्थ !।
अतुल्यवल्ल्यः कुसुमाभिरामाः कल्पद्रुमं नन्वधिरूढवत्यः ॥१६

अतुल्यकल्याणमहानिधानं लभ्यं लसद्भाग्यभरोदयेन ।
प्रभो ! भजन्ते भुजगा भवन्तं युक्तं मणीमण्डितमौलिमध्याः॥१७

स्फारस्फूर्जत्फणानामनणुमणिगणोद्योतविद्योतिताशा-
चक्रं चारूपनामप्रवरपुरमहीमण्डनं पार्श्वनाथम् ।
यः स्तौत्येवं तमालद्रुमदलपटलस्पद्र्धमानामलाङ्ग-
ज्योतिर्जालं स शर्माण्यनुभवति भवाम्भोधिपारस्थितात्मा ॥१८

(स्रग्धरा)

## ११६. ॥ श्रीकुङ्कुमरोलापार्श्वजिनस्तवनम् ॥

(श्लोक)

कुङ्कुमरोलाभिधं पार्श्वं जालोरपुरसंस्थितम् ।
श्रेयःश्रेणिलतामेघं संस्तुवेऽहं जिनेश्वरम् ॥ १

ॐ ह्रीँ श्रीँ अर्हँसंयुक्त ! श्रीपार्श्व ! जगदीश्वर ! ।
त्वन्नामस्मरणाद् भक्तलोकानां स्युर्महद्र्धयः ॥ २

सुरासुरेन्द्रसन्दोहसंसेव्यपदपङ्कज ! ।
जगद्ध्येय ! गुणामेय ! जय त्वं करुणानिधे ! ॥ ३

पीनोऽहं पापपङ्केन हीनोऽहं गुणसम्पदा ।
दीनोऽहं तावकीनोऽहं मीनोऽहं त्वद्गुणाम्बुधौ ॥ ४

दासः प्रेष्यः प्रसादार्थी सेवाहेवाकिसेवकः ।
किङ्करस्तावकीनोऽस्मि तत्प्रसीद मयि प्रभो ! ॥ ५

अश्वसेनमहीपालकुलपाथोजभास्करः ।
वामाकुक्षिसरोहंसः पार्श्वोऽसौ भवतान्मुदे ॥ ६

इत्थं पार्श्वजिनेन्द्रः कुङ्कुमरोलाभिधानविख्यातः ।
स्वर्णगिरिशिखरमण्डनमानन्दं वः सदा देयात् ॥ (आर्या) ७

## ११७. ॥ श्रीगोडीपार्श्वनाथस्तोत्रम् ॥

(प्रमाणीका)

वरिष्ट इष्ट देवता सुगोडीपार्श्वसेविता ।
तपःप्रभावभासिता गुणोडुराजवर्धिता ॥ १

चरित्र–भार–गोपति–र्हताष्टकर्मविश्रुतिः ।
विवेक–बुद्धिवाक्पति–र्गुणेन्दुरद्य सद्यतिः ॥ २

यशोमरालमण्डली गताब्दमार्गमण्डली ।
दिगङ्गनाङ्गभूषिता भवद्गुणाब्धिपोषिता ॥ ३

त्वदीयधर्मदेशना कृताष्टकर्मपेषणा ।
सरत्सुधावधीरिणी सुतन्त्रतत्त्वभीरिणी ॥ ४

कुतर्कतर्कतर्क्किता भवन्तमेत्यदूषिता ।
परे प्रवीणवाक्छरा अपास्तमानमत्सराः ॥ ५

त्वदीयपादभक्तितः प्रचण्डपापपङ्क्तितः
जना भवन्ति दूरतः शुभा निमेषमात्रतः ॥ ६

त्वदीयदानशौण्डता कृतार्थिसर्व्वदेवता ।
किमस्ति कामधेनुका धनेशतुल्यसेवका: ॥ ७

गुणा विलोक्य सर्वतः कलावनेह्य शर्मतः ।
वसन्त्यनन्यविश्रमा भवच्छरीर अश्रमाः ॥ ८

गुणाष्टकं सुखाकरं सतां मनस्सु सञ्चरम् ।
अकारि रत्नधी धरै-र्गुणेन्दुभक्तिनिर्भरः ॥ ९

इत्यष्टकं गुणवतो गुणमालिकाभि-
स्सम्यक् प्रयोगरुचिरं रचितं चिराय ।
श्रीमन्मुनेर्विमलशीलभृतो गुणेन्दो-
र्भव्याश्रितं भवतु भव्यतराय भूमौ ॥ (वसन्ततिलका) १०

को वा लङ्घितुमिच्छतीह जलधिं लोलन् भुजाभ्यां तरन्
को वा मेरुगिरिस्वकीयतरसा प्रोत्तम्भितुं चेष्टते ।
को वा सागरमध्यरत्ननिचयान् सङ्ख्यातुमुज्झृम्भते
तद्वत्तेपि गुणाकरस्य निखिलान् वक्तुं गुणान् कः क्षमः ॥ ११
(शार्दूलविक्रीडित)

एवं तथाप्युत्सुकमानसेन मया प्रणीतं तव भक्तिभावात्
यच्चात्र दुष्टं सुधिया विशोध्यं निसर्गदुर्बोधहता हि बालाः ॥१२
(उपजाति)

## ११८. ॥ श्रीगोडीपार्श्वनाथस्तुतिः ॥

(शार्दूलविक्रीडित)

श्रीमत्पार्श्वजिनेश्वरस्य विलसद्ज्ञानामृताम्भोनिधेः
सद्भावेन परस्वरूपविरतेर्मुक्त्यास्पदे तस्थुषः।
सद्भूतप्रतिबिम्बतस्तु सुतरां गौडीपुरोद्भासिनः ।
सोल्लासं प्रणिपत्य सत्यमनसा तत्रैव नित्यं स्मरे ॥ १

यत्पादाम्बुजदर्शनोत्सुकधियो भव्या व्रजन्तोऽध्वनि
स्पृश्यन्ते न हि दुष्टजन्तुनिवहैर्वन्यैर्न वा तस्करैः ।

नैवोज्ज्वालदवानलैर्जलचराकीर्णैर्जलैर्जातु नो
स श्रीपार्श्वविभुर्व्यचिन्त्यमहिमादृश्यो न केषां भवेत् ॥ २

हित्वान्तःकरणाद् द्रुतं कुटिलतां मोहादिनोद्भावितां
धृत्वा निर्मलभावनाञ्च विधिना यद्भक्तिमातन्वता ।
लभ्यन्ते नरराजनिर्जरवरश्रेणीसुखानि क्रमान्-
मुक्तिश्रीरपि सैष शुद्धमनसा संसेव्यतां विश्वपाः ॥ ३

## ११९. ॥ श्रीकरहेडापार्श्वजिनस्तवनम् ॥

(उपजाति)

प्रोच्चैःप्रभावः प्रसरीसरीति प्रभोः प्रभाणामिव यस्य भर्तुः ।
कालिन्दिकाकज्जलकान्तकेशः सः श्रीकरः श्रीकरहेडकेशः ॥१

यस्येशितुर्मुञ्चति नैव पार्श्वं विपत्तिवीरुत्ततितीक्ष्णपार्श्वम् ।
पार्श्वः सदौदर्यजितालकेशः स श्रीकरः श्रीकरहेडकेशः ॥ २

यदीयमूर्त्तिः सुरसौरभेया चित्रं प्रसूतेहयदास्तिकादीन् ।
महोदयानन्ददयाब्धिकेशः स श्रीकरः श्रीकरहेडकेशः ॥ ३

मूर्त्तिं यदीयां दिविषल्लतावत् करोति नित्यं कृतिकामितार्थम् ।
गाम्भीर्यसन्तर्ज्जितसर्वकेशः स श्रीकरः श्रीकरहेडकेशः ॥ ४

इत्थं स्तुतः श्रीकरहेडनामा प्रभुः प्रभूतप्रभुताभिरामः ।
श्रीपार्श्वविश्वत्रयराट् प्रकामकामान् प्रकुर्यात् प्रगुणर्द्धिधाम ॥५

# १२०. ॥ श्रीचिन्तामणिपार्श्वनाथजिनस्तोत्रम् ॥

(शार्दुलविक्रीडितम्)

किं कर्पूरमयं सुधारसमयं किं चन्द्ररोचिर्मयं
किं लावण्यमयं महामणिमयं कारुण्यकेलिमयम् ।
विश्वानन्दमयं महोदयमयं शोभामयं चिन्मयं
शुक्लध्यानमयं वपुर्जिनपतेर्भूयाद् भवालम्बनम् ॥ १

पातालं कलयन् धरां धवलयन्नाकाशमापूरयन्
दिक्चक्रं क्रमयन् सुरासुरनरश्रेणीं च विस्मापयन् ।
ब्रह्माण्डं सुखयन् जलानि जलधेःफेनच्छलाल्लोलयन्
श्रीचिन्तामणिपार्श्वसंभवयशो हंसश्चिरं राजते ॥ २

पुण्यानां विपणिस्तमोदिनमणी कामेभकुम्भे सृणी
मोक्षे निस्सरणी सुरेन्द्रकरणीर्ज्योतिःप्रकाशारणिः ।
दाने देवमणी नतोत्तमजनश्रेणीकृपासारणी
नेत्रानन्दसुधाग्रणी भवभिदे श्रीपार्श्वचिन्तामणी ॥ ३

श्रीचिन्तामणिपार्श्वविश्वजनतासञ्जीवन ! त्वं मया
दृष्टस्तात ततः श्रियः समभवन्नाशक्रमाचक्रिणः ।
मुक्तिः क्रीडति हस्तयोर्बहुविधं सिद्धं मनोवाञ्छितं
दुर्दैवं दुरितं च दुर्दिनभयं कष्टं प्रणष्टं मम ॥ ४

यस्य प्रौढतमःप्रतापतपनः प्रोद्दामधामा जग-
ज्जङ्घालः कलिकालकेलिदहनो मोहान्धविध्वंसकः ।
नित्योद्योतपदं समस्तकमलाकेलिगृहं राजते
स श्रीपार्श्वजिनो जने हितकृते चिन्तामणी पातु माम् ॥ ५

विश्वव्यापितमो हिनस्ति तरणी बालोऽपि कल्पाङ्कुरो
दारिद्राणि गजावलीं हरिशिशुः काष्ठानि वह्नेः कणः ।
पीयूषस्य लवोऽपि रोगनिवहं यद्वत्तथा ते विभो
मूर्तिः स्फूर्त्तिमती सती त्रिजगति कष्टानि हर्त्तुं क्षमा ॥ ६

श्रीचिन्तामणिमन्त्रमोंकृतियुतं ह्रीँकारसाराश्रितं
श्रीमर्हं नमिऊण पासकलितं त्रैलोक्यवश्यावहम् ।
द्वेधाभूतविषापहं विसहरं श्रेयःप्रभावाश्रयं
सोल्लासं वसहाङ्कितं जिनफुलिङ्गनन्दनं देहिनाम् ॥ ७

ह्रीँश्रीँकारवरं नमोऽक्षरपदं ध्यायन्ति ये योगिनो
हृत्पद्मे विनिवेश्य पार्श्वमधिपं चिन्तामणिसञ्ज्ञकम् ।
भाले वामभुजे च नाभिकरयोर्भूयो भुजे दक्षिणे
पश्चादष्टदलेषु ते शिवपदं द्वित्रिभवैर्यात्यहो ॥ ८

नो रोगा नैव शोका न कलहकलिता नारिमारीप्रचाराः
नैवान्ध्यं नैवासमाधेर्न च दरदुरिते दुष्टदारिद्रता नो ।
नो शाकिन्यो ग्रहा नो हरिकरिगणव्यालवेतालजालाः
जायन्ते श्रीपार्श्वचिन्तामणिर्नतिवशतः प्राणिनां भक्तिभाजाम् ॥९

गीर्वाणद्रुमधेनुकुम्भमणयस्तस्याङ्गणे रङ्गिणो
देवा दानवमानवाः सविनयं तस्मै हितध्यायिनः ।
लक्ष्मीस्तस्य वशा वशेव गुणीनां ब्रह्माण्डसंस्थायिनी
श्रीचिन्तामणिपार्श्वनाथमनिशं संस्तौति यो ध्यायति ॥ १०

इति जिनपतिपार्श्वः पार्श्वपार्श्वाख्ययक्षः
प्रदलितदुरितौघः प्रीणितप्राणिसङ्घः ।

त्रिभुवनजनवाञ्छादानचिन्तामणिकः
शिवपदतरुबीजं बोधिबीजं ददातु ॥ (मालिनी) ११

## १२१. ॥ हर्षपुरस्थश्रीपार्श्वनाथस्तवनम् ॥

(इन्द्रवज्रा)

पार्श्वप्रभुं ज्ञानरमासनाथं नाथं जगत्याः प्रकटप्रभावम् ।
भावं श्रितो हर्षपुरावतंसं तं संस्तुवे सर्वगुणैरनूनम् ॥ १

नूनं नतास्त्वच्चरणारविन्दं विन्दन्त्यभीष्टानि तमोऽर्ककल्प ! ।
कल्पद्रुमे किं सुलभं स्वपुण्य-पण्यप्रलब्धे न भवेज्जिनेन्द्र ! ॥२

नेन्द्रप्रभा तस्य भवेत् प्रभूता भूतादिभूतिः शुभभावभव्यः ।
भव्यः स्मरेद्यः परिपूर्णकामं कामं भवन्नामगतोपमान ! ॥ ३

मानस्मरद्वेषमुखाविपक्ष-पक्षस्वरूपा सुरसेव्यपार्श्वः ।
पार्श्वप्रभो ! ध्यानकृपाणकेन के न त्वया हन्त ! हता नतेश ! ॥४

तेशश्च देव ! प्रभवन्ति कल्पाः कल्याणभाजश्च महानुभावाः ।
भावारिभिद्ये प्रणमन्ति विश्व-विश्वस्तुतं त्वां नतसन्निकाय ! ॥५

कायश्रिया नीलमणीयमान ! मानव्यतीतेहितपारिजात ! ।
जातप्रभावादिगुणैरहीना हीनाश्रितत्वं जय भव्य नव्य ॥ ६

नव्यस्फुरन्नीलमणीसरूपं रूपं नता ये तव देव ! विज्ञाः ।
विज्ञानलक्ष्मीः प्रतान् पवित्रा वित्रासितद्वेष ! समेत्यशेषा ॥ ७

शेषाधिपभ्राजितपार्श्वदेश देशव्रजख्यातवचःप्रपञ्चः ।
पञ्चप्रसर्पद्विषयैककन्द कन्दर्पदर्पापह नन्द नित्यम् ॥ ८

इत्थं हर्षपुराभिधानपुरभूभूषास्फुरद्भूषण !,
श्रीमत्पार्श्वजिनेश्वरत्रिजगतीशृङ्गारहारोपम् ! ।
काव्यैर्नव्यगृहीतमुक्तकवरैर्भक्त्या मया संस्तुत-
स्त्वं देयाः शिवसम्पदं सुखपदं कैवल्यलक्ष्म्यास्पदम् ॥ ९
(शा.वि.)

## १२२. ॥ श्रीनवपल्लवपार्श्वनाथस्तवनम् ॥

(वसन्ततिलका)

मज्जा उदीपुर वरोदय शैलचूला,
शृङ्गारणैकरविबिम्ब-समानभासं ।
श्रीअश्वसेनकुलसिन्धुनिशाधिनाथं,
नित्यं नुवीमि नवपल्लवपार्श्वनाथम् ॥ १

कर्पूरकुन्दकुमुदेन्दुमनोज्ञमूर्त्तिः,
क्षीरोदनीरहरहीरककान्तकीर्त्तिः ।
प्रौढप्रभावनवपल्लवभागगेयः,
पार्श्वः श्रियेस्तु नवपल्लवनामधेयः ॥ २

त्वन्नाममन्त्रजपनात् दुरितानि दूरे,
तिष्ठन्ति किं समुदिते हि तमांसि सूरे ।
संपत्तयस्तव विलोकनतो मिलन्ति,
चिन्तामणेरिव विभो ! विपदो गलन्ति ॥ ३

ये मानवास्तव शुभातिशयं निशम्य,
भव्या अभिग्रहधरा धरणेन्द्रं नम्य ।

द्विधा प्रमोदनिवहं हृदये दधानाः,
यात्रां व्रजन्ति जिननायक सावधानाः ॥ ४

तेषां भवन्ति भुवनेश ! तव प्रसादाद्,
विद्या विवेकविभवप्रतिभाविनोदाः ।
पुत्रप्रमोदपदवीपरितोषपोषाः,
सज्ञानदर्शनचरित्रगुणा अदोषाः ॥ ५

नेत्रे निभालयतमद्भुतकारिरूपं,
हस्तौ प्रपूजयत मादरतोस्यबिम्बम् ।
वर्म्म गजस्य गुणगानमगानमानं,
जिह्वे विधेहि सुरगायनगीयमानम् ॥ ६

ते एव देवनयने सफलेन तान्तं,
याम्यां तवैव तनुरूपमलोकिकान्तम् ।
शान्तं विकारमपहाय रुषादिरूपं,
स्तूयं श्रियः सपदि तर्जितमोहभूपम् ॥ ७

ते एव पाणिकमले विमले विभेति,
ये पादपद्म युगपूजनमादधाते ।
कर्पूर केसर सुचन्दन पुष्पधूपैः,
पञ्चामृताक्षतफलै र्बलिवाद्यधूपैः ॥ ८

जिह्वापि सैवकृतपुण्यतमेश ! धन्या,
या तावकीनमहिमास्तवने रसज्ञा ।
यद् रावणः स्वकृतनीतविनोदनादै,-
स्तीर्थङ्कराभिधसुकम्म बबन्ध पुण्यम् ॥ ९

चेतः परिभ्रमसि किं विषयादिलुब्धं,
दुष्टाष्टकर्मकलिकर्दमजालदिग्धम् ।
तद्व्यापतापहरणकरण सुखाना,
पार्श्वं भजस्व नवपल्लवकाभिधानम् ॥ १०

स्वप्नेपि येन ददृसे ममृशे पुपूजे,
तेनापि वाञ्छितमलाञ्छितमत्र भेजे ।
साक्षाद् भवान् दृढतमातिमुदा च नेमे,
स्वामिन् ! स किं शिवरमाङ्गनयान रेमे ॥ ११

भ्रान्त्वा भवेषु बहुशो बहुलेषु देव !,
मुक्त्वा भवं तमपरत्र समापनैव ।
तस्मान्मनोस्तु सततं जिन ! मामकीनं,
संतोषसौख्यबहुलं तव पादलीनम् ॥ १२

मिथ्यात्वमोहमतिगाढमनन्तदुःखैः,
संक्लिश्य चेतसि विबोधभवे क्षणेन ।
अद्यात्र जन्म सकलं सफलं च यज्ञे,
संसारघोरजलधौ पतनं हि मन्ये ॥ १३

त्वन्नन्दनन्दकलिकामतकल्पवृक्षः,
श्री पार्श्वनाथपदसेवितपार्श्वयक्षः ।
कृत्वा प्रसादविश्वदां सुविशुद्धबुद्धिं,
स्वामिन् ! विधेहि मम वाञ्छितसर्वसिद्धिम् ॥ १४

इत्थं लक्षणलक्षितस्तुतिफलैः संभेदितः शंकरः,
नील श्रीनवपल्लवाभिधजिनः श्रीपार्श्वतीर्थकरः ।

श्रीवामोदरसारमानंस सरोहंसोदयासागरः,
सङ्ज्ञान सुमुदिराभ्युदयदो भूयात् शिवश्रीवरः ॥(शा.वि.)१५

## १२३. ॥ श्रीनवपल्लवपार्श्वनाथस्तुतिः ॥

सकलवाञ्छितदायकमुत्तमं जिनपतिं नवपल्लवमेव तम् ।
अमरनागनरेन्द्रसुसेवितं गुणसमुद्रमहं प्रणमामि वै ॥
(द्रुतविलम्बित) १

(उपजाति)

राज्यश्रियासौ हि विराजमानः प्रौढप्रतापी गुणधारकश्च ।
नृपाश्वसेनो हि विशुद्धचित्त- स्तं स्वामिनं संततवन्दना मे ॥२

जगत्त्रये विश्रुतकीर्तिज्योत्सना वामा सदा प्रीतिकरा सवित्री ।
पुरन्ध्रिवर्या वरराजकन्या प्रभावती यल्ललना स पायात् ॥ ३

चन्द्राऽऽस्यमेनं नवहस्तदेहं घनावलीकज्जलभृङ्गवर्णम् ।
देवाधिदेवं जगदेकनाथं विश्वाधिपं तं भुजगेन्द्रनाथम् ॥ ४

द्रव्यं समस्तं सह राजपुत्र्या संत्यज्य भर्ता व्रतमाददे हि ।
भुवस्तलेऽसौ विजहार सम्यक् दिव्योपसर्गे गिरिराजधीरः ॥५

शूरस्तपो यो भगवांश्चकार सदा समो मित्रविपक्षवर्गे ।
अनुत्तरं ध्यानमवाप्य सोऽसौ
श्रियेऽस्तु कल्याणकरो जिनेन्द्रः ॥ ६

रिपोर्गणं येन जिनाधिपेन, त्यक्तं ततो केवलमाप्य शुभ्रम् ।
समुद्धरन् भव्यजनान् कृपालु- र्विश्वैकनाथः सुखदायकोऽस्तु॥७

कृत्वोपकारं तु परं जनानां लेभे मुदा मुक्तिवधूं परां ताम् ।
स वीतरागो भवशान्तिकारी श्रीपार्श्वनाथो भवतु श्रिये मे ॥ ८

तं स्तम्भतीर्थे शुभतीर्थसंस्थे जिनालये वृद्धतपाधिराजे ।
वन्दे प्रभुं श्रीनवपल्लवाख्यं श्रीसङ्घसन्तुष्टिकरं महेशम् ॥ ९

समस्यामयम्

## १२४. ॥ श्रीनवखण्डपार्श्वजिनस्तवनम् ॥

श्रीपार्श्वं नवखण्डाख्यं तं स्तुवे हर्षसंयुतः ।
दीपश्रेणीयुते यस्य 'गेहे दीपालिका दिवा' ॥ (श्लोक) १

यस्याग्रे दिव्यनारीणां नृत्ते वृत्ते मनोहरे ।
विरराज 'दिनारम्भे शतचन्द्रं महीतलम्' ॥ (श्लोक) २

जन्माभिषेके सुरशैलमौलौ देवेन्द्रक्लृप्ताद्भुतगोविषाणैः ।
सत्यापितं क्षीरजलं क्षरद्भि'र्गोशृङ्गतः क्षीरसमुद्भवो यत्' ॥३
(इन्द्रवज्रा)

चित्तान्तरस्थे त्वयि देवदेव ! दुःखं कथं नो भजते विरामम् ।
रात्रौ दिवा यः सततं विरोधो 'दीपे करस्थे तिमिरेण बाधा' ॥४
(इन्द्रवज्रा)

भवे दौःस्थ्यदारिद्र्यदुष्कर्मभीमे
कलौ भ्राम्यता भूमिमध्ये भ्रमेण ।
पदाब्जं त्वदीयं विभो ! यन्मयाप्तं
प्रफुल्ले करीरे सरोजं हि दृष्टम् ॥ (भुजङ्गप्रयात) ५

त्वयि प्रभो ! दृष्टिपथं समागते मनो यदीयं भजते महाऽरतिम् ।
तस्यैव जन्तोर्बहुपापयोगतः
'समुद्रमध्ये किल धूलिसम्भवः' ॥ (वंशस्थ) ६

त्वद्दर्शनं नाथ ! मयेदमाप्तं दुःप्रापमन्तर्भवसन्ततीह ।
सद्भाग्ययोगाज्जगदीश ! तस्मात्
'पङ्गुः प्रयातो गिरिमेरुशृङ्गम्' ॥ (इन्द्रवज्रा) ७

भवाब्धिमध्ये भ्रमतां स्वकर्मतो
जिनेन्द्र ! राज्यादिसुखं न दुष्करम् ।
सुदुर्लभं दर्शनमत्र ते यथा
'पलाशवृक्षे सहकारमञ्जरी' ॥ (उपेन्द्रवज्रा) ८

त्वयि विभो ! समदः कमठो घनं
सजलभारभृतं विपुलं यदा ।
रचितवान्न जगत् किल लक्ष्यते
'न रजनी न दिवा न दिवाकरः' ॥ (द्रुतविलम्बित) ९

घोराट्टहासकलिताः प्रचुराः पिशाचा
व्यालास्तथा प्रबलभूतगणाः सुरेन्द्राः ।
दैत्याधिपेन विकृता भयहेतवे यत्
'स्वर्णाद्रिराप व्यजनानिलतः प्रकम्पम्' ॥ (व.ति.) १०

त्वच्छासनं दुरितभारहरं वरेण्यं
मूढा नराः परमतत्त्वविचारशून्याः ।
ये शासनान्तरेण सदृशं गणयन्ति तेऽत्र
'मुक्ताफलानि बदरैः परिवर्तयन्ति' ॥ (व.ति.) ११

देवेशमज्जनजले सरसे सुरम्यं
कर्पूरसुन्दरतरे गुरुकेशराढ्ये ।
बिम्बं निरीक्ष्य किल मत्तदशाः सुरङ्गा-
'श्चन्द्रं महीतलगतं मधुपाः पिबन्ति' ॥ (व.ति.) १२

स्वामिन् ! प्रसीदादिश किङ्करे मयि
सौम्यां दृशं देहि कृपां विधेहि च ।
भावी कदा मे तव सङ्गमो यथा
'क्षाराकरे वा घनसारदर्शनम्' ॥ (वंशस्थ) १३

मोहान्धा ये मदनजडिमाक्रान्तचित्ता अभव्याः
काले चास्मिन्निखिलतिमिरर्मुक्तमास्यं त्वदीयम् ।
पादाब्जं वा भवति सुलभं पार्श्वमायुः किमेषां
'बन्ध्याजोऽन्धः कुहुनिशि रविं पश्यति व्योमपद्मम्' ॥ १४
(स्रग्धरा)

यः पावित्र्यभरं तनोति सुमहान् यो दानशृङ्गारयुक्
यश्चान्तं न लभेत मुक्तिदयितो मालिन्यवान् यश्च न ।
सर्वेषां प्रियकारको ननु विभो ! देवाधिदेव ! त्वतो
'गङ्गावद् गजराजवद् गगनवद् गाङ्गेयवद् गेयवत्' ॥ १५
(शार्दूलविक्रीडित)

इत्थं श्रीनवखण्डपार्श्वजिन ! यो भक्त्या मया संस्तुतो
भव्यानां दुरितापहारनिपुणो देवेन्द्रवन्द्यो विभुः ।
काले दुःखमये प्रभावभवनं गन्धारवेलातटे
संस्थः सिद्धिसमृद्धिबुद्धिजनको भूयात् समस्यास्तुतः ॥ १६
(शार्दूलविक्रीडित)

स्तम्भनपुरावतंस-

## १२५. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(वंशस्थ)

रमाकरो यो जगतो रमाकरो रुगावलीनां हरणे रुगावली ।
सदैवं तं पार्श्वजिनं सदैवतं समाहितं नौमि हतासमाहितम् ॥१

सुखावली नारिभवा सुखावली रजद्वयं ते पदनीरजद्वयम् ।
सुभावतो वृत्तिसमैः सुभावतो महामहिम्नां भवनं महामहि ॥२

सुवर्णतेजोनिभया सुवर्ण ते प्रभूतया कान्तनखप्रभूतया ।
पदारविन्दं रुचि सम्पदा रविं सदानवं द्वेष्टि सदा सदानवम् ॥३

कुलं भवग्रीष्मसमाकुलं भवन्-
मुखं विशान्तिं शरणोन्मुखं विशाम् ।
सुधाम योगीश ! यथा सुधामयोऽ-
भयानकः प्रीणयतीभनायकः ॥ ४

घ्नतो महातायक ! विघ्नतो महा-
ननारतं तावकमाननारतम् ।
रमासमासेवितनारमासदालिनीव नन्देन मृणालिनी वनम् ॥५

दरं हरन्तं समसुन्दरं हरं मनोभवे त्वं शिवकामनो भवे ।
भ्रमन्नवापं मनसो भ्रमं नवा शयाधुनानं शुभगाशयाऽधुना ॥६

विविधयमकयुक्तः

## १२६. ॥ श्रीपार्श्वजिनलघुस्तवः ॥

(उपजाति)

लक्ष्मीनिदानं गुरुकर्मदानं, सद्धर्मदानं जगते ददानम् ।
यक्षेशपार्श्वाङ्कितपादपार्श्वं, नुवामि पार्श्वं भवभेदपार्श्वम् ॥ १

स्मेराऽतसीसूनसमप्रभा वा-ऽसमप्रभावा भवदीयमूर्तिः ।
विभाति वामाप्रभव ! त्रिलोके-ऽभव त्रिलोकेनसमर्च्यपाद ॥२

तवेश ! पादाम्बुजमादरेण, हृद्या दधाना जनतादरेण ।
मुक्ता भवेदेकपदेऽपराया, निर्वेशवन् सौख्यपरम्परायाः ॥ ३

निःशेषभूवर्षितदानवारि, यन्मानसे त्वं ध्रियसे सदैव ।
स एव गव्युत्तमदानवारि-प्रोच्चारितोद्दामयशाः सदैवः ॥ ४

देवाधिदेवाधिहरस्त्वमेव, सुज्ञान सुज्ञानभिबुद्धरूपः ।
साराङ्गसाराङ्ग वितीर्णभूयः-
कल्याण कल्याणकृदङ्गभाजाम् ॥ ५

यैरर्च्यसे त्वं वरवैद्यराज !, मनोऽभिरामैः सुमनोभिरामैः ।
कर्माभिधैरुज्झितभूधनास्ते,
विसारिलोकेश ! विसारिलोके ॥ ६

इत्थं ते जिनपुङ्गवस्य भगवन् प्रोद्दामधामान्वितं,
पादाब्जं परभागभृत्त्रिभुवनस्तुत्यं स्तुवन्तोऽनिशम् ।
दक्षं कर्मविपक्षपक्षदलने भव्या भवन्तु क्षमाः,
कल्याणाश्रय मुक्तिमासुमखिलं तीर्त्वा भवाम्भोनिधिम् ॥ ७

(शा.वि.)

# १२७. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(ढाल जय शिवॐकारा । एहनी ॥)

जय जय जनतारक हे ! जगदाधारक हे २ !
जय जय कमठतपोमदभञ्जक ! भुजगोद्धारक हे !
जय जय जय जय जय जिनदेव ! ॥ आंकणी १

जय जय सकलसुरासुरसेवित ! जय जगदीश्वर हे ! २ ।
जय जय भवनिर्विण्णजनाश्रितचरणेन्दीवर हे ! जय० ॥ २

जय जय जन्मजरामरणोत्कटसङ्कटवारण हे ! २ ।
जय जय दुरितनिदाघविघातनघनसाधारण हे ! जय० ॥ ३

जय जय लोकालोकविलोकनकेवललोचन हे ! २ ।
जय जय भव्यसमूहसरोरुहबोधविरोचन हे ! जय० ॥ ४

जय जय चारुविहारपवित्रीकृतभुवनोदर हे ! २ ।
जय जय मधुररणत्सुरदुन्दुभिभणितयशोभर हे ! जय० ॥ ५

जय जय कनकरजतमणिवप्रत्रयमध्यासित हे ! २ ।
जय जय मरकतनिचितहरितकरनिकरोद्भासित हे ! जय० ॥६

जय जय वसुधामण्डलमण्डन ! वामानन्दन हे ! २ ।
जय जय दुर्मतवननिःकन्दन ! नयनानन्दन हे ! जय० ॥ ७

जय जय वीतराग ! रागाद्यपरिवारविदारण हे ! २ ।
जय जय बोधिरूपचन्द्रोदयनिरुपमकारण हे । जय० ॥ ८

# १२८. ॥ श्रीपार्श्वजिनस्तवनं क्रियागुप्तम् ॥

(अनुष्टुप्)

जगतीशस्ते वैराग्य-रङ्ग त्वां पार्श्वनाथ ! तम् ।
निजनाम्नैव योऽरक्षो भूतप्रेतार्दितं जनम् ॥ १

भवाब्धितारणेऽनावि गुणालिस्त्वयि नाथ ! यैः ।
तेषु सद्भाग्ययुक्तेषु स्थिराः संवासमिन्दिराः ॥ २

शिवदं येन निर्दम्भ-माराधीश ! वचस्तव ।
तस्मिन् मुक्तिश्रिया प्रेम निस्सीम समतायत ॥ ३

तस्य चित्ते दधिक्षीर-सिन्धुशुभ्रान् गुणांस्तव ।
सदाऽसुरसुराधीश वन्द्याऽवद्यानि यं नवाः ॥ ४

यत्तेन महतार्हन्तं भव्यास्तं भयभेदिनम् ।
सदाभ्यासेन यो भङ्ग-यौगाभोगात्परात्मताम् ॥ ५

प्रभो ! त्वां भाववैरिभ्यो बलसद्भुज मां जवात् ।
सदाऽनन्त व्यधुर्यस्य सपर्यां निर्जरास्तव ॥ ६

स निस्सीमदयालोऽभनगस्थिरसुखस्पृहाम् ।
संसारं स्फारमायोर्वीमहासीराशु यः प्रभो ! ॥ ७

स त्वं वत्सलमुख्यत्वं सद्गुणाऽगार ताऽपहृत् ।
जनता विनता येन विकटाद् भवसङ्कटात् ॥ ८

तस्य ते सुक्षमाऽधाम शिरस्याऽऽज्ञां किरीटवत् ।
सज्ज्ञानोपाय मर्त्येश ! वन्द्ययो भविकान् भवात् ॥ ९

स भवान् महिमागेह-मऽया जिन ! यमाश्रित ।
यः सुरैः पर्शुवच्छिन्दन् समस्ता व्याधिवीरुधः ॥ १०

सद्दयाभवनं दार-हीन स त्वं जिनेश्वर ! ।
सदाऽशारदशुभ्रांशु शुभास्य भविनो हि यः ॥ ११

सन्नतानां सदाऽसात निरीह स शिवं भवान् ।
यस्तत्त्वं समतावल्यां वारिवाहमहात्मनाम् ॥ १२

उच्चैरक्षामभीतिभ्यो रभसेन स मां विभो ! ।
यस्तमोमथनं विश्वेऽतथा नाथ ! यथा रविः ॥ १३

तेनाऽऽर्त्तिः कीर्तिपूर्णाश मीनध्वजलसत्पद ।
वामासूनो ! क्षणोऽछिन्न मान यस्तामसं भवान् ॥ १४

भवान् भूतलमुत्कृष्ट-शिवस्थानौपविष्ट सः ।
यस्मादत्र सदातङ्क-श्रेणिः सूर्यादिव क्षपा ॥ १५

स नूतनयशा धीमानधीश ! त्वं नमज्जनान् ।
गिरो दूरं गदातङ्क-मुक्त यस्याङ्गिनां शिवम् ॥ १६

अपापदम्भजेतारं विभो ! तं भक्तिभागहम् ।
भवान्तो भवतापीन ध्यानलीलेन येन हि ॥ १७

गम्भीरधीर सर्वार्त्तिहर्त्ता शं स नृणां भवान् ।
विश्वेश ! कज्जलोद्दामा-म्बुदाभो यस्तमोऽसितुम् ॥ १८

पादयुग्मं नताऽमर्त्य-दैत्य-मानवमीश ! ते ।
चञ्चद्‌गुणकलापोच्चै-र्मुदं च शिवदामहम् ॥ १९

स्वं जनुस्तं नतो नाम क्षमाधरपवेऽधिप ! ।
भवान् भक्तेन्द्रभूपाल-विष्टपावनयात्तमः ॥ २०

तं निर्मोहमऽलाभीष्टं त्वां नमद्भिर्जनैः सुखम् ।
बहुशोऽकम्पयः पीन-जीमूतारव यो भवम् ॥ २१

त्वामस्तजनतापाऽप-विषमेषोऽर्चयन् जनुः ।
यः सतामऽमितां नम्र-सुमनोऽऽदा नवश्रियम् ॥ २२

तं नतास्त्वां तमोऽर्काभ ! वामाऽङ्गज ! भयोज्झिताः ।
जगन्ति यशसा क्षीरापगेश्वरगभीर ! यः ॥ २३

तस्य तीर्थे विभो ! स्थामाभिरामभुज ते वयम् ।
प्राज्या भावारिभीर्येन भृशं भक्तिभृतां सताम् ॥ २४

स कर्मकक्षमक्षामसुख दोषभयोज्झित ! ।
जगद्धितो दयाढ्योऽत्र धर्मो येन त्वया जिन ! ॥ २५

भक्तिं तत्र जनः स्वामिन्नततापच्छिदि त्वयि ।
भव्यान् भवाम्बुराशेर्योऽतीतरोऽगास्थिराशयः ॥ २६

धन्यस्त्वां तमहं भक्त्या समानस्य सुदुर्लभम् ।
स्वामिन्नरावलिक्लेश-नाशी यः स्वगिरा मुदम् ॥ २७

नत्वा निजं घनप्रीत्या जिन ! त्वां तमहन्तमः ।
जनतां मोहमल्लाद्योऽपास्तराम सुरार्चित ! ॥ २८

वचस्तस्याऽस्तसंसारो बहुला या समाशु ते ।
लोके शंसन्नयावासं सर्वदा यं सुरासुराः ॥ २९

भवानत्रायताऽनेकशत्रुभ्यः सज्जनं प्रभो ! ।
शर्म यस्य गिरं पीत्वा नतेन्द्रालेहितां न कैः ? ॥ ३०

स जिनाऽवनतं मां यो मामात्रासी रतः शिख ।
सद्योऽवद्यं कलावद्य स्फुरन्मोह मनामयः ॥ ३१

स्तूयसे त्वमुरुकीर्तिकौमुदी चन्द्रशेखरविमुक्तियोषितः ।
येन पार्श्वजिन ! मञ्जुलक्रिया-गुसकैरिति स याति निर्वृतिम्॥३२

(रथोद्धता)

देवकुलपाटकमण्डन-

## १२९. ॥ श्रीचिन्तामणिपार्श्वजिनस्तोत्रम् ॥

(भुजङ्गप्रयात)

नमद्देवनागेन्द्रम(वृ)न्दारमालामरन्दच्छटाधौतपादारविन्दम् ।
परानन्दसन्दर्भलक्ष्मीसनाथं स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥१

तमोराशिवित्रासने वासरेशं हतक्लेशलेशं श्रियां सन्निवेशम् ।
क्रमालीनपद्मावतीप्राणनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ २

नवश्रीनिवासं नवाम्भोज(द)नीलं नतानां
स्वश्रीदानदाने सलीलम् ।
त्रिलोकस्य पूज्यं त्रिलोकस्य नाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ३

हतव्याधिवेतालभूतादिदोषं कृताशेषभव्यावलीपुण्यपोषम् ।
मुखश्रीपराभूतदोषाधिनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ४

नृपस्याश्वसेनस्य वंशेऽवतंसं जनानां मनोमानसे राजहंसम् ।
प्रभावप्रभावाहिनीसिन्धुनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ५

कलौ भाविनी कल्पवृक्षोपमानं जगत्पालने सततं सावधानम् ।
चिरं मेदपाटस्थितं विश्वनाथं
स्तुवे देवचिन्तामणिं पार्श्वनाथम् ॥ ६

इति नागेन्द्रनरामरवन्दितपदाम्भोजप्रवर(र्त्ति)तेजाः ।
देवकुलपाटकस्थः स जयति चिन्तामणिः पार्श्वः ॥(आर्या) ७

## १३०. ॥ श्रीपार्श्वनाथनाममालास्तोत्रम् ॥

(इन्द्रवज्रा)

शङ्खेश्वर-स्तम्भन-लोड(ठ)न-श्रीगोडी-भटेवा-करहेडसञ्ज्ञा ।
जीराउलिः श्रीनवपल्लवाक(ह्वः) श्रीपार्श्वनाथो मम सुप्रसन्नः ॥१

चारुप-पञ्चासर-रावण-श्रीचिन्तामणि-श्रीमगसी महेशाः ।
श्रीअन्तरीक्षो मनमोहनाकः श्रीपार्श्वनाथो मम सुप्रसन्नः ॥ २

पोसीननामा वरकाणकः श्री-भाभाभिधाने(नो) फलवृद्धिरर्हन्।
दादाभिधः श्रीनवखण्डनेता, श्रीपार्श्वनाथो मम सुप्रसन्नः ॥ ३

श्रीश्यामलः कुङ्कुमरोलसञ्ज्ञः,
कोकाभिधः श्रीकलिकुण्डदेवः ।
अमीझरो-दारजिनो अवन्ती, श्रीपार्श्वनाथो मम सुप्रसन्नः ॥४

(उपजाति)

प्रह्लादनामा प्रभुकुर्कुटेशः कल्हारकाह्वो महुरीपुरीशः ।
मण्डोरपूर्वो वरवेइ नामा, श्रीपार्श्वनाथो मम सुप्रसन्नः ॥ ५

सरङ्ग-नारङ्गपुरः सहस्र-फणो जग(द्)वल्लभनामधेयः ।
काप्रेडको अणिन्धतया प्रतीभः (?),
श्रीपार्श्वनाथो मम सुप्रसन्नः ॥ (उपजाति) ६

वाडीप्रतिष्ठः करडाभिधानः कंसारिनामा सुखसागराकः (ह्वः)।
करदुर्गरिष्टः श्री-गडुरीकः श्रितभिन्नमाल(लः)
श्रीपार्श्वनाथो मम सुप्रसन्नः ॥ (उपजाति) ७

इक्ष्वाकुवंशान्तरसप्तसप्ति-र्वामाश्वसेनप्रभवः प्रभु (?) ।
पद्मावतीनाग.........श्रीपार्श्वनाथो मम सुप्रसन्नः ॥ ८

ओमिश्र (?) पार्श्वपरमेश्वरनाममालां,
कण्ठे करिष्यति च यः स्थिरचित्तवृत्तिः ।
सद्यः सकः समाधिगच्छति शुद्धबुद्धिः,
कल्याणकोटि-धनचिन्तितसिद्धिसौघम् ॥(वसन्ततिलका) ९

## १३१. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(अनुष्टुप्)

श्रीमत्श्री(च्छ्री)पार्श्वनाथस्य, जेयमाला(लां) भणाम्यहम् ।
पठतां शृणवतां (शृण्वतां) नित्यं, क्षेमं भवति मङ्गलम् ॥ १

जय कर्मे(र्म) महाबलदलनवीरो,
जय कोपदावानलशमननीरो ।
जय मायाजगतीयभेदसीरो,
जय पार्श्वजिनेश्वर ! मेरुधीरं(रो) ॥ २

जय कुशले पायाहरे तुल्यदेहो, जय केवलि कमलां केलि गेहि।
जय रोगरसायर(ण) मत्तनागो, जय दुरितनिवारणवीतराग !॥३

जय सजलपायाधरे जलहन्तरु, जय बुद्धिजनमानसराजहंस ! ।
जय पूरितमानवचित्तचोष ?, जय दुरितनिवारणभूरिदोष ॥४

जय जनवरवछर (वंछिअ) दत्तदानं(न),
जय जन्तुकृपापरं(र!) गुणनिधानं(न!) ।
जय वाञ्छितपूरणकल्पवृक्ष !
जय शे(से)वक भविवनव(वि) हितरक्षं (क्ष!) ॥ ५

जय सिद्धिसुरासुरं विततरागं(ग !),
जय विपुलकमलदलं(ल) नयनमालं (ल !) ।
जय पापतमोहरगगनि(न)रत्ने(त्न) !,
जय वामादेवीये(य) कुक्ष(क्षि) रत्ने(त्न) ! ॥ ६

जय पर्हित सुरनरनाथवारं,
जय दुस्तरं(र) भवि(व)वनलब्धवी(ती)रं(र !) ।
जय महि मोदक निधनपूर्णचन्द्र !,
जय पर्हित मायामोहतंरुं(तन्द्र !) ॥ ७

जय विरचितकिन्नरचरणसेवं(व!),
जय विषयपङ्कघन पार्श्वदेव ! ।
जय दलितकमठशि(श)ठनिव(बि)उदर्प !,
जय केवलि बोधिते विषय सर्प ! ॥ ८

जय संहतगुरुतरशोकजाल !,
जय नाशितकु(क)लिमलं(ल) कष्टमाल(ल!) ।
जय शम-दमगुणमणिसिन्धु ! नाथ !
जय दशभवराजित ! पार्श्वनाथ ! ॥ ९

इति सय चय सुंदर ! शिवसुखमन्दिर ! श्रीवामेयजिनस्यपुरम्।
स्त्रि(त्रि)भुवनं(न)जनरञ्जन ! कुलि(ल) मदभञ्जन !
जय जय बहु कल्याण कुरु ॥ १०

# १३२. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

(तोटक)

प्रणमामि सदा जिनपार्श्वजिनं,
जिननायक दायक सौख्यघनम् ।
घनचारु मनोहर देहधरं, धरणीपति नित्य सुसेवकरम् ॥ १

करुणारस-रञ्जित-भव्यफणी, फणिसप्तसुशोभित मौलिमणी ।
मणिकञ्चनरुपत्रिकौटघटं, घटितासुर-किन्नरपार्श्वतटम् ॥ २

तटिनीपती घोषगभीर-सरं, सरणागतविश्वासेन सरम् ।
नरनारिनमस्कृत नित्यपदा, पद्मावती गावती गीतं सदा ॥ ३

सततेन्द्रिय गोपि यथाकमठं, कमठासुरवारुण मुक्तहठम् ।
हठहेलित कर्म्मकृतां तबलं, बलधामदरं दरपङ्कजलम्, ॥ ४

जलजद्वयपत्रप्रभानयनं, नयनन्दित भव्यतरी समनम् ।
मनमच्छ महीरुह वह्निसमं, समतागुण रत्नमयं परमम् ॥ ५

परमार्थ विचार सदा कुशलं,
कुशलं कुरु मे जिननाथ ! अलम् ।
अलिनी नलिनीनल नीलतनु
तनुतात् प्रभुपार्श्वजिनं सुधनम् ॥ ६

कलशः

सुघन, धान्यकरं करुणापरं, परमसिद्धिकरं ददतां वरम् ।
वरतर अश्वसेन कुलोद्भवं, भवभृता प्रभु पार्श्वजिनं शिवम् ॥७

(द्रुतविलम्बित)

## १३३. ॥ श्रीपार्श्वनाथ-मन्त्राधिराजस्तोत्रम् ॥

अष्टोत्तरशतनामगर्भितम् (अनुष्टुप्)

श्रीपार्श्वः पातु वो नित्यं, जिनः परमशङ्करः ।
नाथः परमशक्तिश्च, शरण्यः सर्वकामदः ॥ १

सर्वविघ्नहरः स्वामी, सर्वसिद्धिप्रदायकः ।
सर्वसत्त्वहितो योगी, श्रीकरः परमार्थदः ॥ २

देवदेवः स्वयं सिद्धश्चिदानन्दमयः शिवः ।
परमात्मा परब्रह्म, परमः परमेश्वरः ॥ ३

जगन्नाथः सुरज्येष्ठो, भूतेशः पुरुषोत्तमः ।
सुरेन्द्रो नित्यधर्मश्च, श्रीनिवासः शुभार्णवः ॥ ४

सर्वज्ञः सर्वदेवेशः, सर्वदः सर्वगोत्तमः ।
सर्वात्मा सर्वदर्शी च, सर्वव्यापी जगद्गुरुः ॥ ५

तत्त्वमूर्तिः परादित्यः, परब्रह्मप्रकाशकः ।
परमेन्दुः परप्राणः, परमामृतसिद्धिदः ॥ ६

अजः सनातनः शम्भुरीश्वरश्च सदाशिवः ।
विश्वेश्वरः प्रमोदात्मा, क्षेत्राधीशः शुभप्रदः ॥ ७

साकारश्च निराकारः, सकलो निष्कलोऽव्ययः ।
निर्ममो निर्विकारश्च, निर्विकल्पो निरामयः ॥ ८

अमरश्चाजरोऽनन्त, एकोऽनङ्गः शिवात्मकः ।
अलक्ष्यश्चाऽप्रमेयश्च, ध्यानलक्ष्यो निरञ्जनः ॥ ९

ॐकारकृतिरव्यक्तो, व्यक्तरूपस्त्रयीमयः ।
ब्रह्मद्वयप्रकाशात्मा, निर्भयः परमाक्षरः ॥ १०

दिव्यतेजोमयः शान्तः, परामृतमयोऽच्युतः ।
आद्योऽनाद्यः परेशानः परमेष्ठी परः पुमान् ॥ ११

शुद्धस्फटिकसङ्काशः, स्वयम्भूः परमाच्युतः ।
व्योमाकारस्वरूपश्च, लोकालोकावभासकः ॥ १२

ज्ञानात्मा परमानन्दः, प्राणारूढो मनःस्थितिः ।
मनःसाध्यो मनोध्येयो, मनोदृश्यः परापरः ॥ १३

सर्वतीर्थमयो नित्यः, सर्वदेवमयः प्रभुः ।
भगवान् सर्वतत्त्वेशः शिवश्रीसौख्यदायकः ॥ १४

इति श्रीपार्श्वनाथस्य, सर्वज्ञस्य जगद्गुरोः ।
दिव्यमष्टोत्तरं नाम, शतमत्र प्रकीर्तितम् ॥ १५

पवित्रं परमं ध्येयं, परमानन्ददायकम् ।
भुक्तिमुक्तिप्रदं नित्यं पठते मङ्गलप्रदम् ॥ १६

श्रीमत्परमकल्याणसिद्धिदः श्रेयसेऽस्तु वः ।
पार्श्वनाथजिनः श्रीमान्, भगवान् परमः शिवः ॥ १७

धरणेन्द्रफणच्छत्रालङ्कृतो वः श्रियं प्रभुः ।
दद्यात् पद्मावतीदेव्या, समधिष्ठितशासनः ॥ १८

ध्यायेत् कमलमध्यस्थं, श्रीपार्श्वं जगदीश्वरम् ।
ॐ ह्रीँ श्रीँ ह्रः समायुक्तं, केवलज्ञानभास्करम् ॥ १९

पद्मावत्याऽन्वितं वामे, धरणेन्द्रेण दक्षिणे ।
परितोऽष्टदलस्थेन, मन्त्रराजेन संयुतम् ॥ २०

अष्टपत्रस्थितैः पञ्चनमस्कारैस्तथा त्रिभिः ।
ज्ञानाद्यैर्वेष्टितं नाथं, धर्मार्थकाममोक्षदम् ॥ २१

सत्षोडशदलारूढं, विद्यादेवीभिरन्वितम् ।
चतुर्विंशतिपत्रस्थं, जिनं मातृसमावृतम् ॥ २२

मायावेष्ट्यत्रयाग्रस्थं, क्रौँकारसहितं प्रभुम् ।
नवग्रहावृतं देवं, दिक्पालैर्दशभिर्वृतम् ॥ २३

चतुष्कोणेषु मन्त्राद्यचतुर्बीजान्वितैर्जिनैः ।
चतुरष्टदशद्वित्रिद्विधाङ्कसञ्ज्ञकैर्युतम् ॥ २४

दिक्षु क्षकारयुक्तेन, विदिक्षु लाङ्कितेन च ।
चतुरस्रेण वज्राङ्कक्षितितत्त्वे प्रतिष्ठितम् ॥ २५

श्रीपार्श्वनाथमित्येवं, यः समाराधयेज्जिनम् ।
तं सर्वपापनिर्मुक्तं, भजते श्रीः शुभप्रदा ॥ २६

जिनेशः पूजितो भक्त्या, संस्तुतः प्रस्तुतोऽथवा ।
ध्यातस्त्वं यैः क्षणं वापि, सिद्धिस्तेषां महोदया ॥ २७

श्रीपार्श्वमन्त्रराजान्ते, चिन्तामणिगुणास्पदम् ।
शान्तिपुष्टिकरं नित्यं, क्षुद्रोपद्रवनाशनम् ॥ २८

ऋद्धिसिद्धिमहाबुद्धिधृतिश्रीकान्तिकीर्तिदम् ।
मृत्युञ्जयं शिवात्मानं,जपन्नानन्दितो जनः ॥ २९

सर्वकल्याणपूर्णः स्याज्जरामृत्युविवर्जितः ।
अणिमादिमहासिद्धिं, लक्षजापेन चाप्नुयात् ॥ ३०

प्राणायाममनोमन्त्रयोगादमृतमात्मनि ।
त्वामात्मानं शिवं ध्यात्वा, स्वामिन् ! सिध्यन्ति जन्तवः ॥३१

हर्षदः कामदश्चेति, रिपुघ्नः सर्वसौख्यदः ।
पातु वः परमानन्दलक्षणः संस्मृतो जिनः ॥ ३२

तत्त्वरूपमिदं स्तोत्रं सर्वमङ्गलसिद्धिदम् ।
त्रिसन्ध्यं यः पठेन्नित्यं, नित्यां प्राप्नोति स श्रियम् ॥ ३३

## १३४. ॥ श्रीविषहरपार्श्वनाथस्तोत्रम् ॥

ॐ जितुं ॐ जितुं ॐ जितुं उपसमधरी,
ॐ ह्रीँ पार्श्व अक्षर जपन्ते
भूत ने प्रेत ज्योतीष व्यन्तर सुरा,
उपशमे वार एकवीस गुणंते ।
ॐ जितुं ॐ जितुं ॐ जितुं उपसमधरी ॥ १

दुष्टग्रह रोग शोक जरा जन्तुने,
ताव एकान्तरो दिन तपन्ते ।
गर्भ बन्धनवारण सर्प वींछी विष,
बालका बालनी व्याधि हन्ते ।
ॐ जितुं ॐ जितुं ॐ जितुं उपसमधरी ॥ २

शायणि डायणि रोहिणी रांधणी,
फोटिका मोटिका दुष्टदन्ति ।
दाढ ऊन्दर तणी कौल नोला तणी,
श्वान शीयाल वीकराल पन्ति ।
ॐ जितुं ॐ जितुं ॐ जितुं उपसमधरी ॥ ३

धरण पद्मावति समरी शोभावति,
वाट अघाट अटवी अटन्ते ।
लक्ष्मी लुन्दो मले सुजश वेला वले,

सयल आशा फले मन हसन्ते ।
ॐ जितुं ॐ जितुं ॐ जितुं उपसमधरी ॥ ४

अष्ट महाभय हरे कान पीडा टले,
उत्तरे शूल शीशक भणन्ते ।
वदति वर प्रीतस्युं प्रीतिविमल प्रभो !
पार्श्वजिन नाम अभिराम मन्ते ।
ॐ जितुं ॐ जितुं ॐ जितुं उपसमधरी ॥ ५

श्री महामन्त्रगर्भितम्

## १३५. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(स्रग्धरा)

अर्हं श्रीपार्श्वनाथो भुजगपतिफलाचक्रनीलातपत्र
प्रत्यस्तांवस्तमिश्रामठकमठहठासूत्रिताम्भोदवृन्दः ।
ॐ ह्रीँ पद्मावती हृत्कमल मधुकर क्लीं भुजङ्गेन्द्रचूडा-
माणिक्योज्ज्वलपादो हरतु हरतु भो ! ह्यापदं चक्रवालम् ॥ १

अर्हन् श्रीपार्श्वनेतर्हर हर हर ह्रीँ सर्वरोगान् त्यक्तः
फूत्कारोफूल्लवक्त्रोत्फुणफणिदमने जाङ्गुली मन्त्रकल्पा ।
कल्पान्तोभ्रान्तवान्तोद्धतजलक्लेद निर्भेद दक्षाः
पद्मामूर्द्धोर्दृधंत्तां श्रीस्तरणवसुसतां रेणुचश्चारणास्ते ॥ २

उत्सर्प्पत्सर्प्पमूर्द्धोंधृतचरणनलौ वामपार्श्वस्थ देवी
पद्मासेव्योन्य पार्श्वस्थित धरणपति-ध्येयपादारविन्दः ।

भूतादिस्तम्भयन्त्रं किमि च किमिथिता कार्मणं शर्म्म लक्ष्मा
श्रीपार्श्व पार्श्वयक्षस्तु विशदगुणः पातु न पीतकेभ्य ॥ ३

भूतप्रेतपिशाचराक्षसचमूदुर्योगिनीशाकिनी
व्यालव्याघ्रजलानलानिलमृगारातिद्विपद्वापि नः ।
वक्रीकर्त्तुमपि शमेस्यचिकुरुनो सिद्धचक्रादिमं
बीजं पार्श्वजिनेश्वराय नमः इत्येतः स्मरेत् यः पुमान् ॥(शा.वि.)४

अन्त्योयाध्यं जनभुवनपरिवृढ–पार्श्वनाथस्य यक्षः ।

विद्याप्रवादादुद्धृतम्

## १३६. ॥ श्रीमन्त्राधिराजस्याङ्गेषु स्थापनास्तवनम् ॥

(वसन्ततिलका)

नादाग्रबिन्दु तलु चन्द्रकला शिरस्थं,
ब्रह्मस्वरूपममलं जिन पार्श्वनाथम् ।
रम्भादलाभवपुषं हि निजे ललाटे,
ध्यायन्ति ते त्रिजगतीं प्रविलोकयन्ति ॥ १

चन्द्राभनाद शिति बिन्दुकलारुणत्वं,
भास्वत्सुवर्णभरहं शिर ई विलीनम् ।
ये बीजमेतदनघं सुधियः, स्वनाभौ
ध्यायन्ति ते त्रिजगतीं प्रविलोकयन्ति ॥ २

शीतांशु निर्मल जयाविजया स्वरूपं,
रुद्रार्यम स्वरयुगं प्रथितप्रभावम् ।

ये दक्षिणेतर-कुचस्थित-मध्यभागे,
ध्यायन्ति ते त्रिजगतीं प्रविलोकयन्ति ॥ ३

ह्राँ वामकास शिखरोत्थतदन्त-मायो,
हूमङ्गदो ह्र इति कूर्पर मध्यदेशः ।
यः कर्पूराग्रवसतिः स्वकलाचि काक्षौ,
नाभेरधो विहित फुः स्फुट पार्श्वनाथः ॥ ४

टं दक्षिणानय विशाल कलाचिकाख्यः,
फुः कर्पूरान्तर गतौऽथ तदग्रगो ट ।
स्वा बाहु रक्षक भयः शुभहांसकाग्र-
स्तन्मध्य उँमिति कृत प्रकृतिः श्रियेऽस्तु ॥ ५

षट्कोणयन्त्रकलया तव पार्श्वरूपं,
भास्वत्किरीट-मणिरत्न-विवृद्ध-शोभम् ।
ध्यायन्ति ये निज-शरीरकृतावतारं,
ते नाथ ! शाश्वतपदाश्रयिणो भवन्ति ॥ ६

मन्त्राक्षरगर्भितः

## १३७. ॥ श्रीपार्श्वनाथस्तवः ॥

(शार्दूलविक्रीडित)

ॐ ह्रीँ अर्हमथो नमो भगवते श्रीपार्श्वनाथाय यो
मध्ये पङ्कजमूर्ध्नि मूर्तिरतनुः स्फारस्फटामण्डितः ।
ॐ ह्रीँ श्रीँ धरणेन्द्रसेवितचतुर्दिक्पार्श्वभागेऽष्टभिः
पत्रस्थैः सहिताय वर्णनिवहैः पद्मावतीमुख्यकैः ॥ १

अट्टे मट्टे जिनेन्द्रक्रमकजनिकटे क्षुद्रसंसद्वि(सिद्धि)घट्टे
क्षुद्रं द्राग् देवि ! पार्श्वक्रमकमलजुषां स्तम्भय स्तम्भयोच्चैः ।
स्वाहान्तेऽथ त्रिलोकीत्रिगुणपरिवृता क्रों निरुद्धे ! विदध्याः
सद्यः सिद्धिं मनीषां विजयमसुमतामिष्टदा कामधेनुः ॥ २

(स्रग्धरा)

आस्थानेषु महीभुजां स विजयी नश्यन्त्यवश्यं ततो
वेलैकान्तरिकत्रिनित्यकमहाचातुर्थिकाद्या ज्वराः ।
नालं मुद्गलशाकिनीप्रभृतयस्त्रातुः पुरस्ताद् दृशो
निर्भीको भुवि बम्भ्रमीति य इमां त्वत्पादसेवां वहेत् ॥ ३

(शा.वि.)

अज्ञातकर्तृकम्

## १३८. ॥ श्रीपार्श्वजिनलघुस्तवनम् ।

(आर्या)

सरभसनतविद्याधरसुरवरमुनिनिकरमधुकरालीढम् ।
प्रणतजनजनितकमलं जयतात् जिनपार्श्वपदकमलम् ॥ १

अतिविपुलकोमलारुणविमलाङ्गुलिपत्रलं पदाब्जं ते ।
श्रीअश्वसेननन्दन ! मम वितरतु सकलभद्राणि ॥ २

मेचकमणिदेहरुचो पाटलनखकिरणकेसरकलापम् ।
चरणसरसीरुहं ते विदलति दुरितानि मे नाथ ! ॥ ३

अतिसुललितसममांसलपक्ष्मलसुविशालजङ्घिकानालम् ।
तव चरणसरोजं नो तनोतु सुकृतानि पार्श्वजिन ! ॥ ४

विलसत्प्रदीपकिञ्जल्ककल्पपीयूषसरससमकल्पम् ।
तव पदपद्मं पुष्णातु देव ! मम वाञ्छितमशेषम् ॥ ५

एवं पार्श्वजिनेश्वर ! ये तव पादाम्बुजं स्तुवन्ति मुदा ।
ते झटिति झटितपापा जायन्ते सकलसुखभाजः ॥ ६

अज्ञातकर्तृकम्

अष्टप्रातिहार्यगर्भित-

## १३९. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(प्रभातीरागेण गीयते)

स्वर्णसिंहासनं स्वामिनोऽधःस्थितम्,
मस्तकस्योपरिच्छत्ररत्नत्रयम् ।
पृष्ठतश्चैत्यशाखी विभामण्डलम्,
पार्श्वतश्चारुणी चामरे चाद्भुते ॥ १

वेणुवीणादिसंवादिकामम्बरे,
दिव्यनादस्ततो दैवतो दुन्दुभिः ।
पुष्पवृष्टिर्विचित्रा पुनः सर्वतः
प्रातिहार्याष्टकं प्रातु तन्मे मुदम् ॥ २

तदतिमहिमयोगादद्भुतेन्द्रध्वजाद्यै-
रतिशयरमणीयं पार्श्वदेवायं(धि?) देवम् ।
हृदयकमलमध्ये ध्यायतो बोधिलाभः,
स्फुरति जिनपतिश्रीः श्रेणिकस्येव [व]स्या(श्या) ॥ ३

(मालिनी)

पू.रघुनाथमुनिविरचितम्

## १४०. ॥ श्रीपार्श्वजिनवरमहिम्नः स्तोत्रम् ॥

(शिखरिणी)

महिम्नः पारं ते परमविदुषस्ते जिनवरं,
गणा गीर्वाणानामपि गुणगुरोर्गन्तुमनलम् ।
नलम्भं लम्भं त्वाधिपमिह नयैस्सर्वकलनं,
नुवद्भिः प्राणी नाऽप्रतिहतगतिर्वागमृतजित् ॥ १

जगत्तातः स्तोतुं किल निरवकाशोप्यहमिहो-
द्यतप्रज्ञो यत्किञ्चिदचिदनघोच्चावचवचः ।
गृणीयां सह्यं तत्तनुभुव इवेष्ठार्थप्रतिभू,
पदोपास्ते पार्श्वासनयजनयित्र्या शिव मम ॥ २

त्वकां वामासूनो ! धुतनिधनमूनोऽयवसुना,
सुनामन्नो दूनोऽस्मर महमनूनोदयरमम् ।
अजानानो भानो भुवनभवने नोवृषभरम् ,
व्यधां मोहादेनोरयमथन तेनोत्कटविपत् ॥ ३

सुबोधं मे देया घनघनघटा मेचकतनु,
र्जगत्त्रय्यारामे मरकुरुह वामेय जिनपाः ।
हतोग्राक्षग्रामे शितरसमकामेषु विजयी,
त्वमर्कालीभामे दुरमुदजघाने जनमते ॥ ४

अपारेऽकूपारे चिरतरमपारे ऽभुवनपा,
असारे संसारे गदशतविसारे वसमहम् ।
धुतारे केतारे वचसि सततारे कृतमति,
स्तवारे द्विडारे भवदहनवारे कुरु कृपाम् ॥ ५

निपीय व्याहारा नरममृतधारा सुमधुरान्,
समादेयान्सारानहिमिथुनमाराव्ययविभो ।
ज्वलद्यस्योदारान्विषधरकुमाराधिपतिता,
ह्यनुक्रोशागारावतु जिनमहाराजसमवान् ॥ ६

दिशश्रीमान्देव व्रजविहितसेवः कुशलता,
लता जाते देव प्रशमिवरदेवत्वमतमाः ।
तमालाभो मे च परिकरिहरे वत्सलसदा,
सदानन्दं केवल्यचलपदमेव स्तुतिकृते ॥ ७

कजन्माक्षं कायं किरवगणहं कीर्तिधवलं,
कुबेरेज्यं कूहा व्रततिपरश्रुं केतकगुणम् ।
इतं कैवल्यं कोकिलकलरवं कौशलकरं,
ददानं कङ्कह्लोपम सुरमरालं नुततमाम् ॥ ८

श्रियः पात्रं गात्रं भवकुशकदात्रं सहृदयै-
रहोरात्रं छात्रं दधदतनुमात्रं तव प्रभो ! ।
पवित्रं सच्चित्रं शुचितरचरित्रं खु तमसा,
ममित्रं यैर्मित्रं स्तुतपुरुपवित्रं सरणकम् ॥ ९

वदान्यस्वच्छन्दं दृगुदकभवैः पीतममलै-,
रिहावन्याधन्याः सफलजनुषस्ते खलुमताः ।
इमे वन्याः सत्त्वा अवतु सदसद्व्यक्तिविकला,
भवारण्येऽटन्तः कथमपि भवन्तं न ददृक्षुः ॥ १०

न जानेऽहं नेतः ! कुमततिमिरप्रावृतदृशां,
गतिर्मादृक्षाणां, दरतरपवित्री वरदका ।

यदेते वस्यन्तोऽप्यभिमतफलोत्सर्जनपरां,
त्वदाख्यां नो चिन्तामणिमिव भजन्तेऽस्तविधय: ॥ ११

त्वमेवेशेदानीं मयि वितनुतात्कामपि कृपां,
भवास्ताघोदन्वत्तलनिपतितं प्रोद्धरतराम् ।
मुहु: खिन्नस्त्वत्पत्कज शरणभीतोस्म्यशरण:,
शरण्योऽसि श्रेयान्प्रभुरलमकध्वंसनविधौ ॥ १२

जयत्वं धीरत्वाधरित कनकाहार्यमहिमा,
हिमालीप्रान्त्याब्धिप्रतिभटगभीरत्व विदित: ।
दितप्रत्यूहालि: शुभमतजगत्पावनजिना,
जीनाशीनश्रीर: कुमति वसुधासीरसततम् ॥ १३

ततं बिभ्रद्बोधं परमपुरुष: सिद्धिनगरी,
गरीय: साम्राज्यं गणधरमहामात्रमहित: ।
हित: कर्तुं कर्माष्टकरिपुबलङ्घ्नञ्जयमहा,
महातीर्थेश ! श्रीभरमतुलमाप्त: पृथुमहा ॥ १४

महाराजस्स्तुत्यो दुरिततरुसिंदूरतिलको,
लकोन: पालाक: सकलभविनां मोहशमन: ।
मनस्यश्रान्त मे वर सरसिकादम्ब इव सन्,
वसज्जीयात्पार्श्वप्रभुरनद्यपार्श्व प्रणुतपत् ॥ १५

तप: श्री भो लोकोत्तरपदमुपेत: सकलवि-,
ल्लवित्रं दोषाली यवसलवने प्राप्तविभव: ।
भवध्वस्त्यैन: स्तादनुपममहानन्दकलितो,
लितो विश्वख्यातैरनिशमवदातैर्गुणगणै: ॥ १६

पद्यचतुष्कं
भवन्तं सद्योगप्रथितपदवी चारिनिवहा
अजस्त्रं विश्रामं प्रणिदधति विश्वेश्वरसमे ।
इदं स्थाने यन्ति प्रसृमरसितो शृङ्खलुखगाः
कलावन्तं किन्नश्रुतमत सदाचारनिरताः ॥ १७

अनन्तेतो दोषान्तक उरु प्रकाशोन्धतमसं,
हरंल्लोक कुर्वन्नमलकमलोल्लासमयकम् ।
प्रबोधं व्यातन्वन्वित तकरतः पङ्कदलनो,
जगच्चक्षुः पार्श्वो दिशतु कुशलं मे समयभूः ॥ १८

नितान्तं सन्तापं समतनुमतान्घ्नन्नमृतगुः,
कलाभिः सम्पूर्णः कुवलयकुलानन्दजनकः ।
प्रदोषेनो रम्य ! समुपचितरत्नाकरदुहा,
वताद्वामापुत्रः सपदि विपदस्तारकपतिः ॥ १९

स्फुरन्त्यासिन्दूरं निजतनुरुचा चारुप्रकृति,
र्म्मही जन्मातङ्कात्यय प्रभृति दुःखाग्निजलदः ।
बुधो बोधस्फीर्तिं दददविरतं राजतनयो,
द्वयातीतो लोके तनुभवनमाप्नोति बलवान् ॥ २०

धरादित्येशानः शुभउरुविभोगौरवरणः,
सदापायाद् वैभासुरगुरुरपायाज्जिनपतिः ।
स्थिरः स्फारश्लोकः स्तुतिसमुचितो भानुतनय-
स्तमोविघ्नध्वंसी न कुशलकरः केतुरसितः ॥ २१

सुरज्येष्ठोन्येभ्यस्त्रिदशविसरेभ्यो वरतया,
सिलोकेशो नूनं त्रिजगदवनात्वङ्कमलारः ।

सुयोगीन्द्रस्वान्तामलकमलजन्माधिवसना-,
च्चतुर्वक्त्र्याश्रेयो जिनपचतुरास्योस्युपदिशन् ॥ २२

प्रतीतो दैत्यारिः शठकमठमानप्रदलनात्,
परार्ध्य श्री योगात्कमलनिलयेशोसि भगवन् !।
ननाकश्चिद्विश्वातिशयभरवित्तस्त्रिभुवने,
भवादृक्षोगीतः परमपुरुषोतो हरिहयैः ॥ २३

महेशानोसि त्वं त्रिभुवनजनैकाधिपतया,
शिवः शश्वन्नृणां परमपददानैकसुविधेः ।
असि त्वं सर्वज्ञः सकलजगदर्थोद्य कलना-,
न्नशूलीनोचोग्रो न च पशुपतिर्नो विषमदृक् ॥ २४

अवाप्तश्रेयः श्रीप्रवितरणलीलाविदलिता,
दितेमागत्य क्षोणीरुहमहिमसारोतिशयवान् ।
विमुक्तस्त्रीसंगः कृतकुमतभङ्गः सुमनसां,
हितायाशेषाणां सुकृतपदवीं त्वं क्व कथयन् ॥ २५

जिनेन्द्राहोरात्रं बहुविपदमन्त्रधृतमरं,
कलत्रं येनात्र क्व स हरिहरादिः सुरगणः ।
सकर्णानाकर्ण्यामित चरितता धूर्तनिवह,
प्रतारी सद्दोषः श्रितसततरोषः स्थितिहतः ॥ २६

समग्रामग्राम प्रभवभयदो बोधरहितः,
सरुग्भव्यद्वेषी पुरु दुरितकृन्मानकलितः ।
पुरामोहान्नूतश्चिरमिह सदाहीनमहितः,
सदेवोथाद्य त्वं कथमपि समासादिभयका ॥ २७

प्रभो ! किं वामेतैरभिमतविधानेलसतरै,-
रपाशोपास्यस्त्वं खलु जिनवरेण्यो नवरतम् ।
मनोलिर्मे त्वत्पद्वनजयुगले संप्रतिवसन्,
परामेति प्रीतिं प्रणयकरुणामिष्टसुदृशो ॥ २८

भदभ्रन्दं भासिन्द्रविणभरमद्रीशसदृशं,
विहायेनाप्रत्नं धरसि किल रत्नत्रयमहो ॥
दधत्सौवर्णानामुपरि नलिनानां क्रमयुगं ।
पुनर्निलोभानां धुरि सुमतिमद्भिस्त्वमुदितः ॥ २९

लसन्निःसीमश्री परिकलितमग्र्यसुवरण,
त्रयी मध्यं मेघोदधिधरणवास्तोष्पतिनुतः ।
सनादध्यासीनाखिलनृपतिलक्ष्माणिदधतः
कुतस्ते नैराग्यं शिवयुवतिसंगोत्कमनसः ॥ ३०

चलं प्राज्यं राज्यं विदित विभवापास्य लखतो,
महानन्दानन्ता महदधिपते नश्वरतरम् ।
क्व ते निर्ग्रन्थत्वं प्रशमरस वार्धेस्त्यसुमतां,
महच्चित्रं चित्ते जनयति तवेदं तु चरितम् ॥ ३१

निकामार्थोत्सृष्ट्या तव वनदवृष्ट्यातिशयितं
जगद्दारिद्र्याग्नि स्म किल जिन ! विध्यापयसि यः ।
त्रिशुद्ध्याध्यायन्तस्तव चरणयुग्मं सुहृदया,
न तर्षं स्वेष्टासैः सुर शिखरिणीशानदधते ॥ ३२

जगत्येकाधाराहित नरककारानिलयतः,
समुद्धर्तुं जन्तुन्परिवृढसमन्तु न पिकिल ।

तव त्रातर्जन्माजननिजन मुख्याकगणहृत,
तवेवेशस्तीर्थोपि च निरूपमानन्दकलितः ॥ ३३

अहीशस्तेशस्तक्रमणवरिवस्यस्य सुमना,
मनाक् पश्येद्भक्तो यदि धननुगमयत् व्यसनितम् ।
नितन्विन्यान्वीतः सपदि कुरुते तं स्वयसमं,
समाङ्गल्यं वाथ प्रभवतिनकः स्वामि कृपया ॥ ३४

मलापायाच्छुद्धास्तव गुणगणाभान्तिविशदः,
स्त्रिलोकीभूजाने सुरपथमणेर्भानव इव ।
रसज्ञानां कोट्याप्यमलधिषणोऽनव्यधिषणो,
नतानीष्टेसंख्यातुमदरपरार्द्धं तु शरदाम् ॥ ३५

नमस्तुभ्यं संसृत्यतनुतटिनी तारणतरे
नमस्तुभ्यं भीमाभयसमददता बलहरे ।
नमस्तुभ्यं सूक्तातिमधुरिमदासीकृतसुधा
समुद्रायामुद्रश्र्युदवसिततुभ्यं जिन ! नमः ॥ ३६

पारेवाङ् महिमालयायसुमनः सन्दोहशुश्रूषिता,-
ङ्घ्रिद्वन्द्वाय कलिच्छिदे भगवते भव्यावलीहेतवे ।
लोकेशपुरुषोत्तमाय मदनाभिन्नायविश्वत्रयी,
मित्राय क्षणदोदयाय सततं श्रीपार्श्व तुभ्यं नमः ॥ ३७

(शार्दूलविक्रीडित)

सवनाशनतारकवक्ररमाधरनिर्जिततारकराजगणः ।
कृत लक्षणतारकनेत्रयुगो जिनमामवतारक भारवहे ॥ ३८

(तोटक)

भवदमलपदाम्भोजन्म संलग्न चेतो,
मधुलिडिति जिनेन्द्रप्राञ्जलिः प्रार्थयेहम् ।
वितरविततबोधं येन पश्यामि साक्षात्,
परमपुरुषरूपं त्वामचिन्त्यस्वरूपम् ॥ (मालिनी) ३९

श्रीसिद्धिपूरतमहामुनिराजसिंह,
पादप्रसादसतृषं रघुनाथदासम् ।
मां शुद्धशासनसहायकपार्श्वयक्ष,
पद्मावती प्रणुतसंसृतितो वः पार्श्वः ॥ (वसन्ततिलका) ४०

अहार्येषु स्तम्बेरमशशिमिते हायनवरे,
नमोमासः कृष्णेगजमुखतिथौ जीवदिवसे ।
सुनामस्थानीये सपदि रघुनाथाह्वमुनिना
स्तवो वामासूनोरचितलिखितो मोदभरतः ॥(शिखरिणी) ४१

## १४१. ॥ श्रीपार्श्वनाथजिनाष्टकम् ॥

(अनुष्टुप्)

रागादिध्वान्तसंघातविघातखरदीधितिम् ।
विश्ववित्तं विभुं पार्श्वं, वन्देहं त्रिजगत्पतिम् ॥ १

संस्तौति स्वामिनं सम्यक्, लोलया लोलमानसः ।
दविष्ठा तस्य नेदिष्ठा सिद्धिः स्याच्छन्दवर्त्तिनी ॥ २

कस्य शक्ति विभो ! वक्ति समस्तगुणधोरिणीः ।
बलिष्टः कोपि तुलया स्वर्णाद्रिं तोलयत्यहो ॥ ३

साधुरीत्या पूर्णप्रीत्या, लोचने पापमोचने ।
दर्शं दर्शं सुधास्नानं, जातं गात्रं प्रभो ! मम ॥ ४

महद्भाग्यं च सौभाग्यं, कामधुग् सुरपादपः ।
स्नारत्नं प्रकटीभूतं, तावकीनं च दर्शनात् ॥ ५

ते च धन्या जगद्गण्या, मानवास्साधुमानवाः ।
वन्दन्ते भवतः पादौ, कल्पशाखी हितप्रदौ ॥ ६

पुण्यसंसारपीनानां, महीनानां च प्राणिनाम् ।
वरिवस्या विभोः स्वान्ते, वरिवर्त्यहर्न्निशम् ॥ ७

विश्वविश्वत्रयीप्राज्यराज्यलक्ष्म्या कृतं मम ।
भवौघपापभिदुरं, वश्मि वामेयदर्शनम् ॥ ८

रसास्पृशाहितरसा जप्यं नाम जगद्गुरोः ।
तस्येप्सितं भवेत् विद्या, विलाससहितं सुखम् ॥ ९

## १४२. ॥ श्रीपार्श्वनाथस्तुतिः ॥

अविचललक्ष्मीविमलनिवासं वासवनिकराभिनतं रे ।
नतजनकल्यमहीरुहकन्दं कुन्दं दव जलधारं रे ॥ १

धारय चेतसि तं प्रभूपार्श्वं पार्श्वभवलतिकाया रे ।
काया भाजित मे चकमलिनं नलिनदलायति नयनं रे ॥ २

नयनन्दित निजतीर्थमुदारं, दारधनोज्झितसंगं रे ।
संगं निर्वाहकमतिधीरं, धीरं जितसुविदग्धं रे ॥ ३

दग्धकषायमनोभवमायं, मायितकीर्ति सनाथं रे ।
नाथं तमहं कारं कारं, कारं हन्मि विकारं रे ॥ ४

कारणमखिलसुखानं सततं, तत सद्गुणविस्तारं रे ।
तारस्वरसुरगणदारो, दारोदीरितदानं रे ॥ ५

दानविधानवशीकृतविश्वं, विश्वजनीन सुवाचं रे ।
वाचंयमवरनिर्म्मलमानस, मानसहंससुदेहं रे ॥ ६

देहश्रीभरनिर्म्मितैकजनता, नेत्रोत्सवो नायकः
कल्याणद्रुमवर्द्धनैकजलदो वामाश्वसेनाङ्गजः ।
जन्माम्भोनिधिपारगः परमविल्लक्ष्मीमनोवल्लभो
भव्यानां तनुता सदा स भगवान् श्री जैनचन्द्रश्रियम् ॥(शा.वि.)७

## १४३. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

श्यामवर्णविराजितोपि विमलो श्यामोपि सर्पो स्मृतः,
श्यामो मेघघनस्य परोपि च घटाश्यामस्तु रात्रिर्खिलम् ।
वर्षा मूसलधारविश्वमखिलं कायोत्सर्गे नतः,
धरणेन्द्रपद्मावतीयुगसारा श्रीपार्श्वनाथाय नमः ॥(शा.वि.) १

(अनुष्टुप)

नमः श्री पार्श्वनाथाय, त्रैलोक्याधिपते गुरुः ।
पापं च हरते नित्यं, पार्श्वतीर्थस्य दर्शनम् ॥ २

ॐ ऐं क्लीं श्रीं धरणेन्द्र पद्मावती सहिताय ।
अतुलबल पराक्रमाय, ॐ ऐं क्लीं क्ष्म्ल्व्र्युं नमः ॥(.....) ३

दर्शनं हरते पापं, दर्शनं हरते दुःखम् ।
दर्शनं हरते रोगान्, व्याधिं हरति दर्शनम् ॥ ४

दर्शनात् लभते ज्ञानं, दर्शनात् लभते धनम् ।
दर्शनात् लभते बुद्धिं, सुखी भवति दर्शनात् ॥ ५

ॐ ऐं औं अं नमः नव वारं पठित्वा गच्छेत् ।
ॐ आं क्रौं क्ष्म्ल्र्व्युं नमः, राज्यमानं भवेन्नित्यम् ॥(.....) ६

राज्यमानं भवेन्नित्यं, प्रजानां च विशेषतः ।
दुर्जनश्च क्षयो याति, श्रेयो भवति सङ्कटे ॥ ७

पुत्रार्थी लभते पुत्रं, धनार्थी लभते धनम् ।
विद्यार्थी लभते विद्यां, मोक्षार्थी लभते शिवम् ॥ ८

इद स्तोत्रं महास्तोत्रं, देयं यस्य कस्यापि न ।
सर्वकार्यकरं सिद्धिः, स्तोत्रेण पठनेन च ॥ ९

इदं स्तोत्रं पठेन्नित्यं त्रिसन्ध्यं च विशेषतः ।
गृहे भवति कल्याणं, पार्श्वतीर्थस्तवेन च ॥ १०

## १४४. ॥ श्रीपार्श्वजिनस्तुतिः ॥

सर्वदेव सेवित पद पद्मं, पद्मं गजगजसिंह रे ।
सिंहासन आसीन बहुजल जलधर सम शुभदेहं रे,
सर्वदेव सेवित पद पद्मं ॥ १

देहि समूहिकमल कुलहंसं, हंसगतिं गति दुखं रे ।
दुखित दीन नृणामाधारं, धाराधरवर घोषं र ॥ २

घोषित सकल भुवन निजधर्म्मं धर्म्मजनांकित चरणं रे ।
चरणधरं च वसीकृतकरणं, करुणाविभव वितरणं रे ॥ ३

तरुणीवर मिततार तिलोकं, लोकित लोकालोकं रे ।
लोकान्तक सुरसंस्थित महिमं, हिमहिमकर शित श्लोकं रे ॥४

शोकातङ्क कजत्थति पार्श्वं पार्श्वं पूरित कामं रे ।
कामविकारहरं धृतिपिण्डं पण्डित विहित प्रणामं रे ॥ ५

नामं नामं श्री जिननाथं नाथेतं जिन सेवा रे ।
सेवा संविद धातु जिनानां नानार्था या सेवा रे ॥ ६

इत्थं सद्गुणगुम्फिता सुललिता निर्दूषिता भूषिता
चिन्त्कान्त्योपचिता सुवर्णरचिता सभ्येभ्य कण्ठोचिता ।
उद्यच्छ्री जिनरत्न नायक युता श्रीजैनचन्द्रैः कृताः
भूयात् पार्श्वजिनेशस्तुतिरसौ मुक्तालता वाङ् नुदे ॥(शा.वि.) ७

## १४५. ॥ श्रीपार्श्वनाथस्तुतिः ॥

(स्रग्धरा)

श्रीमत्पार्श्वं जिनेन्द्रं सकलसुखकरं पावनं नौमि देवम्
जीवानां दुःखितानां भवजलनिवहे तारकस्त्वं जिनेन्द्र ! ।
विस्तीर्णे खेदखिन्ने किमपि निजहितं नास्ति यत्र क्षणस्थे
तस्मान्मां रक्ष देव ! त्रिभुवनविजयिन् ! देहि मे मोक्षलक्ष्मीम्॥१

गीर्वाणा रत्नवृष्टिं सुरपतिकथनाच्चक्रिरे गर्भकाले
भेजुस्तन्मातृपादौ विनयनतिपरा देवनार्यस्तदानीम् ।
सुंदर्यो भक्तिरूपाः कुचभरनमिताः स्नानसेवादियुक्ताः
इन्द्राश्चागुस्तदोत्कण्ठितसुरनिवहैः संवृताः स्नात्रकार्ये ॥ २

ऐरावतं विदधिरे सुरजं सुरेन्द्रा-
स्तस्याऽऽस्यदन्तसरपद्मदलाग्रसंस्थाः ।
देवाङ्गनाः खलु तदा ननृतुः सुरौघे,
इत्थं बभूव महिमा तव जन्मकाले ॥ (वसंततिलका) ३

श्रीपार्श्वो ननु यौवनं खलु तदा व्यागाहत क्रीडया
नागेन्द्रात् पितरोश्चचाल कथनात् तत्रास्ति यः तापसः ।
दुष्टं स्माह ससर्पमिन्धनमहो संज्वालयन्तं तदा
रे रे दुष्ट ! तवास्तु निन्दितकृतं मन्त्रेण जातौ सुरौ ॥ ४

(शार्दूलविक्रीडितं)

सक्षौणीसूनुसूनुद्विषतनयपतिभ्रातृतद्वृन्दपूज्य-
मस्वामी सूनुसौम्यं करयुगनमिता बोधयन्ते स्म देवम् ।
भोगस्यान्ते तदा यो दशविधद्विभिदा भावनां भावयँस्तु
दीक्षां जग्राह भास्वन्नरसुरमहितां संभ्रमत्रासनार्थम् ॥(स्रग्धरा)५

सज्ज्ञानं प्राप पार्श्वो निजविभवबलात् केवलाख्यं ततः स
इन्द्रादेशात् सुरास्ते समवसरणमथो प्रातिहार्यं च चक्रुः ।
वाणी भाति स्म तत्र नृमुनिसुरगणे वर्षयन्ती वृषापः
कोट्यर्कालोकयुक्तं सुरपतिमहितं प्राप ज्ञानाऽऽधिपत्यम् ॥ ६

(स्रग्धरा)

अव्याबाधस्वरूपं सहजघनतरं शाश्वतं दिव्यरूपम्
निर्द्वन्द्वं मोहमुक्तं त्रिभुवनमहितं भासितं सर्वकाले ।
नाद्यंतं सर्वपूज्यं सुचितमनुपमं निर्मलं केवलाख्यम्
श्रीपार्श्वः कर्ममूलं शिवसुखमतुलं छेदयित्वाप देवः ॥ ७

(स्रग्धरा)

## १४६. ॥ श्रीपार्श्वनाथस्तवः ॥

वन्देऽहं जिनदेव-पार्श्वं, षड्विध देव दयालम् (आं.)
वाणारस्यां पुर्य्यां यस्य, जातं जन्म विशालम् ।
अश्वसेन-तन-नंदन-वंदित,
विदलित कलिमल जालम् ॥ १

कमठासुरमदमर्दवधीरं, कृतान्तकर्मातारम्,
अग्निदहद्भ्यां फणिनीफणिभ्यां, दत्त नमस्कृतसारम् ॥ २

रागादिरिपुमारनिकारं, सञ्चितदुर्जयतारम् ।
रत्नत्रयाम्बर-भूषण-हृदयं, दशविधधर्मसुपालम् ॥ ३

सम्मेताचलपर्वतशिखरं, मुक्तिगतं गुणमालम् ।
जगत-प्रसिद्धा-कीर्तिर्यस्या, जाता तं जिनपालम् ॥ ४

## १४७. ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

(भुजङ्गप्रयात)

प्रभु पार्श्वनाथं विभुविश्वनाथं,
यदा पद्ममध्ये समासीनमाध्यम् ।
फणच्छत्रभूषातिशोभायमानं,
भजे ध्यानलीनं मुदा भाषमानम् ॥ १

भजेऽनन्तदेवं भजेऽनन्तरुपं,
भजेऽनन्तनामानमानन्दरुपम् ।
भजे तत्त्वमूर्तिनिराकाररुपं,
भजे निर्विकल्पं, भजे निर्विकारम् ॥ २

चिदानंदरुपं परब्रह्मदेवं, जगन्नाथमेकं, स्वयम्भूस्वरूपम् ।
महाशक्तिरुपं शिवेशं सुरेशं, भजेऽनादिदेवं प्रभुपार्श्वनाथम् ॥३

अजं शाश्वतं सर्वजीवस्वरूपं, जगन्नायकं व्यापकं बीजरुपं ।
प्रकाशस्वरुपं महाशान्तरुपं, भजेऽहं कृपालु-महादेवदेवम् ॥४

अलक्ष्यामरं चामरं चाप्रमेयं, सदा वीतरागाचलध्यानगम्यम् ।
शरण्यं समज्ञं जगत्तारकं वै, भजे केवलज्ञान-भाण्डार-रुपम्॥५

## १४८. ॥ श्रीपार्श्वनाथजिनस्तोत्रम् ॥

भजे भजे नाथ ! तवाङ्घ्रिपद्मं
लभे लभे ते न कुतः प्रसादम् ।
सदैव चिन्तामणिपार्श्वदेव !
विहाय चान्यान् भुवि सर्वदेवान् ॥ (उपेन्द्रवज्रा) १

नो प्राज्यं राज्यं प्रार्थये प्रार्थयेहं
नो गीर्वाणानामाधिपत्यं सदैव ।
एकान्तेनाशु स्तम्भनेश ! प्रसत्तिं,
यौष्माकीणां श्रीभुक्तिमुक्तिप्रदां वै ॥ (वैश्वदेवी) २

वरीवृत्यते भक्तिः शक्तिर्मदीया
दनीध्वस्यते चेत्त्वयि व्यूढविघ्नम् ।
तदा लोद्रवेश ! त्वमर्थ्योऽसि नैव
परं रीतिरेषा भुजिष्यस्य नाथम् ॥ (भुजङ्गप्रयात) ३

सुरनरमधुपालीपीतपादारविन्दे,
विजयिनि खलविघ्नव्यूहविध्वंसदक्षे

भवति भवति नाथे मुक्तिलक्ष्मीसनाथे
त्रिभुवनजनतानां सर्वसम्पन्निदाने ॥ (मालिनी) ४

यदहममलभक्त्या सेवमानोऽपि शश्वत्
किमपि न च लभेयं स्वामिनः सैव हैला ।
इति मनसि निधेया कापरेटाख्यपार्श्व !
तव गुणमणिमाला मालिनी ज्ञप्तिरेषा ॥ (मालिनी) ५

घनसिद्धिसमृद्धिददं श्रुतिदं सुरराजसमाजनतं मतिदम् ।
यदि वाञ्छसि सूतिविभूतिमदं भज रे करहटेकपार्श्वपदम् ॥६
(तोटक)

फलवर्द्धिजिनेशसुरशेनतं स्वकसेवककल्पितकल्पतरो ! ।
ददतां मम चात्र परत्र भवे निजपाद-सरोरुह-भक्तिमलम् ॥७
(तोटक)

## १४९. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

(अनुष्टुप्)

तीर्थेश्वरं जगन्नाथमर्हन्तं बोधिदं प्रभुम् ।
सत्प्राप्तपरमानन्दं योगीशं परमेष्ठिनम् ॥ १

साररैमणिरत्नौघकृतप्राकारमध्यगम् ।
जनोल्लासक-पीठस्थं द्विपक्ष-वरचामरम् ॥ २

विचित्ररचनोपेतातपत्रितयभूषितम् ।
अन्यशासन-वादीन्द्रैर्वन्दिताङ्घ्रीसरोरुहम् ॥ ३

भव्यमानवगीर्वाण-पद्मालहादनभास्करम् ।
प्राणिजन्माद्यतापौघ-निवारकजलप्रदम् ॥ ४

त्रैलोक्यध्येयमह्यंकमष्टकर्म्मारिवारकम् ।
निर्विघ्नमद्ददातारं पार्श्वयक्ष प्रसेवितम् ॥ ५

द्विपसङ्गरनागारि वह्निवारि भयापहम् ।
गदनाग-सपत्नानामुपद्रवविघातकम् ॥ ६

सर्व्वज्ञं सर्व्वगं सार्व्वं वामेयं विश्वपं विभुम् ।
पद्मानागेन संसेव्यं वारिदानां विभाधरम् ॥ ७

रमारामादयो रम्या यस्मादसुवतामहम् ।
वन्दे भवन्तितं पार्श्वमाश्वसेनिं महस्विनम् ॥ ८

इत्यनुजीव्येन मया दभ्राद्भूत-सिद्धिकारको ज्यायान् ।
शिववृद्ध्यै पार्श्वजिनो भक्तिमता संस्तुतस्तोषात् ॥(आर्या) ९

## १५०. ॥ श्रीपार्श्वनाथजिनस्तुतिः ॥

(उपजाति)

आसीत् प्रभोर्यस्य पिताऽश्वसेनो, वामेति नाम्नी जननी सुस्निग्धा।
प्रभावती शीलवती प्रिया च, श्रीपार्श्वनाथं प्रणमामि नित्यम् ॥१

वृन्दारकाणामपि योऽस्ति देवो, देवा नमस्यन्ति च यं विनम्राः।
तं देवदेवार्चितपादपद्मं, श्रीपार्श्वनाथं प्रणमामि नित्यम् ॥ २

नमस्कृतिर्यस्य कृता सुभक्त्या, भवोदधेस्तारयति प्रकामम् ।
नरं च नारीं प्रकटप्रभावं, श्रीपार्श्वनाथं प्रणमामि नित्यम् ॥ ३

न यस्य रागो भवदुःखबीजं, द्वेषोऽपि नैवाङ्गिषु संयमघ्नः ।
मोहोऽपि नैवाशुभवृत्तकारी, श्रीपार्श्वनाथं प्रणमामि नित्यम् ॥४

यद्दर्शनं नेत्रसुखं जनानां, सूर्यस्तमांसीव निहन्त्यघानि ।
निर्लाञ्छनं पन्नगलाञ्छनं च, श्रीपार्श्वनाथं प्रणमामि नित्यम् ॥५

भक्तिं परां कुर्वति नागराजे, जलोपसर्गं कमठे च पापे ।
यच्चित्तवृत्तिर्द्वितये समाना, श्रीपार्श्वनाथं प्रणमामि नित्यम् ॥६

अष्टाधिकं सन्ति सहस्रमेकं यस्याभिधानानि जिनेश्वरस्य ।
आदेयवाक्यं सुविशालकीर्तिं, श्रीपार्श्वनाथं प्रणमामि नित्यम्॥७

त्रिज्ञानयुक्तः प्रविलोक्य नेमि-राजीमतीचित्रमरं विरक्तः ।
पुंसां त्रिशत्या व्रतमाददे यः, श्रीपार्श्वनाथं प्रणमामि नित्यम् ॥८

इत्थं स्तुतो नगरकर्पटवाणिजस्थ,-
श्चिन्तामणिर्जिनपतिः प्रभुपार्श्वनाथः ।
पद्मावतीधरणसेवितपादपद्म-
स्सौख्यं ददातु भविनां करुणासमुद्रः ॥ (वसन्ततिलका) ९

## १५१. ॥ श्रीपार्श्वनाथचैत्यवन्दनम् ॥

(द्रुतविलम्बित)

विमल-केवलज्ञान-समुज्ज्वलं,
सकल-दुर्जय-कर्मविनाशकम् ।
निखिल-सद्गुण-भूषण-भूषितं,
निशदिनं प्रणमामि जगत्प्रभुम् ॥ १

जगतिनाथ जिनेश्वर शङ्करं,
भविकपद्म सुबोध-दिवाकरम् ।
सुर-नरेन्द्र-समग्र-सुपूजितं,
सकल-सिद्धि-समृद्धि-प्रदायकम् ॥ २

अखिल-वस्तु-निरन्तर-दर्शकं,
सकल-सृष्टि-शुभङ्कर-नायकम् ।
विशद-मोदजगज्जन-सेवितं,
गुणनिधिं प्रभुपार्श्वजिनोत्तमम् ॥ ३

## १५२. ॥ श्रीपार्श्वनाथस्तवनम् ॥

(अनुष्टुप्)

पार्श्वनाथ ! नमस्तुभ्यं विघ्नविध्वंसकारिणे ।
निर्मलं सुप्रभातं ते परमानन्ददायिने ॥ १

विजयस्व जगन्नाथ ! परमात्मन् ! वृषध्वज ! ।
कृत्तिकर्मारिसंहारत्रिदोषत्रिपुरान्तक ! ॥ २

विजयस्व परब्रह्मन् ! परमेष्ठिन् ! पितामह ! ।
जगत्त्रयज्ञानमह्यां सृष्टौ स्रष्टा त्वमेव हि ॥ ३

विजयस्व केवलश्रीविलाससुभग ! प्रभो ! ।
विश्वरक्षणप्रौढश्रीसम्भारपुरुषोत्तम ! ॥ ४

सर्वविद्यामन्त्रबीजाक्षरनामाक्षरप्रभो ! ।
श्रीपार्श्वनाथ ! मे नाथः स्यास्त्वमेव भवे भवे ॥ ५

# १५३. ॥ श्रीपार्श्वजिनस्तोत्रम् ॥

(मालिनी)

विशदगुणविचित्रं सच्चरित्रं दधानो,
दलितदुरितराशि र्विश्वविश्वावदातः ।
प्रकटमहिमरम्यो दुर्मतीनामगम्यो
जयतु जिनपतिः श्रीपार्श्वचिन्तामणीशः ॥ १

कमठकुमतिवल्ली मूलमुन्मूलयन्ती,
पदमकृतपदाब्जे यस्य भृङ्गीव पद्मा ।
अविकृतमति कायोत्सर्गमुद्रान्वितोऽसौ,
जगति बहुमतोऽस्मान् पातु वामाङ्गजन्मा ॥ २

अविचलमणि बिभ्रत् सत्फणानां सहस्रं,
बहुलविमलभास्वद्भूषणोदभासिगात्रः ।
गुरुतरवरभक्त्या सक्तचित्ताङ्गभाजां,
भवतु शिवसमृद्ध्यै चाश्वसेनिर्जिनेन्द्रः ॥ ३

कुपितकरिमृगेश व्यालदावानलाब्धि
प्रहरणगदगुप्त्यातङ्कशङ्कापहर्त्ता ।
विकसितमुखपद्मः सत्पुरे सूरताख्ये,
जयतु भुजगलक्ष्म भ्राजमानो जिनेन्द्रः ॥ ४

# परिशिष्ट

## સ્તોત્રસંદેશમાલાના ૨૦ ભાગમાં આવેલા છંદોની યાદી

अचलधृति
अतिधृति
अतिशर्करी
अतिशायिनी
अतिरुचिरा
अनङ्गशेखर
अनुष्टुप्
अपरनाराचक
अपरललितक
अपरवक्र
अपराजिता
अपरान्तिका
अभिमुखी
अवितथ
अशोकपुष्पमञ्जरी
अष्टि
असम्बाधा
आख्यानकी
आपातलिका
आर्या

आर्यागीति
आलिंगनक

इन्द्रवंशा
इन्द्रवज्रा

उज्जवल
उत्कलिका
उदयम्
उद्‌गता
उद्धत
उपचित्रा
उपजाति
उपेन्द्रवज्रा
उर्वशी

ऋषभ
ऋषभगजविलसित

एकावली
औपच्छन्दसका-परान्तिका

औपच्छन्दसिक

कन्या
कामक्रीडा
कामबाण
किसलयमाला
कुटज
कुटील
कुसुमलता
कुसुमविचित्रा
कुसुमितलता
कुसुमितलतावेल्लिता
केकीरव
केसर
क्रीडनक

क्षिप्तक

खिज्जित

गाहा
गीतपद्धति
गीति
गुणमणिनीकर

चन्दनप्रकृति
चन्द्रवर्त्म
चन्द्रलेखा
चन्द्रिणी
चपलम्
चम्पकमाला
चलधृति
चलम्
चित्रमाला
चित्रलेखा
चित्राक्षरा
चूडामणि

छाया

जगती
जया

जयानन्द
जलधरमाला
जलोद्धतगति

तामरस
तोटक
त्रिभङ्गी

दण्डक
(अर्णवदण्डक
उद्दामदण्डक
गगनदण्डक
चण्डवृष्टिदण्डक
प्रयातदण्डक
महादण्डक
सुरामदण्डक)
दयाविमल
दीपक
दोधक
दोहा
द्रुतविलम्बित

द्विपदी

धृति

नगस्वरूपिणी
नन्दितक
नन्दिनी
नर्कुटक
नवमालिनी
नाराचक
नारी
निशा

पङ्क्ति
पञ्चकावली
पञ्चचामर
पत्रपतितं
पथ्या
पथ्यावक्त्र
पद्म
पद्धतिका
पादाकुलक

पुष्पदाम
पुष्पिताग्रा
पृथ्वी
प्रकृति
प्रमिताक्षरा
प्रभावती
प्रबोधिता
प्रमाणिका
प्रमुदितवदना
प्रियंवदा
प्रहरणकलिका
प्रहर्षिणी

बृहती

भद्रक
भद्रिका
भाराक्रान्ता
भासुरक
भुजगशशभृता
भुजङ्गपरिरिङ्गितक
भुजङ्गविजृम्भित
भुजङ्गप्रयात

भ्रमरविलसिता

मञ्जुभाषिणी
मणिगुणनिकर
मणिमध्य
मत्तक्रीडा
मत्तमयुर
मत्ता
मत्तेभविक्रीडित
मदनावतार
मदिरा
मधुनामा
मधुमती
मन्दाक्रान्ता
ममातिशायिनी
महास्रग्धरा
मागधिका
माणवक
मालभारिणी
मालाचित्र
मालिनी
मुखमोटनक
मेघमाला

मेघविस्फूर्जिता
मोटनक
मौक्तिकदाम
मौक्तिकमाला
मृगचपला
मृगी
मृदका
मृदङ्गक

युगलम्
युग्मविपुला

रत्नमाला
रथोद्धता
रमणा
रासकनन्दितक
रासकलुब्धक
रुक्मवती
रुचिता
रुचिरा

लक्ष्मी
ललितक

ललिता

वंशपत्रप्रतितं
वंशस्थ
वक्त्र
वनमञ्जरी
वसन्तचामर
वसन्ततिलका
वस्तु
वस्तुवदन
वाणिनी
वानवासिका
विद्युद्विलसित
विद्युन्माला
विभावरी
विभ्रमगति
वियोगनी
विषम
वेगवती
वेष्टक
वैतालीय
वैश्वदेवी
वृन्दारक

श्री
श्लोको
शङ्ख
शरभललित
शर्करी
शशिलेखा
शशिवदना
शशीकला
शार्दूलविक्रीडित
शालिनी
शिखरिणी
शुद्धविराट्
शोभा
श्येनी

संगतक
सान्द्रपदं
सिंहोद्धता
सिद्धि
सुदन्त

सुधा
सुधाकळश
सुन्दरम्
सुप्रभा
सुभद्रामालिनी
सुमति
सुमुख
सुवदना
सोपानक
सोमराजी
सौभाग्यविमल
स्रग्धरा
स्रग्विणी
स्त्री
स्वागता

हंसमाला
हंसलयं
हंसी
हक्काषट्पदी
हरिगीत
हरिणी

# स्तोत्रसंदेशमाला


१ अर्हदादिसहस्रनामसमुच्चयः
२ अनेककर्तृकृतचतुर्विंशतय
३ बहुकर्तृकृतानेकस्तोत्रसमुच्चयः
४ श्रीपञ्चजिनेश्वर–गणधराणां स्तोत्राणि
५ कल्याणक–छायापूर्तिस्तोत्राणि
६ चतुर्विंशतिजिनस्तोत्राणि
७ श्रीआदिनाथजिनस्तोत्राणि
८ श्रीनेमिनाथजिनस्तोत्राणि
९ श्रीपार्श्वनाथजिनस्तोत्राणि –१
१० श्रीपार्श्वनाथजिनस्तोत्राणि –२
११ श्रीपार्श्वनाथजिनस्तोत्राणि –३
१२ श्रीमहावीरस्वामिजिनस्तोत्राणि
१३ शेषतीर्थंकरजिनस्तोत्राणि
१४ सामान्यजिनस्तोत्राणि
१५ पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि
१६ शाश्वताशाश्वततीर्थानां स्तोत्राणि
१७ सम्यग्दृष्टिदेव–देवीनां स्तोत्राणि
१८ पू.आचार्यादियोग्यमन्त्रस्तोत्राणि
१९ स्तुतयः १
२० स्तुतयः २